नेमिचन्द्रशास्त्रिरचिते ''भारतीयज्यौतषिम्'' इति ग्रन्थस्य षष्ठे पत्रे ''प्रश्नशास्त्रम्'' अधिकृत्य ईषदधिको विचार उपलभ्यते । इदं तत्कालफलबोधकं शास्त्रम् । अत्र प्रष्ट्रा पृष्टं प्रश्नाक्षरमनुसृत्य फलं दैवज्ञाः निरूपयन्ति । अयमेव सम्प्रदायः क्रिस्तोत्तरं पञ्चमशतकं यावदासीत् । तत्पश्चात् (1) प्रश्नाक्षरसिद्धान्तः, (2) प्रश्नलग्नसिद्धान्तः, (3) स्वरविज्ञान सिद्धान्तः इति त्रयाणां सिद्धान्तानां प्रवेशस्तत्राभूत् । पृथुयशसः काले प्रश्नलग्नसिद्धान्तस्य प्रचुरप्रचार आसीत् । क्रमेण क्रिस्तोत्तरैकादशशतकान्ते पूर्णतया इदं शास्त्रं विकसितमभूत् । कालक्रमेण चेष्टाहावभावादिद्वारा मनोगताभिप्रायस्य वैज्ञानिकदृष्ट्या विश्लेषणपद्धतिमपि आत्मसादकरोदिदं शास्त्रम् ।

पूर्वोक्तग्रन्थद्वयमपि प्रश्नशास्त्रस्य प्राचीनतां नैव साधयति । अतः बृ.सं., तट्टीका, बृ.पा.हो. शास्त्र- दशाध्यायीगतान् विचारान् प्रदर्शयामि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बृहत्संहितायां पञ्चाशत्तमोऽङ्गविद्याध्यायो विद्यते श्र तस्मिन् चतुश्चत्वारिंशत् श्लोकाः सन्ति । तेभ्यः प्रष्टुः स्पृष्टाङ्गमनुसृत्य अङ्गमनुसृत्य चोरव्याधिगर्भादिचिन्ताविधिं बोधयति वराहमिहिरः । प्रथमपद्ये पृच्छकाभिमुखदिशं, पृच्छकवचनं, प्रदेशं, तत्काले अन्यैः आहृतं द्रव्यं सुपरीक्ष्य, प्रष्टुः अङ्गस्पर्शनचेष्टादिकं कालमपि विचार्य फलं वक्तव्यमिति वदति, यथा -

दैवज्ञेन शुभाशुभं दिगुदितस्थानाहृतानीक्षता
वाच्यं प्रष्टृनिजापराङ्गघटनां चालोक्य कालं धिया ।
सर्वज्ञो हि चराचरात्मकतयासौ सर्वदर्शी विभु-
श्चेष्टाव्याहृतिभिः शुभाशुभफलं सन्दर्शयत्यर्थिनाम् ।। बृ.सं. (50.1)

प्रश्नशास्त्रोत्पत्तिः

बृ.सं.
अ.श्लो.

2-6 शुभाशुभस्थानदिक्कालनिरूपणम्

7 यात्राप्रकरणोक्तशुभाशुभनिमित्तफलस्य प्रश्नेऽपि योजनविधानम् ।

8-13 स्त्रीपुन्नपुंसकावयवनिरूपणम् । तत्स्पर्शने अक्षिरोग-पुत्रशोक-नृपभय-विप्रयोग-अनर्थप्राप्ति-प्रियलाभ-क्षेत्रचिन्ता-दासीकृतचिन्ताफलं सिद्ध्यतीत्युक्तम् ।

14-22 तालपत्र-वल्कल-हिप्पली-विविधफल-विविधप्राणिपुरीष-विविधपशुश्रावक-चोरादि दर्शनजन्यं, वस्त्रचिन्ता-व्याधिपीडा-बन्धन-दुष्टस्त्रीपुरुषचिन्ता-सर्वनाश-धनसुतधान्यद्विपदलोहवस्त्ररूप्यताम्रप्राप्ति-कुटुम्बवृद्धिचिन्ता ।
कम्बल-क्षौमवस्त्र-आभरणलाभः । चोर-सेना-श्रेष्ठिसम्बन्धिप्रश्नः ।
प्रवासि-पशुपालनचिन्ता च ।

23-24 प्रष्टुः ''भण'', ''निर्दिश'', ''पश्यत्वार्यः'' इत्यादिवचनानुसारेण फलनिरूपणम् ।

25-26 अङ्गस्पर्शात् चोरज्ञानविधिः ।

27-28 स्पर्शादिना नष्टद्रव्यालाभज्ञानं रोगिमरणज्ञानञ्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

29-35 अङ्गविशेषस्पर्शात् भोजनचिन्ता । (भुक्तषड्रसविविधप्राणिमांसविचारः ।)

36-44 गर्भचिन्ता, सुतकन्याजननचिन्ता, कस्मिन्नक्षत्रे जननं भविष्यतीत्यपि विचारः ।

एवं वराहमिहिरेण 44 श्लोकैरुक्तस्य प्रत्येकविषयस्य पराशरवचनप्रमाणं प्रदर्शितं भट्टोत्पलेन टीकायाम् । अनेन पराशरसंहितायाः रचनाकाल एव विविधप्रश्नप्रणाली आसीदिति ज्ञायते, यथा-

1. प्रष्टुः अङ्गस्पर्शानुसारेण फलनिरूपणविधिः ।
2. प्रष्ट्रा उच्चारितपदानुसारेण फलनिरूपणविधिः ।
3. प्रश्नकाले दृष्टपदार्थानुसारेण फलनिरूपणविधिः ।
4. अक्षरप्रश्नविधिः (बृहत्संहितायां शकुनाध्यायोक्तः ।)
5. प्रश्नलग्नसिद्धान्तः । (बृ.पा. होरायाः उत्तरखण्डे 18-21 पद्यैः ज्ञेयः ।)

एवं व्यवहारोपयोगिसमस्तवस्तुविषयकः प्रश्नः तथा प्रश्नविधेः विविधप्रकारोऽपि संहिताग्रन्थ निर्माणकाल एव पवृत्त आसीदिति ज्ञायते । बहूनां संहिताग्रन्थानाम् अदर्शनात् एतदपेक्षयाधिकम् उत्पत्तिमूलशोधनं दुष्करम् ।

अस्यैवांशस्य विशेषविचारः ''प्रश्नशास्त्रस्य प्राचीनता'', ''केरलप्रश्नपद्धतेः संहितादि त्वसमर्थनम्'' इत्यत्र अवलोकनीयम् ।

प्रश्नस्वरूपम्

प्रश्नो द्विविधः, लौकिकः अलौकिश्चेति । प्रश्न इत्युक्ते अस्मिन् चलचित्रे नायिका का इत्यादिविषयेषु संशायितेन पुरुषेण स्वकीयसंशयनिरासाय तज्ज्ञस्यान्यस्य समीपे क्रियमाणा पृच्छा, स तु लौकिकः । द्वितीयस्तु विवाहः कदा भवति? मम पुत्रमुखदर्शनभाग्यं विद्यते वा न वा, अस्ति चेत्कदा? अयमस्माद्रोगान्मुक्तो भवति वा न वा? भवति चेत्कुत्रत्यात्कस्माच्च वैद्यात् कस्या देवतायाः प्रसादात्, कस्मिन् काले? नष्टधनं वा, अपहृतपदार्थो वा नष्टः पुरुषो वा प्राणी वा लभ्यते चेत्कदा, इदानीं तस्य स्थितिः कुत्र, इत्यादिना मानसिकेन प्रश्नेन प्रक्षुब्धः, अस्य परिहरणे समर्थं दैवज्ञाद्भिन्नमन्यमपश्यन्, तमेव शरणं मन्वानः तमुपसृत्य पृच्छति । अयमलौकिक इत्युच्यते ।

1 अनेन सामान्यो लौकिकः प्रश्नस्तु, भूतकालिको वर्तमानकालविषयको वा, दृश्यमानपदार्थविषयकदेशकालान्तर्गत एव भवति । स तु तज्ज्ञेषु क्रियते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2. अलौकिकप्रश्नस्तु त्रैकालिकसम्बन्धी, देशकालाद्यनवच्छिन्नविषयकः दृश्यादृश्यसमस्तवस्तुविषयकश्च भवति । अस्य दैवानुकूल्यतत्प्रकोपादिहेतुकस्य तथा जन्मान्तरार्जितपापपुण्यानुसारिणः भविष्यज्जीवनसम्बन्धिसुखदुःखप्राप्ति विषयकस्य, दैवज्ञनिकट एव क्रियमाणस्य प्रश्नस्य अलौकिप्रश्न इति नाम । अस्योत्तरं दातुं समर्थः प्रश्नशास्त्रे तज्ज्ञो दैवज्ञ एव दृश्यते । एतदर्थक एव शब्दः प्रश्नसारसमुद्रः, प्रश्नज्ञानम्, प्रश्नमार्गः इत्यादौ प्रश्नपदेन प्रयुक्तः ।

तस्मात्त्रिकालविषयकसन्देहस्य परिहारको दैवज्ञः । स यस्माद्वचनात् समाधत्ते, तस्य प्रश्नशास्त्रम् इति व्यवहारः सिध्यति ।

प्रश्नशास्त्रस्य स्कन्धत्रयसम्बन्धसमर्थनम्

यद्यपि पूर्वप्रकरणे जातकस्कन्धादेव प्रश्नफलस्योद्भावनात् प्रश्नशास्त्रस्यापि प्रामाण्यं सिद्ध्यतीत्युक्तम् । तथापि 'न हि प्रतिज्ञामात्रेण वस्तुसिद्धिः' इति न्यायमनुरुध्य प्रतिज्ञातस्य विषयस्य विवरणमावश्यकमिति विव्रियते ।

होरास्कन्धसम्बन्धः

"कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ।।"

बृ.जा. (1-3)

इति वराहवचनात् होरा तु जन्मान्तरकृतपापपुण्यानुसारि ऐहिकशुभाशुभफलं प्रतिपादयतीत्यायाति । तथा होरामाधारीकृत्य प्रश्नशास्त्रं प्रवृत्तं यथा ग्रहराश्यादिबलनिर्धारणं जातकोक्तभावमनुसृत्य प्रश्नलग्नादपि पञ्चमात्पुत्रचिन्ता, सप्तमाद्विवाहचिन्ता, षष्ठाद्रोगचिन्ता इत्यादिजातकोक्तन्यायेन सर्वभावचिन्ता क्रियते । अतएव होरास्कन्धसम्बन्धः सिद्ध्यति ।

संहितास्कन्धसम्बन्धः

एवं संहितास्कन्धेऽपि ग्रहचार-ग्रहण-केतु-अशनिपात-उल्कादीनां यन्नक्षत्रकूर्मानुसारिफलं तदपि प्रश्नशास्त्रसहायकमेव, प्रादेशिकस्य, तत्तज्जातीयजनस्य, तत्तन्नक्षत्रोत्पन्नस्य वा फलनिरूपणात्तत्र, राष्ट्रियदेशीयजातीयैः क्रियमाणस्य प्रश्नस्य संहितोक्तमेवोत्तरं भवति । तथैव संहितोक्तं निमित्तमङ्गचेष्टितं शकुनं च प्रश्नफलनिर्धारणे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथावत् स्वीकृतम् । बृहत्संहिता-पराशरादिसंहितासु तत्र तत्र अध्यायात्मकेषु भागेष्वपि प्रश्नफलदर्शनादस्य संहितास्कन्धसम्बन्धः सुदृढो भवति ।

गणितस्कन्धसम्बन्धः

ग्रहभावादिस्फुटं विना प्रश्नफलप्रवृत्तेरसम्भवात्, ग्रहस्फुटादिकस्य गणितसाध्यत्वात्, गणितस्य सिद्धान्तस्कन्धायत्तत्वात्, अस्य सम्बन्धोऽपि सिद्ध एव । एवं त्रिस्कन्धादेव प्रसृतत्वात् प्रश्नशास्त्रस्य स्कन्धत्रयसम्बन्धः स्फुट एव ।

प्रश्नशास्त्रस्य प्रामाण्यम्

यथा लौकिकप्रमाणागम्येषु पापपुण्य-जन्मान्तर-देवता-यागविशेष-तत्तत्फलविशेषादिविषयेषु प्रामाण्यम् अपौरुषेयवचनरूपागमबोधितत्वात् स्वीकुर्मः तद्वत् जन्मान्तरार्जितपापपुण्यज्ञानं, तज्जन्यव्याध्यादिनिश्चयः, अल्पायुराद्यनिष्टकारणं भविष्यत्कालिकशुभाशुभज्ञानं च लौकिकपुरुषज्ञानगोचरो भवतीति मूर्खोऽपि वदेद्वा? उतागमादिगम्यमेव । कथमिति प्रश्ने- जातकस्कन्धमेवाधारीकृत्य प्रधानतया प्रश्नफलनिरूपणविधानात् जातकग्रन्थप्रश्नफलयोराश्रयाश्रयिभावः सिद्धः । यथा जातकोक्तभावमनुसृत्य प्रश्नलग्नात् सप्तमाद्विवाहचिन्ता, पञ्चमात्पुत्रचिन्ता क्रियते । एवं होरास्कन्धस्य साक्षादागमतुल्यत्वेन प्रामाण्यसमर्थनादेव प्रश्नशास्त्रस्यापि प्रामाण्यम्, उपादेयत्वं च स्वयं सिद्ध्यति ।

जातकप्रश्नयोः साम्यात्तुल्यन्यायप्रतिपादकं वचनम्

जन्मलग्नायत्तत्वाद्धोरायाः, प्रश्ने जन्मलग्नाभावात्तुल्यन्यायेन फलनिरूपणं कथं युक्तमिति पुनः प्रश्ने, समाहितं प्रश्नमार्गकारैः यथा-

सम्प्रेर्यमाणस्त्ववशः शरीरी प्रसह्य दैवेन शुभाशुभेन ।
ज्योतिर्विदसन्निधिमेति यस्मात्प्रश्नोऽप्यतो जन्मसमः फलेषु ।।

प्र.मा.(1-46)

यथा जन्मान्तरार्जितशुभाशुभकर्मबोधके कालविशेषे, हठात् दैवेन प्रेरितः अवशः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्नेव शिशुः गर्भाशयाद्बहिरायाति। जनने कर्मविशेषारम्भसमये वा पूर्वक्षितिजस्पृष्टं राशिं लग्नमिति निरूपयन्ति। तद्वत् दैवेनैव प्रेरितः पृच्छकोऽपि अवशः सन् कर्मानुगुणकालविशेषेणैव दैवज्ञसन्निधिमेति। एवं जन्मलग्नवत् पृच्छालग्नस्यापि दैवनिष्पादितत्वात् फलसाम्यम्। उभयत्रापि तत्तज्जीवकृतकर्मप्रकाशके काल एव प्रेरयति, नात्र दैवमपि स्वातन्त्र्यमवलम्बते। अतः -

जातके यद्यदुद्दिष्टं तत्तत्प्रश्नेऽपि चिन्तयेत् ।। प्र.मा. (1-47)

अनेन होराप्रश्नशास्त्रयोः अभेदं, नित्यसम्बन्धं, जन्यजनकभावसम्बन्धं च दृढीकृतवान् प्रश्नलग्नं जन्मलग्नत्वेन स्वीकृत्य जातकोक्तं सर्वं फलं प्रश्नेऽपि चिन्तयेदिति निरूपयन्।

जम्बुनाथः

ग्रन्थकर्त्तुः परिचयः

जम्बुनाथस्य सप्त ग्रन्थाः सरस्वतीमहल् तञ्जावूर् प्राच्यग्रन्थागारे समुपलभ्यन्ते। तेषामारम्भश्लोकेषु स्वस्य नामधेयं जम्बुनाथः, वाधुलगोत्रोत्पन्नः, चोलभुवि लब्धजन्मा इति लिखति। न तु यत्र कुत्रापि जन्मकाल-स्थानविशेष-गुरु-विद्यादीन् प्रकाशयति सः। एतत्सर्वमधोनिर्दिष्टेषु वाक्येषु निर्दिष्टमस्ति, यथा-

प्रश्नसारसमुद्रारम्भे-

वाधूलकुलपद्मार्को जम्बुनाथस्सतां मुदे।
प्रश्नार्णवं रचयति प्रश्नशास्त्रामृताकरम् ।।

प्रश्नरत्नारम्भे-

महागणपतिं नत्वा जम्बुनाथस्तु चोलभूः।

प्रश्नसङ्ग्रहारम्भे-

वाधूलश्चोलभूर्नत्वा जम्बुनाथो महेश्वरम्।

जातकरत्नारम्भे-

पराशरादिग्रन्थांश्च..........आलोक्य लिख्यते सारान् जम्बुनाथेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जातकसर्वस्वसङ्ग्रहः (सव्याख्यः) अस्यारम्भे-

.......होराशास्त्रो-.............सर्वस्वं मया सङ्गृह्यते स्फुटम् ।।

देशः

चोलभूमिः

जम्बुनाथः स्वग्रन्थारम्भे चोलभूमिं स्वदेशत्वेन निरूपयति । चोलभूः इति पदं चोलराज्यगतभूभागं बोधयति । चोलराज्यव्याप्तिः विभिन्नकालेषु विभिन्नप्रदेशेषु प्रसृता आसीत् । अस्य जन्मकालः कैरपि चरित्रलेखकैः निर्धारित इव न दृश्यते । जन्मस्थानविशेषस्य कालस्य च प्रकाशकं ग्रन्थान्तर्गतवचनमपि नोपलभ्यते । तस्मात् प्रश्नसारसमुद्रग्रन्थान्तर्गतां भाषां, ग्रन्थे उद्धृतवचनं चाश्रित्यैव चोळराज्यान्तर्गतस्य स्थानविशेषस्य निर्धारणप्रयासः क्रियते ।

चोलभूः

985 A.D. कालात्पूर्वं मधुरै नगरे पाण्ड्यराजधानी तथा तिरुचिनापल्लिपट्टणे (त्रिशिरःपुरी) चोलराजधानी, सह्याद्रिपर्वतमूले वंजीपुरे चेरराजधान्यासीत् ।

985-1044 A.D. मध्यकाले चोलदेशे राजराजः तत्पुत्रो राजेन्द्र इति प्रसिद्धौ राजानावास्ताम् । क्रमेण तौ सिंहलसहितं समग्रं दक्षिणभागं, तुङ्गभद्रातीरस्थं कर्नाटकं तथा आन्ध्रवङ्गभूभागमपि स्वायत्तीकृत्य चक्रवर्तिपदमवापतुः । एवं 985-1300 A.D. कालपर्यन्तं अस्य भूभागस्य चोलभूरिति प्रसिद्धिरासीत् ।

तत्र तमिळ्भाषाभूभागः

ग्रन्थमध्ये तमिळ्भाषापदैः कृतमर्थविवरणं दृश्यते, यथा-

श्लोकार्धम्	संस्कृतपदम्	तमिळभाषानुवादः
A. 967	उष्णरोगः	एरिप्पु
A. 987	विचर्चिका	ओडम्बिले शोरि
A. 987	सन्धितोदः	ओडम्बिले वशमिल्लादे इरुकै

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

A. 987 वामरुक् वामभागे वशमिल्लादे इरुक्कै

अनेनेदं सुविज्ञातं जम्बुनाथः तमिळ्देशीयः अथवा तमिळ्भाषां सम्यग्जानातीति ।

अस्यैवोपलभ्यमानासु सप्तसु मातृकासु षण्णां मातृकाणां मद्रपुरी-तञ्जावूरु मातृकालयेषु उपलब्धिरपि तमिळ्देशीय एवायमिति ऊहां दृढीकरोति ।

तिरुचिनापल्लिपरिसरभूमिः

तिरुचिनापल्लि (त्रिशिरःपुरी) तिर्नवेल्लीपट्टणयोरन्तरं 300 कि.मी. परिमितं विद्यते

जम्बुकेश्वरः

त्रिशिरःपुर्याः पञ्चक्रोशपरिमिते दूरे जम्बुकेश्वरमन्दिरं विराजते । तत्र द्रविडदेशेषु प्रथिते पञ्चभूतात्मकलिङ्गेष्वन्यतमं जलतत्त्वात्मकं शिवलिङ्गं विराजते ।

अत्रैतिह्यम् -

प्रत्यहं प्रभाते गजराजो लिङ्गोपरिस्थं पाषाणं (नागमणिं) दूरीकृत्य पुष्पगुच्छैरर्चयति स्म । अनुदिनं सायं सर्पराज आगत्य पुष्पविसर्जनपूर्वकं नागरत्नैरर्चयति स्म । एवं स्थिते मदीयमर्चितं वस्तुजातं को वा दूरीकरोतीति शङ्का द्वयोरप्यपरिहार्यासीत् । एवं सर्वत्र प्रथितो जम्बुकेश्वरोऽभूत् ।

अत्यादरेण तन्नामग्रहणात् मन्दिरपरिसरगतभूमौ समुत्पन्नो जम्बुनाथो भवेदिति शङ्का जागर्ति ।

किन्त्वस्य मलयाळमिश्रिततमिळ्पद्यावलोकनेन तथैवास्य तिरुवनन्तपुरं सन्निहिते गुरुकुले च चिन्त्यमाने उभयभाषासीमाप्रदेशगता तिरुर्नल्वेल्लिपरिसरस्था चोलभूमिरेवास्य जन्मभूरासीदिति तर्कः साधुतर इत्यवभासते । तथैव पादसञ्चारकाले समीपस्थं गुरुकुलमपि युक्ततरं भवितुमर्हति ।

अस्य तर्कस्य अधोनिर्दिष्टानि कारणानि उपोद्बलकानि भवन्ति -

अ) प्रश्नसारसमुद्रे मलयाळभाषया लिखितानि विंशत्यधिकपद्यानि दृश्यन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथा -

श्लोकार्धसंख्या

मनुष्यरशियिल् धातुवरुकिल् कालैकिट्टुमे । 444

इत्यादि भेदमार्तापुशोल्लुवान् निश्चयिच्चुवै ।। 448

आ) केरलेषु प्रसिद्धेभ्यः कृष्णीय-प्रश्नानुष्ठानपद्धति-सारसङ्ग्रहादिग्रन्थेभ्यः सारांशः श्लोकाश्च जम्बुनाथेन उद्धृताः सन्ति ।

इ) स्वकृते प्रश्नसङ्ग्रहाख्ये ग्रन्थे उक्तम्-

इति केरलीयनित्यदशायां संवत्सरफलकथनं समाप्तम् ।

इति केरलीयमतं स्मरति ।

ई) भारतदेशे सर्वत्र होरेति पदेन केवलबृहज्जातकं व्यवहरन्ति । केरलीयाः गौरवविशेषबुद्ध्या कृष्णीयग्रन्थमपि होरेति पदेन व्यपदिशन्ति । जम्बुनाथोऽपि प्रश्नसारसमुद्रे एकत्र तदुक्तं होरायाम् इत्युक्त्वा कृष्णीयवचनमेवोद्धरति, यथा -

प्रश्नसारसमुद्रे- श्लोकार्धसंख्या 326-327

द्वादशे षष्ठे वा भवति बन्धनं रविजे ।

भौमे रुधिरं सूर्ये युद्धं चन्द्रे तु विस्पर्शः ।। द्र.कृ. (23-9)

उ) तिरुवनन्तपुरं मातृकाग्रन्थालयस्थं जम्बुनाथस्य मातृकाग्रन्थद्वयं The curator's office library मातृकासूच्यां जातकसर्वस्वसङ्ग्रहः इति ग्रन्थस्य मातृका वट्टपल्लीमठं सुचीन्द्रम् इत्यस्माल्लब्धमिति लिखितं वचनं दृश्यते ।

एवमस्य ग्रन्थे मलयाळपद्यदर्शनं, केरळीयग्रन्थोद्धृतवचनं, कृष्णीयग्रन्थे होराशब्दप्रयोगः, केरळेषु जम्बुनाथीयमातृकायाः प्राप्तिश्च केरलदेशस्य विशेषसम्बन्धं बोधयति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कालः

कैरपि चरित्रकारैः जम्बुनाथमधिकृत्य विचारः न कृतः । तस्मात् ग्रन्थस्य वचनपरिशीलनं विहाय नान्य उपायो विद्यते कालनिर्णयाय । अस्मान् प्रश्नसारसमुद्रे उद्धृतवचनानां, तथा स्मृतानां ग्रन्थकर्तृणां वराहअमिहिरादारभ्य प्रश्नानुष्ठानपद्धति-ग्रन्थानां च परिशीलने क्रिस्तात् परं पञ्चमशतकाद् (505 A.D.) आरभ्य प्रायेण त्रयोदशं शतकं यावत् (1350 A.D.) मध्ये विरचितानां ग्रन्थानां तत्कर्तॄणां च नामानि परिगणितानि । अतः जम्बुनाथस्य तस्मादुत्तरकालः, तत्र च प्रायः चतुर्दशशतके आसीदिति अनुमीयते ।

जम्बुनाथेन ग्रहबलनिर्धारणे दशमे क्रैस्ते शतके स्थितस्य श्रीपतेरेव नामग्रहणमकारि । न तु (1456 A.D.) विद्यमानस्य प्रथितयशसो गणेशपितुः केशवस्य । तथैव प्रश्नमार्गकारेण अत्यादरेण स्मृतायाः दशाध्याय्याः ('नौका इति अस्याः अपरं नाम), (1543 A.D.) माधवरचितस्य प्रश्नशास्त्रे सर्वोत्कृष्टग्रन्थस्य प्रश्नमार्गस्य नामाकीर्तनात् जम्बुनाथस्य क्रिस्तात् परं 1350 तमादारभ्य 1456 तमवर्षं यावत् मध्ये काले स्थितिरासीदिति तर्क्यते ।

विद्याभ्यासः

जम्बुनाथस्य ज्योतिःशास्त्राध्ययनं केरळेषु आसीदिति जम्बुनाथस्य देशः इति प्रकरणे विवृतैः एभिः कारणैः ऊह्यते, यथा -

1) कृष्णीये होराशब्दप्रयोगः ।
2) केरळेषु प्रसिद्धेभ्यः अनुष्ठानपद्धत्यादिग्रन्थेभ्यः उद्धरणम् ।
3) केरळभाषालिखितानां ज्यौतिषपद्यानां स्वग्रन्थे लेखनम् ।
4) प्रश्नामृतजातकसर्वस्वसङ्ग्रहमातृकयोः (Curator's office library, Trivandrum) इत्यत्रैव प्राप्तिः ।
5) तत्रत्य मातृकासूचिकायाम् अनयोः मातृकयोः सङ्ग्रहः वट्टपल्लीमठम्, शुचीन्द्रम् अस्मात्स्थानात् कृतम् इति लेखनं, एवमादीनि कारणानि केरळे अध्ययनमस्येति दृढीकुर्वन्ति ।

शुचीन्द्रस्थे वट्टपल्लीमठे प्रश्नामृतजातकसर्वस्वसङ्ग्रहाख्ययोरस्यैव कृतिभूतयोर्ग्रन्थयोरुपलब्ध्या एवमपि तर्कयितुं शक्यते, यद्वे मातृके विलिख्य स्वगुरवे अर्पिते स्याताम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनेनास्य गुरुगृहं वट्टपल्लीमठ एव इति सिद्ध्यति । द्वे मातृके अपि ग्रन्थलिपिलिखिते दृश्येते । अतः तमिळभाषाभाषिणा जम्बुनाथेन स्वयं लिखिते भवेतामित्यपि ऊह्यते ।

कृतयः

अस्य कृतयः सप्त उपलभ्यन्ते । तासु पञ्च प्रश्नशास्त्रसम्बन्धिन्यः । द्वे जातकसम्बन्धिन्यौ स्तः । ताः सर्वा मातृकारूपेण तञ्जावूरु-मद्रास्-अड्यार्-तिरुवनन्तपुर मातृकाग्रन्थालयेषु विद्यन्ते । (द्र. 16 पृष्ठे मातृकायाः स्वरूपविवरणं मातृकायाः सूचीग्रन्थाधारेण कृतम् ।) तत्रैवावलोकनीयम् ।

पाण्डित्यम्

जम्बुनाथस्य देशः इति प्रकरणे पठितादंशादस्य तमिळ्-मलयाळभाषाज्ञानं, बहुग्रन्थरचनात् संस्कृते पाण्डित्यमपि परिपूर्णम् आसीदिति ज्ञायते । प्रश्नसारसमुद्रे पृथुयशोविरचितायाः षट्पञ्चाशिकायाः आरभ्य अनुष्ठानपद्धत्यादिप्रसिद्धग्रन्थेभ्यः विविधमतानां सङ्ग्रहणपूर्वकं पञ्चानां ग्रन्थानां लेखनं प्रश्नशास्त्रे सुपरिपक्वं ज्ञानं बोधयति ।

जातकसर्वस्वसङ्ग्रहः, जातकरत्नम् इति जातकग्रन्थद्वयलेखनं, बृहज्जातक-सारावल्यादिजातकग्रन्थानां स्वग्रन्थे निरूपणं, तेभ्यः उद्धरणं च जातकशास्त्रेऽपि जम्बुनाथस्य पाण्डित्यं स्फुटीकरोति ।

1. बृहत्संहितायाः अङ्गविद्याध्यायात् पुंस्त्रीनपुंसकावयवविषयस्य सङ्ग्रहणात् ।
2. शकुननिमित्तादिविचारस्य पूर्णतया स्वग्रन्थे चिन्तनात्
3. जातकरत्नारम्भे ''पराशरादिग्रन्थांश्च............. आलोक्य लिख्यते सारान्'' इत्यादि ग्रन्थगतवचनप्रतिपादनाच्च अस्य संहिताज्ञानं पूर्णतया विभाति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

जम्बुनाथरचितानां समानां ग्रन्थानां परिचयः

ग्रन्थनाम, प्राप्तिस्थानं च	ग्रन्थकर्तृनाम	मातृकासंख्या	पत्रस्वरूपम्	पत्रमानम्	पत्र संख्या	पङ्क्तिः	अक्षराणि	लिपि	ग्रन्थ संख्या
1) जातकसर्वस्वसङ्ग्रहः (सव्याख्यः)	जम्बुनाथः	No.685^A	ताडपत्रम्	10½ x 1½	23	6	48	ग्रन्थ	400
मातृकाप्राप्तिस्थानं COL त्रिवेन्द्रम्	जम्बुनाथः	C.O.L. No.1908^A							
2) प्रश्नामृतम्, COL त्रिवेन्द्रम्	जम्बुनाथः	No.685^A C.O.L. No.1908^B	ताडपत्रम्	10½ x 1½	29	6	48	ग्रन्थ	522
3) जातकरत्नम् TMSSML तञ्जावूर्	जम्बुनाथः	B. No.10993^B	ताडपत्रम्	16½ x 1 2/5	2	8-9	--	ग्रन्थ	36
4) प्रश्नरत्नम् TMSSML तञ्जावूर्	जम्बुनाथः	B. No.10999^B	ताडपत्रम्	17½ x 1 1/5	10	7-8	--	तेलुगु	400
5) प्रश्नसारसमुद्रः, TMSSML तञ्जावूर्	जम्बुनाथः	B. No.11012	ताडपत्रम्	16 7/10 x 1½	64	6-7	80-90	तेलुगु	1500
5.1) ,, ,,	जम्बुनाथः	B. No.11013	ताडपत्रम्	-- --	114	4	70	तेलुगु	1500
5.2) ,, ,,	जम्बुनाथः	No.9696^B	श्वेतपत्रम् Paper	-- --	288	15	14-18	देवनागरी	1500
6) प्रश्नसङ्ग्रहः GOML, Madras VOL. XXXI (1951)	जम्बुनाथः	D. No.17204	ताडपत्रम्?	-- --	72	5		तेलुगु	648
7) प्रश्नदीपिका (सव्याख्या) अड्यार्, मद्रास्, 1944	जम्बुनाथः		--	--	--	--	--	--	--

Digitized by Madhuban Trust, Delhi
CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्र तत्र स्वदेशीयकालाद्यानयनपद्धतेः प्रदर्शनात् तथा लग्नग्रहादिस्फुटीकरणपद्धति-निरूपणादस्य गणितज्ञानमपि सम्यगासीदिति सिद्ध्यत्येव ।

ग्रन्थेऽस्मिन् विविधपरम्पराचार्याणामपूर्वविषयसङ्ग्रहणं, ध्वजाद्यायात् प्रश्नफलनिरूपणात्मकस्य अपूर्वस्य सुग्रीवाचार्यमतस्यापि सङ्ग्रहणं, वराहमिहिरग्रन्थ-गतानां सूत्ररूपवचनानां स्वकृतव्याख्यानद्वारा विविधार्थप्रकाशनं, गुरुपरम्पराप्राप्तस्य अन्यस्मात्पण्डितादागतस्यापि रहस्यवचनस्य व्याख्यायां निरूपणं च अस्य सूक्ष्मदर्शित्वं, शास्त्रीयन्यायस्य प्रकरणान्तरे प्रसारणकौशलं, ज्योतिःशास्त्रे आतलस्पर्शित्वं च प्रकाशयति ।

ग्रन्थवैशिष्ट्यम्

केनाप्यनुक्तस्य अविदितस्य अश्रुतस्य वा विषयस्य निरूपणमेव, वैशिष्ट्यं पदस्य अर्थ इति शास्त्रीयविषयेषु न सङ्गच्छते । यस्य कस्यापि सामान्यपुरुषस्य शास्त्रीयविषये तादृशस्वातन्त्र्यं नास्त्येव । अयमेव सम्प्रदायः महद्भिरपि शङ्कराचार्यप्रभृतिभिः आदृतः । किन्तु ग्रन्थवैशिष्ट्यं प्रकारचतुष्टयेन सिद्ध्यति ।

1. एकं विषयं स्वीकृत्य सुविस्तरेण विवेचनम् ।
2. प्रकरणान्तरोक्तन्यायसञ्चारणेन विषयविवेचनम् ।
3. तच्छास्त्रीयविविधग्रन्थोक्तमतसङ्ग्रहणम् ।
4. बालाद्यधिकारिणमुद्दिश्य ग्रन्थनिर्माणम् ।

अस्मिन् ग्रन्थे चतुर्विधमपि वैशिष्ट्यं दरीदृश्यते ।

विस्तरेण विवेचनवैशिष्ट्यम्

ग्रन्थकर्ता यं कमप्यभिप्रायं मनसि कृत्वा तत्साधनाय ग्रन्थं रचयति चेत् स एव प्रतिपाद्यो विषयो भवति ग्रन्थस्य । तस्यैव शास्त्रविषयत्वेन व्यवहारः क्रियते । प्रश्नशास्त्रेऽस्मिन् प्रष्टुर्विस्मापनांशस्य न्यूनतां मत्वा, ग्रन्थकर्ता पूर्णां दृष्टिं तत्रैव निहितवानिव दृश्यते ।

जातकशास्त्रेऽपि फलकथनारम्भाङ्गत्वेन, प्रसूतिकालगतानां उपसूतिका-खट्वा-दीप-गृहस्वरूपादीनां विवेचनेन प्रष्टुर्विस्मापनमेव विहितम् । अत एव वराहमिहिराचार्यः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बृहत्संहितायाः (1-17), सांवत्सरसूत्रवाक्ये ''निषेकजन्मकाल विस्मापनप्रत्यादेश'' इति वचनेन प्रष्टुर्विस्मापनस्य आवश्यकतां सूचयति । प्रश्नशास्त्रे विस्मापनं नाम प्रश्नलग्नादिना पृच्छकोपभुक्ताहारस्त्रीदृष्टपदार्थादीनां स्वरूपनिरूपणेन पृच्छकस्य मनसि आर्श्चर्योत्पादनम् । अस्य फलं तु दैवज्ञस्य प्रश्नलग्नशुद्धौ प्रत्ययः, पृच्छकस्य शास्त्रे विश्रम्भोत्पादनम् । अत एव प्रश्नसारसमुद्रस्यारम्भं विस्मापननिरूपणादेव करोति, यथा -

तत्र ''प्रश्नकाले प्रष्टुर्विस्मापनार्थमागमनकाले प्रष्टृदृष्टलक्षणानि वाच्यानीत्याह'' इति प्रतिज्ञां कृत्वा विस्तरेण विस्मापनविधिं विवृणोति ।

न्यायसञ्चारणेन विषयविवेचनम्

प्रकरणान्तरोक्तस्य न्यायस्य सञ्चारणेन विशेषविवेचनमस्य ग्रन्थस्य व्याख्यायां प्रायः सर्वत्र दृश्यते । ग्रन्थकार एव व्याख्याता अपि इति व्याख्यावचनमेव प्रमाणयति, यथा-

प्रश्नसारसमुद्रे (A. 597)

''योनिभेदबलादिकमस्मदुक्तप्रश्नदीपिकायां प्रपञ्चितं तत्रैव द्रष्टव्यमिति ।''

प्रश्नसारसमुद्रे (A. 552)

''अङ्गविभागादिप्रपञ्चोऽस्मदुक्तप्रश्नदीपिकायां द्रष्टव्यः ।''

प्रश्नसारसमुद्रे (A. 1365)

''विस्तरस्त्वस्मदुक्तपद्धत्यादौ द्रष्टव्यः ।''

व्याख्यावैशिष्ट्यम्

द्विपाद्राशावुदयगे...... शकटादिगः । द्र.प्र.स.पृ 1213

[व्या.] द्विपाल्लग्ने अन्येन सह, चतुष्पाल्लग्ने चतुष्पात्पशुमारुह्य, शुष्कराशिलग्ने पद्भ्यामेव, जलराशिलग्ने नौकया, पक्षिराशिलग्ने शकटादिवाहनमारुह्य, यातुः प्रत्यागमनं प्रश्नलग्नान्निरूपणीयम् ।

अजवृषभमृगाङ्गनेत्युच्चादिलक्षणमुक्तं तत्फलमाह ।
सुखी सुकर्मा राजन्यो राजा दिव्योऽत उच्चगैः ।
एकादिभिस्तुङ्गगतैर्ग्रहैरेतत्फलं क्रमात् ॥ द्र.प्र.स.पृ. (A 598)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[व्या.] एकस्मिन्नुच्चगे केन्द्रगते सुखी भवति । सर्वत्र केन्द्रगैरेव । राजन्यो राजतुल्यः । राजा चक्रवर्ती । अतः परं पञ्चभिरुच्चगैर्दिव्यो भवतीति । एवं जातके । प्रश्ने तु उच्चगे पश्यति सुकर्मा । अत्युच्चगे पश्यति दिव्यकर्मा । नीचगे निकृष्टकर्मा । अतिनीचगे तु नारककर्मा चिन्तितः चोरादिर्वा । केचित्तु उच्चस्थस्य दृष्ट्या सर्वतः सुखी भवति । उच्चगयोर्दृष्ट्या सर्वकर्मभोक्ता । उच्चगानां दृष्ट्या राजा । चतुर्णां दृष्ट्या चक्रवर्ती । पञ्चादीनां दृष्ट्या देवसमा भवन्तीति । नीचग्रहे अनायुर्वा नीचो वा भवति । नष्टे नश्यति नरककर्मा च क्लेशश्च । बहवो नीचस्था यदि स्युः चाण्डालाः स्वजातीयेभ्योऽधमाश्च भवन्तीति ।

रक्तः श्यामः .... रविः । द्र.प्र.स. A. 573

[व्या.] उच्चगतो रक्तप्रधानः नीचगत्या श्यामप्रधानरक्तः ।

द्र.प्र.स.पृ. (A 571) [व्या.] ....पृष्ठोदयादयः सर्वेषु भावेषु चिन्त्याः । तेषु पृष्ठोदयेषु अनिष्टं वधबन्धदुरितरोगमरणहान्यादिकं यत्पृष्टं तत्सिद्ध्यतीत्यर्थः । फलं तु निम्नत्वसमत्वोन्नतत्वाधोमध्योर्ध्वलोकत्वदूरमध्यासन्नत्वादि । चशब्देन ग्रहरहितेष्वेवमनिष्टाद्युक्तफलसिद्धिः । ग्रहसहितेषु तु ग्रहवशात्फलसिद्धिरिति ज्ञापितम् । मेषवृषधनुरुदये भयमायुर्वा अस्ति न वेति पृच्छायां नास्तीत्येव ब्रूयात् । कन्यातुलालिषु यात्रालाभो मरणायुर्वा अस्ति न वेति प्रश्ने सर्वमस्त्येवेति वदेत् । अन्येषु यथास्वं सिद्ध्यति । मिथुनकुम्भसिंहेष्विष्टं मीने तूभयं सममिति सम्प्रदायः ।

मूलग्रन्थगतापूर्वविषयवैशिष्ट्यम्

मन्दे हीनबले नूनं तज्जन्मनि सुखं न हि ।
मन्दस्य पापयोगेन सुखलेशोऽपि नास्ति हि ॥ द्र.प्र.स. 680-681

उच्चस्थो लग्नगः स्थानमानैश्वर्यविवृद्धिदः ।
लग्नस्थमुच्चगं पश्यन्नुच्चस्थो राज्यभोगदः ॥ द्र.प्र.स. 1512-1513

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भानुराशिचान्द्रराशिविभागः रोगसूत्रं जीवसूत्रं च । द्र.प्र.स. A.763



जीवेद्रोगी जीवसूत्रे कर्मारूढौ यदैन्दवौ । द्र.प्र.स. A-762
भानौ तौ यदि चेन्मृत्युः कथञ्चिद्व्यत्ययेऽवनम् । द्र.प्र.स. A-763

[व्या.] आरूढलग्नं तद्दशमं च चान्द्रराशौ चेद्रोगी जीवति । द्वे अपि भानुराशौ चेन्मृत्युरेव । अन्यतरत् चान्द्रराशावपि चेत् कथञ्चिज्जीवेदिति प्रश्ने वदेत् ।

विविधग्रन्थोक्तमतसङ्ग्रहणम् - रहस्यवचनम् - गुरुपरम्परागतवचनम् - सम्प्रदायवचनम्

1. "शशाङ्कलग्नोपगतैरित्याचार्यश्च" अत्र शशाङ्कलग्नपदं भावपतिभावपरमिति रहस्यम् ।
द्र.प्र.स. A 531
2. अत्र लग्नारूढयोर्बलवता द्वादशसंवत्सरावधिकं प्रधानं भाविफलकथनमिति सम्प्रदायः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्र.प्र.स. A. 547

3. चतुरश्रायतः आयतचतुरश्राङ्गः शनिरित्यर्थः । शनिवद्राहुरपीति । द्र.प्र.स. A. 556

4. मेषवृषधनुरुदये भयमायुर्वा अस्ति नवेति पृच्छायां नास्तीत्येव ब्रूयात् । कन्यातुलालिषु यात्रालाभो मरणायुर्वा न वेति प्रश्ने सर्वमस्त्येवेति वदेत् । अन्येषां यथास्वं सिद्ध्यति । मिथुनकुम्भमीनेष्विष्टम् । मीने तूभयं सममिति सम्प्रदायः । द्र.प्र.स. A. 571

5. रामेशास्तु स्वस्वात्मीयमेव मांसशाकादिकं .... वदेदित्याहुः । द्र.प्र.स. A.1319

6. द्रेक्काणक्रमेण भौमयुतकेतूदये बन्धनमरणस्वर्णनाशास्त्रयः तथाग्निभयं वात्रेति केचित् । द्र.प्र.स. A. 299

7. अर्कस्थितभात् प्रश्नलग्नगतभाच्च गणना कार्येत्यन्ये केचिद्वदन्ति । दस्रभान्मुख्यमित्याचार्यवचनम् । केचित् आग्नेयरेखात्रयं हित्वा रेखाद्वयमेव विलिख्य प्रश्नेऽभिजिन्नक्षत्रं विनैव गणयन्ति । द्र.प्र.स. A. 837

8. केचिदस्मिन्योगे सति शुभदृष्टावपि उन्मादक्षयौ भवत एवेति वदन्ति । द्र.प्र.स. A. 999

9. सौम्यपदेन बुधो विवक्षित इति केचित्, गुरुरित्यपरे । द्र.प्र.स. A.1597

एवं गुरुपरम्परागतवचनैः संवलितः, विविधाचार्यमतपरिपुष्टः ग्रहराश्युक्तगुणधर्मानुगुणविविधार्थोद्भावनयोपबृंहितः स्वकीयानुभवेन साधितोऽयं प्रश्नसारसमुद्रः शोभतेतराम् ।

अधिकारिविशेषमुद्दिश्य ग्रन्थरचनाजन्यं वैशिष्ट्यम्

बालसुलभभाषया समग्रकेरळीयप्रश्नशास्त्रगतानां विविधमतानामस्मिन् प्रश्नसारसमुद्रे सङ्ग्रहेण निरूपणात्, प्रश्नमार्गस्य लघुरूपतां लभमानः, तस्मात्प्राचीनः, तन्मतज्ञानेच्छूनां महते लाभाय भवत्ययं ग्रन्थः ॥

* * *

केरलीयमतविवेचनस्य सांगत्यम्

अपौरुषेयसिद्धान्तसंहिताहोराग्रन्थवत् प्रश्नग्रन्थाः नैव श्रुतिपथमायाताः । किन्तु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पौरुषेयौ प्रामाणिकौ षट्पञ्चाशिकार्यासप्तत्याख्यौ प्राक्तनौ द्वावेव दृश्येते । तत्र योगेन 126 श्लोकाः विद्यन्ते ।

केरलीया इमौ द्वौ ग्रन्थौ प्रश्नमूलत्वेन स्वीकृत्य, संहितासु अध्यायात्मके भागे वा यत्र तत्र वोपवर्णितान् प्रश्नविषयान् सङ्कलय्य, संहितोक्तान् शकुननिमित्तादीन् संयोज्य, जातकस्कन्धोक्तान् सिद्धान्तान् प्रश्ने सञ्चार्य प्रवेश्य च, विस्तृतरूपतां प्रापयामासुः । तेनेदं शास्त्रस्वरूपतामवाप प्रश्नशास्त्रमिति ।

तदनुसारेणान्येऽपि दाक्षिणात्याः बहून् ग्रन्थान् रचयामासुः । तत्रायं केरलीय विविध-प्रश्नसम्प्रदायसङ्ग्राहकेष्वन्यतमो जम्बुनाथः । तस्मात्केरलीयमतविवेचनेनैव प्रस्तुतग्रन्थोऽपि गतार्थो भवतीति तन्मतविवेचनप्रयासं करोमि ।

केरलीयज्योतिःशास्त्रम्

भारतदेशस्य भाषाधारत्वेन विभक्ताः सर्वे प्रदेशा अपि भूसम्पत्त्या, ज्ञानसम्पत्या, कलासम्पत्त्या च पृथक् पृथक् वैशिष्ट्यमावहन्तः एतद्देशीयसंस्कृतेः परिपोषकाः भवन्तीति सर्वसम्मतोऽयं विषयः । तत्रान्यतमः केरलदेशोऽपि विशिष्य शैवागमतन्त्रायुर्वेदज्योतिः शास्त्राणां संरक्षणे वर्धने च विशिष्टं साहाय्यमाचरन् संस्कृतेः उन्नयने शङ्कराचार्यसिद्धान्तवत् विशिष्टं स्थानमावहति ।

ज्यौतिषग्रन्थाः

तत्र ज्योतिःशास्त्रमेव स्वीकुर्मः । केरले क्रिस्तोत्तरचतुर्थशतकादारभ्य लिखिताः ज्यौतिषग्रन्थाः 752 संख्याकाः लभ्यन्ते । तेषु 402 गणितग्रन्थाः तथा 350 प्रश्नजातकग्रन्थाः मातृकास्थित्या मुद्रितरूपेण वा दरीदृश्यन्ते इति के. वि. शर्मणा "A History of the Kerala School of Hindu Astronomy इति नाम्ना लिखितस्य ग्रन्थस्यामुखे वर्तमानात् वचनादवगम्यते ।

प्रश्नशास्त्रे प्रसिद्धाः ग्रन्थाः

इमे निर्दिष्टाः ग्रन्थाः केरलेषु विख्याताः सन्ति -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1) कृष्णीयम् (होराकृष्णीयम्) 2) प्रश्नलाञ्छनम् 3) प्रश्नानुष्ठानपद्धतिः
4) प्रश्नसारसङ्ग्रहः 5) प्रश्नज्ञानप्रदीपः 6) प्रश्नायनम्
7) प्रश्नसारः 8) प्रश्नामृतम् 9) प्रश्नमाला
10) प्रश्नरीतिः 11) प्रश्नलक्षणम् 12) प्रश्नमार्गः

प्रायः एषां सर्वेषां ग्रन्थानां रचयितुर्नामदेशकालादिकं स्फुटतया प्रदर्शयितुमशक्यम् ।

प्रसिद्धप्रश्नप्रक्रियाविभागः

1) अष्टमङ्गलप्रश्नः 2) अक्षरप्रश्नः 3) मुष्टिप्रश्नः 4) ताम्बूलप्रश्नः
5) स्वरप्रश्नः 6) आयप्रश्नः 7) पकितप्रश्नः 8) मूकप्रश्नः

इत्यादयः केरलेषु प्रश्नप्रकाराः दरीदृश्यन्ते ।

प्रश्नगताः गणितानीतकालविशेषाः

विशिष्य अष्टमङ्गलप्रश्ने प्राश्निकलग्नस्फुटं ग्रहस्फुटं च कृत्वा, लग्नं अरूढलग्नं वीथीं छत्रं च गणितात् संसाध्य, गणितक्रिययैव-

1) कुन्दघातम् 2) त्रिस्फुटम् 3) चतुःस्फुटम् 4) पञ्चस्फुटम् 5) प्राण-देह-मृत्यून्
6) योगिनीम् 7) राहुम् 8) गुळिकम् 9) परिधिम् 10) धूमम्
11) कालम् 12) अर्धयामम् 13) यमकण्टम् 14) कोदण्डम् 15) कालचक्रम्
16) कालहोराम् 17) शूलचक्रम् 18) मृत्युचक्रम् 19) सूर्येन्दुराहुचक्रम् 20) चन्द्रक्रियाम्
21) निर्याणशनिम् 22) निर्याणगुरुम् एतान् कालादिविशेषान् गणितादानीय, एतेषां स्थितिं अनुसृत्यैव शुभाशुभं निरूपयन्ति ।

प्रश्नविषयाः

केरलेषु 23 प्रश्नविषयाः प्रतिपादिताः, यथा-

1) आयुःप्रश्नः 2) रोगचिन्ता 3) विवाहचिन्ता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

4) सन्ततिचिन्ता 5) यात्राचिन्ता 6) शत्रुगमागमचिन्ता

7) नष्टवस्तुचिन्ता 8) नष्टजातकचिन्ता 9) चोरप्रश्नः

10) युद्धे जयपराजयचिन्ता 11) कार्यसिद्ध्यसिद्धिचिन्ता 12) प्रोषितागमचिन्ता

13) गर्भचिन्ता 14) राजप्रश्नः 15) स्वप्नचिन्ता

16) भोजनचिन्ता 17) सुतचिन्ता 18) मृगयाप्रश्नः

19) निधिप्राप्तिप्रश्नः 20) वृष्टिचिन्ता 21) कूपचिन्ता

22) देवप्रश्नः 23) न्यायस्थाने जयपराजयप्रश्नः इति ।

इष्टानिष्टफलप्राप्तिकारणचिन्ता

1) देवस्वापहरणजन्यदेवताकोपचिन्ता 2) देवपूजादिव्यतिक्रमजन्यकोपः 3) धर्मदैवकोपः 4) सर्पस्थाने मलोच्छिष्टादिदूषणजन्यसर्पकोपः 5) प्रेतबाधा 6) दृष्टिदोषः 7) पितृबाधा 8) वाग्दोषः 9) गुरुशापः 10) ब्राह्मणशापः 11) वास्तुदोषः 12) महाक्षुद्राभिचारजन्यदोषः 13) चूर्णप्रयोगः 14) शत्रुबाधा 15) यक्षीमातृगण-अट्टालक-भूत-पिशाच-ब्रह्मराक्षस-कश्मलगण-किन्नरादिदेवयोनिविशेषाणां दर्शनं आवेशश्च 16) आत्मदोषः 17) जन्मान्तरार्जितकर्म 19) ग्रहगतिः 20) गृहच्छिद्रम् 21) अरिष्टयोगः ।

एभिः कारणैः व्याधिसन्तत्यभावदारिद्र्याद्यनिष्टं भवतीति उक्त्वा अनिष्टकारणं तत्परिहारोपायश्च प्रश्नशास्त्रे सामान्यतः निरूपितो वर्तते ।

अष्टमङ्गलप्रश्नः निमित्तादिचिन्ता च

केरलीयप्रश्नशास्त्रे अष्टमङ्गलप्रश्नस्य प्रचुरप्रचारो विद्यते । तत्क्रमः ईषत् प्रकाश्यते । फलपुष्पाद्यावृतां दर्शनीयां भूमिं संशोध्य, तत्र राशिचक्रं विलिख्य, राशीन् सूर्यादिग्रहान् सम्पूज्य, दक्षिणामूर्तिं शिवं ध्यात्वा वराटिकासंस्कारं पूजां च कृत्वा इष्टदेवतां सम्प्रार्थ्य, राशिचक्रे बालादिस्थापितसुवर्णात् प्रष्टृधिष्ठितस्थानवशाद्वा आरूढलग्नं निश्चित्य, ग्रहादीन् स्फुटीकृत्य, तत्कालिकलग्नस्फुटं कृत्वा, गणितानीतकालविशेषप्रकरणोक्तान् संसाध्य, प्रष्टुः आत्मनश्च श्वासोच्छ्वास(देव)लक्षणं ज्ञात्वा तत्रत्यदीपस्थितिं, तथा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रष्टानीतफलपुष्पताम्बूलपूगीफलगतानि शुभाशुभचिह्नानि परीक्ष्य, प्रष्टुरङ्गप्रत्यङ्गस्पर्शनं, प्रश्नकालिकदेशं, कालं, तत्रत्यजनानां व्यवहारं, तत्र दृग्गोचरीभूतद्रव्याणां शुभाशुभं, तत्रत्यानां समागतानां वा जनानां वेषभूषावयोऽवस्थादिकं (सुमङ्गलीविधवादिकं), करस्थपदार्थं च गौळी-गर्दभ-सर्प-काक-गजाश्वादिशुभाशुभनिमित्तसूचकानां प्राणिनां दर्शनं, ध्वनिं, चेष्टां, नामकीर्तनमपि परीक्ष्य, प्रश्नाक्षर-स्वरादिपरीक्षां कृत्वा, बालेन बालिकया वा वराटिकाराशेः भागत्रयं कारयित्वा, तद्गतशुभाशुभफलं विचिन्त्य, फलनिरूपणोपक्रमं कुर्वन्ति दैवज्ञाः । तदर्थमाहूतानाम् अन्येषां दैवज्ञानामाक्षेपं प्रमाणवचनोपन्यासपूर्वकं परिहृत्य, प्रमाणवचनानामनुवादपूर्वकं प्रष्टुरभीष्टं सर्वं निरूप्य, अनिष्टफलकारणं स्वीयदोषो वा जन्मान्तरार्जितदोषो वा पितृमात्रादिपूर्वजार्जितदोषो वा इति प्रदर्श्य तत्परिहारोपायमपि ते सूचयन्ति ।

प्रश्नशास्त्रविस्तारः

तेषु शताधिकेषु प्रश्नग्रन्थेषु प्रश्नमार्गः मूर्धन्यं स्थानमावहति विविधमतसङ्ग्रहग्रन्थेषु । तत्र पूर्वोक्तविषयप्रतिपादकाः 2600 श्लोकाः सन्ति । तत्रासङ्गृहीताः प्रश्नशास्त्रस्य विभिन्नमताश्रिताः अथवा एकं विषयमाश्रित्य लिखिताः तावन्त एव श्लोकाः ग्रन्थान्तरेषु लभ्येरन् । एवं योगेन 5000 संख्याकाः श्लोकाः प्रश्नशास्त्रसम्बद्धं मूलविषयं प्रत्यपीपदन् ।

निर्मूलत्वशङ्का

प्रश्नशास्त्रस्य विश्वसनीयौ मूलग्रन्थौ द्वावेव दृश्यते । तत्राद्या पृथुयशसः षट्पञ्चाशिका कृतिः, द्वितीया भट्टोत्पलस्य आर्यासप्ततिः ।

उभयोर्ग्रन्थयोः 1) नष्टलाभविचारः 2) मूकप्रश्नः 3) शत्रुगमागमचिन्ता 4) प्रवासचिन्ता 5) जयपराजयचिन्ता 6) रोगमरणचिन्ता 7) चोरचिन्ता 8) सन्ततिचिन्ता 9) विवाहचिन्ता 10) गर्भिणीचिन्ता 11) वृष्टिचिन्ता इति विषयाः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

प्रतिपादिताः सन्ति । आर्यासप्तत्यां तु स्वप्नचिन्ताप्यधिकतया दृश्यते । किन्तु शत्रुचिन्तां प्रवासचिन्तां विहाय सर्वे विषयाः द्वित्रैरेव पद्यैस्तत्रोपवर्णिताः ।

ननु प्रश्नस्य पूर्वोक्तमूलग्रन्थद्वयगतश्लोकसंख्या 126 इति स्थिते केरलीयानां 5000 श्लोकात्मकस्य प्रश्नसाहित्यस्य कथं प्रामाण्यमिति चेदुच्यते ।

प्रश्नशास्त्रस्य समूलत्वसमर्थनम्

दैवज्ञवल्लभायाः कर्त्ता वराह इति पक्षे, नेदं प्रश्नशास्त्रं पृथुयशसः समुत्पन्नं न वा तत्पितुः वराहमिहिरात् । किन्तु संहिताविर्भावकाले एव परिपूर्णमिदं शास्त्रमासीदिति ज्ञायते । तस्मात्समूलमेवेदं शास्त्रम् । शतशः विषयाः केरलग्रन्थेषु समुपलभ्यमानानां विविधविचाराणां मूलान्वेषणे कृते भट्टोत्पलादिव्याख्याग्रन्थेषु सुस्फुटतयोपलभ्यन्ते । किन्तु महत्कार्यमिदम् । यस्य कस्यापि मतविशेषस्य प्रमाणवचनानुपलब्धेः कारणं संहिताग्रन्थानां कालक्रमेण नाशः इति मे मतिः ।

प्राचीनटीकायां दृष्टसंहितावचनानि

विभिन्नासु प्राचीनटीकासु प्रश्नशास्त्रप्रमापकानि गर्गवसिष्ठपराशरादिसंहितावचनानि संदृश्यन्ते । तान्यत्र स्थालीपुलाकन्यायेन समुपस्थापितानि, यथा-

1) बृहत्संहितायाः (1-11) टीकायां भट्टोत्पलः वृद्धगर्गसंहितावचनं स्मरति ।

वृद्धगर्गः-

कर्मोपभोगमानानां लेख्यप्रश्नविधिस्तथा ।
एवमाद्याः समस्ताश्च क्रिया ज्यौतिषसंश्रिताः ।। इति ।

2) बृहत्संहितायाः (50.2) टीकायां भट्टोत्पलः पराशरसंहितां स्मरति, यथा -

पराशरः -

अथ पुष्पितफलित.............. छायोपगूढे .... उत्तरपूर्वाभिमुखो वा यः पृच्छेत्तस्य प्रार्थितार्थोपपत्तिमभि निर्दिशेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3) बृहत्पाराशरहोरायाः उत्तरखण्डे प्रश्नाध्याये यथा-

मैत्रेय उवाच - भगवत्प्रश्नशास्त्रं तु सूचिकानां प्रकाशितम् । (18-1)

4) तत्रैव-

प्रश्नशास्त्रं .... कृते युगे तु धर्मस्य पूर्णत्वात्तपसान्विताः ।

सर्वे जानन्ति .... बृ.पा.हो.उ. (18-2)

5) बृहज्जातकस्य (1.4) नौका (दशाध्यायी) टीकायाम्-

जातकफललक्षणेनैव प्रश्नफलं निरूपणीयम् । तथा च वासिष्ठे-

बुद्ध्वा शास्त्रं यथान्यायं बलाबलविधानतः ।

यथोक्तं जातके सर्वं तद्वत्प्रश्ने विचिन्तयेत् ।।

6) बृहज्जातकस्य (5.1) नौका (दशाध्यायी) टीकायां उक्तं च बृहस्पतिना विवाहप्रश्ने-

यदि नीचारिगो लग्नमारूढं वा न पश्यति ।

अर्कः स्त्रियः पिता नास्ति मातेन्दुश्चेत्तथाविधः ।।

इत्येवमादीनि वृद्धगर्ग-पराशर-बृहत्पाराशरहोरा-वासिष्ठ-बृहस्पत्युक्तानि प्रमाणवचनानि प्रश्नशास्त्रस्य संहिताकाल एव परिपूर्णतां प्राचीनतां च दृढीकुर्वन्ति ।

केरलप्रश्नपद्धतेः संहितादिमूलत्वसमर्थनम्

केरलीयेषु प्रश्नशास्त्रविधिः	संहितादिप्रमाणवचनम्
1) अष्टमङ्गलप्रश्ने राशिचक्रादिपूजाविधिः	1) रम्यतरे भूभागे सम्पूज्य ग्रहगणं सनक्षत्रम् । पश्चात्प्रश्नविधानं कुर्याद्येनाप्नुयात्सिद्धिम् ।। आ.स. 3 प्रष्टा मणिकनकयुतैः फलकुसुमैः राशिचक्रं समभ्यर्च्य । पृच्छेत्.......... आ. स. (4)
2) प्रश्नारम्भे विधिनिमित्त	प्रश्नेऽपि निमित्ताद्यवलोकनप्रमाणम् - तथा च पराशरः-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

शकुनाङ्गचेष्टादिपरीक्षाविधिः — इह खलु चराचराणां भूतानां कालोऽन्तरात्मा सर्वदर्शी शुभाशुभैर्यः फलसूचकः स विशेषेण प्राणीनां स्वपराङ्गेषु स्पर्शव्याहारेङ्गितचेष्टादिभिर्निमित्तैः फलमभिदर्शयति । तत्प्रयतो दैवज्ञोऽनुपहतमतिरवधार्य स्वशास्त्रार्थमनुसृत्य यशोधर्मानुग्रहार्थमर्थिनां शुभाशुभानामर्थानां भावाभावमभिनिर्दिशेत् ।

द्र.बृ.जा.(अङ्गविद्या) (50-1) भ.उटी.

2) पराशरः-

तत्र देशे दिशः कालं व्याहारं द्रव्यदर्शनम् ।
अङ्गप्रत्यङ्गसंस्पर्शं समीक्ष्य फलमादिशेत् ।।

बृ.सं.(50-1) भ.उ.टी.

3) छत्र-वीथी-आरूढकल्पना विधिः — छत्त्रारूढवीथीप्रमाणम्-

1) मेषवीथी......... आरूढाद्वीथिभं यावत्तावच्छत्त्रं तु लग्नतः

बृ.पा.हो.(उत्तरखण्डे प्रश्नाध्यायः) 18-21

4) 50 विनाडिकाक्रमेण राशौ राहोः कालस्य च (मृत्योः) सञ्चारविधिः — राहुकालयोः प्रमाणम्-

1) मेषाद्युत्क्रमतो राहुर्वृषात्कालः क्रमाच्चरेत् ।
राशौ राशौ तु पञ्चाशद्भोगकालो विनाडिकाः ।।

बृ.पा.हो.(प्रश्नाध्यायः) 18-27.28

5) विविधव्याधिं प्रति यक्ष-भूतप्रेतपिशाचादीनां आवेशस्य (शरीरे प्रवेशस्य) कारणत्वेनोक्तम् । — आवेशस्य प्रमाणवचनम्-

1) कुहकावेशपिहित........ न स दैववित् । बृ.सं.1.31 2.15

कुहकेनेन्द्रजालेन, प्रसेनादिकेनावेशेन देवतादिदेहप्रवेशेन पिहितः।

बृ.सं.1.31 भ.उ.व्याख्या, 2.15

6) केरलीयाक्षरप्रश्नमूलम् । — 1) काद्यास्तु वर्गाः कुजशुक्रसौम्यजीवार्कजानां क्रमशः प्रदिष्टाः ।
वर्णाष्टकं यादि च शीतरश्मेः रवेरकारात्क्रमशः स्वराः स्युः ।।

बृ.सं. 95 अ. श्लो.15

1) एवं केरलीयैः गर्गपराशरवराहमिहिरादिभिरुपदिष्टं प्रश्नचिन्ताविधिमनुसृत्य
2) क्वचित् तदनुमतक्रमेण विषयान्तरगतन्यायं विषयान्तरे सञ्चार्य
3) क्वचित् तन्निरूपितक्रमेण जातकफलं प्रश्नेऽपि संयोज्य
4) क्वचित् ग्रहराश्युक्तप्रकृतिगुणधर्मादीन् व्याधिविशेषचिन्तायां सञ्चार्य

केरलीयज्योतिःशास्त्रमेवं पूर्वोक्तं नियममवलम्ब्य वृद्धिं प्राप्तमिति प्रतीयते, यथा-

1) प्रथमनियमस्योदाहरणं पूर्वोक्तं संहितावचनं भवति ।

2-1) द्वितीयस्योदाहरणं केरलीयभोजनप्रश्नः । तत्र ग्रहस्थितिविशेषमाश्रित्य विविधशाकविभिन्नप्राणिमांस चिन्ता क्रियते । तन्मूलं तु बृहत्संहितायाः (2-2) अङ्गविद्यप्रकरणोक्तं प्रष्टुः अवयवविशेषस्पर्शनं चेष्टामनुसृत्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रियमाणा विविधान्नमांसविशेषचिन्ता अथवा बृहत्संहितायाः 50-35 श्लोकस्य व्याख्यायां भट्टोत्पलोद्धृतं पराशरवचनम् । तथा च पराशरः-

''अथ स्निग्धं दृढमभ्यन्तराङ्गं स्पृष्ट्वोद्गिरन् पृच्छेत् भुक्तमन्नं विद्यात् । तत्र ललाटस्पर्शो शूकानां का शाल्योदनम् ।..... हिक्केत् कषायम् । निष्ठीवेत्तिक्तम् । .... पटिताच्छिन्नभिन्नानां स्पर्शने श्रवणे गोधामत्स्यमांसम् ।।'' इति । बृ.सं.50.35, भ.3. व्या.

3) तृतीयोक्तनियमस्योदाहरणं सन्ततिविवाहसुरतप्रश्नादौ प्रश्नलग्नात् पञ्चमसप्तमभावमनुसृत्य जातकोक्त नियमान् अनुसृत्य क्रियमाणा चिन्ता ।

4) चतुर्थनियमस्योदाहरणं केरलेषु ज्यौतिषायुर्वेदयोः सहैव अध्ययनपरिपाटी आसीत् । एवं ग्रहराश्युक्त-प्रकृतिगुणधर्मादीन् ग्रहाणां त्रिदोष (वातपित्तकफ)विशेषसम्बन्धं च विचिन्त्य, आयुर्वेदोक्तं त्रिदोषवैषम्येण जायमानान् विविधव्याधींश्च विचिन्त्य, ग्रहगतस्थानविशेषं परस्परग्रहगतदृष्ट्यादिसम्बन्धविशेषमपि सुविचिन्त्य रोगाध्याये समस्तव्याधयः चिन्तिता भवेयुः ।

एवं विविधसंहितागतानि प्रश्नसम्बन्धिवचनानि सङ्कलय्य शकुननिमित्ताङ्गचेष्टाफलं संयोज्य, जातकोक्तफलमपि आयोज्य, शास्त्रीयप्रमाणमवलम्ब्यैव, सूत्ररूपस्य मूलवचनस्य स्वप्रतिभया विश्लेषणं कृत्वैव केरलीयैः ज्योतिःशास्त्रं प्रश्नशास्त्रं च प्रवर्धितम् । एवं निर्मूलत्वशङ्का अपाकृता, अर्वाचीनत्वशङ्कापि दूरीकृता ।

केरलीयप्रश्नचिन्तायाः अनुमतिप्रमाणानि

तथा च वासिष्ठे-

जन्मलग्नं समासाद्य यद्यत्प्रोक्तन्तु जातके ।
तत्सर्वं प्रश्नलग्नेन प्रश्नकालाद्वदेद्बुधः ।। बृ.पा.हो. उत्तरखण्डे (18.22)

बुद्ध्वा शास्त्रं तथा न्यायं बलाबलविधानतः ।
यथोक्तं जातके सर्वं तद्वत्प्रश्ने विचिन्तयेत् ।।बृ.जा. (1.4) दशाध्यायीटीका ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

नवीनसंस्करणे स्वीकृताः मातृकाः

मातृकापरिचयः

अस्य प्रश्नसारसमुद्रस्य तिस्रः मातृकाः तञ्जावूरुहस्तलिखितपुस्तकभाण्डागारे सरस्वतीमहल् नाम्ना प्रसिद्धे एव समुपलभ्यन्ते । नान्यत्र अस्य मातृका दृश्यन्त इति मद्रपुरीस्थानि मुद्रणाय सज्जीकृतानि NCC University of Madras पत्राण्यवलोक्य निर्धारितम् ।

तञ्जावूरुमातृकालये तिसृणां मातृकाणां साङ्केतिकाः संख्याः ।

	B. 11012	B. 11013	9696. B
मत्कृतसङ्केतः	T	T1	T2

T मातृकाः

प्रश्नसारसमुद्रः

प्राप्तिस्थानम्	सरस्वतीमहल् मातृकालयः, तञ्जावूरु
मातृकासङ्केतः	B. 11012
ग्रन्थपत्रम्	ताडपत्रम्
लिपिः	तेलुगु
पत्रसङ्ख्या	64 (Pages 128)
पत्रपरिमाणम्	$16^{7}/_{10}$ x $1^{1}/_{2}$ inches
पुटे पङ्क्तिः	6 अथवा 7
ग्रन्थसङ्ख्या	1500
ग्रन्थकर्त्ता	जम्बुनाथः,
	पूर्णः, अमुद्रितश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आरम्भः

शुभमस्तु । श्रीरामचन्द्राय नमः ।

अस्तोकस्तनविन्यस्त ....

समाप्तिः ।

इति श्री जम्बुनाथविरचिते प्रश्नसारसमुद्रे षष्ठस्तरङ्गः ।

T_1 मातृकाः

प्रश्नसारसमुद्रः

प्राप्तिस्थानम्	सरस्वतीमहल् मातृकालयः, तञ्जावूरु
मातृकासङ्केतः	B. 11013
ग्रन्थपत्रम्	ताडपत्रम्
लिपिः	तेलुगु
पत्रसङ्ख्या	114 (पुटानि 228)
पृष्ठे पङ्क्तिः	4
ग्रन्थसङ्ख्या	1500
ग्रन्थकर्त्ता	जम्बुनाथः,
	पूर्णः अमुद्रितश्च ।

आरम्भः

शुभमस्तु । अविघ्नमस्तु । श्रीमद्गुरुभ्यो नमः ।
अस्तोकस्तनविन्यस्त निस्तुलस्तुत्यगोस्तनम् ।
हस्तन्यस्तशुकं वस्तु धस्तां हस्तोममस्तु नः ॥

वाधूलकुलपद्मार्को जम्बुनाथस्सतां मुदे ।
प्रश्नार्णवं रचयति प्रश्नशास्त्रामृताकरम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

तत्र प्रश्नकाले प्रष्टृदृष्टलक्षणानि वाच्यानीत्याह ।

राहुश्चार्की पृच्छकाधिष्ठितर्क्षे यद्वा तस्मात्पञ्चमे वाष्टमे वा ।
चण्डालानां पङ्क्तिरग्रे प्रदृष्टा शोध्या दृष्टात्र चेद्भूमिजज्ञौ ।।

समाप्तिः

इति जम्बुनाथविरचिते प्रश्नसारसमुद्रे षष्ठस्तरङ्गः ।

At the beginning of the colophon is seen.

"प्रमादी च संवत्सरं पङ्गुनिमासं इरवदातीयदि
मोदलिय ज्योस्यग्रन्थं.... (प्रश्नसार)समुद्रं आरम्भं लेख ।

At the end of the colophon is seen

आनन्दनामसंवत्सरं ज्येष्ठशुद्ध 6 भौमवारं नगिरि लेखिरि कोत्त शेषभट्लु व्रासिन प्रश्नसारसमुद्रम् ।

आ 114, पै तेलुगुलिपि (पू.)

T_2 मातृका

प्रश्नसारसमुद्रः

प्राप्तिस्थानम्	सरस्वतीमहल् मातृकालयः, तञ्जावूरु
मातृकासङ्केतसङ्ख्या	9696 B
ग्रन्थपत्रम्	कागदपत्रम्
लिपिः	देवनागरी
पत्रसङ्ख्या	285
पृष्ठे पङ्क्तिः	16
ग्रन्थसङ्ख्या	1500
ग्रन्थकर्त्ता	जम्बुनाथः, पूर्णः अमुद्रितश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आरम्भः

(ज्यौतिषम्)

11012

।। प्रश्नार्णवः ।।

प्रश्नसारसमुद्रम्

शुभमस्तु । श्रीरामचन्द्राय नमः ।

अस्तोकस्तनविन्यस्तनिस्तुलस्तुल्यगोस्तनम् ।

हस्तन्यस्तशुकं वस्तु धास्तांसा(ध्वस्तांहः)स्तोममस्तु नः ।।

वाधूलकुलपद्मार्को जम्बुनाथः सतां मुदे ।

प्रश्नार्णवं रचयति प्रश्नशास्त्रामृताकरम् ।।

स्पष्टौ तत्र प्रश्नकाले प्रष्टु(ष्टुः) विस्मापनार्थमागमनकाले प्रष्टृदृष्टलक्षणानि वाच्यानीत्याह-

किंः राहुश्चार्किः पृच्छकाधिष्ठितर्क्षे
यद्वा तस्मात्पञ्चमेवाष्टमे वा ।
चण्डालानां पङ्क्तिरग्रे प्रदृष्टा कायहृया शूद्राह
ष्टा त्र चेत् भूमिजज्ञौ लग्नसुताष्टम
स्थौ गुरुशुक्रौ द्विजातिभिर्योगः ।

समाप्तिः

इति जम्बुनाथविरचिते प्रश्नसारसमुद्रे षष्ठस्तरङ्गः ।

At the end of the colophon is seen

श्रीः

यथादर्शं प्रत्यादर्शीकृतम्, — Compared by

एन्. रङ्गनाथशास्त्री — आर्. सीतारामन्

24-12-1953

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

मातृकात्रयस्यान्तरिकस्वरूपम्

T मातृकायाः स्वरूपम्

1) T मातृकायां 51 तमपत्रं नष्टम् । 2) श्लोकस्य पादभागस्य वार्धभागस्य वा क्वचित् दर्शनेन ग्रन्थपात इत्येव ऊह्यते । 3) क्वचिन्मूलश्लोकस्य व्याख्या लिखिता, न तु मूलश्लोकः । 4) सामान्यतः तत्रतत्र स्थानेषु व्याद्यक्षरलेखनस्थानमपि पङ्क्तौ रिक्तं दृश्यते । 5) क्वचिद् ग्रन्थान्तरादुद्धृतेषु द्वित्रादिश्लोकेषु श्लोकमध्यगतानि कानिचन पदानि अन्तिमपदानि च मिलितानि प्रायेण एकश्लोकात्मकः भाग एव ग्रन्थपातादुपलभ्यन्ते । 6) पत्रभङ्गाद्द्वितीयपत्रस्यार्धभागः नष्टः । 7) अन्यत्र भग्नपत्रे द्वित्राण्येवाक्षराणि नष्टानि । क्वचिद्द्विवारं लिखितं दृश्यते । एकत्र पुटत्रयभागस्य पुनः लेखनं दृश्यते । 8) अक्षरस्याधस्ताद् बिन्दौ कृते तदक्षरं निष्कासनीयमित्यर्थो भवति । 9) लेखनकाले परित्यक्तवर्णः 'T' चिह्नेन पङ्क्तेरधस्ताल्लिखितो दृश्यते । क्वचित्पङ्क्तेरुपर्यपि ।

T_1 मातृकायाः स्वरूपम्

1) T मातृकापत्रे नष्टस्य द्वितीयपत्रार्धस्यांशः अत्र लभ्यते । 2) क्वचित् T भग्नपत्रभागे नष्टान्यक्षराणि लभ्यन्ते क्वचिन्न । प्रतिलिपिकरणात्पूर्वमेव सः भागः खण्डितो भवेत् । 3) एकाक्षरादारभ्य सप्तत्यक्षरात्मकस्य ग्रन्थस्य पातः अत्र दृश्यते । 4) प्रायः उभयत्र समानवर्णं वा पदं वा दृष्ट्वा अग्रिमवर्णाद्वा पदाद्वा लेखनमेव ग्रन्थपातस्य कारणं दृश्यते । 5) यत्र मातृकालेखकेन पङ्क्तेः अधस्तात् कृतशोधनस्थले सूक्ष्माक्षरलेखनादत्राशुद्धिरेव कृता दृश्यते । 6) T मातृकायामेकत्र पङ्क्तेरुपरि शोधिताक्षरलेखनं कृतं चेत् तदुपरितनपङ्क्तौ योजनकृताशुद्धिरपि दृश्यते । 7) T मातृकायामस्मिन् पत्रे भावविचारः क्रियते इति बोधनार्थं पत्रसंख्यायाः अधस्ताल्लिखितं 'भाव' इति पदं मातृकायां योजितवान् । T मातृकागतवर्णभ्रमात् कृताशुद्धिरपि दृश्यते । अन्ये T मातृकागताः सर्वे दोषाः अत्रापि समानाः दृश्यन्ते । T मातृकाया यथावत् प्रतिलिपिः कृता दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

T2 मातृकायाः स्वरूपम्

1) बहुषु स्थलेषु स्वबुद्ध्या संशोध्य लिखति । 2) कुत्रचिदशुद्धपदस्य संशोधनं कंसमध्ये लिखित्वा सूचयति । 3) कुत्रचित् अज्ञानकृतशोधनमपि दृष्टिपथमायाति । 4) प्रतिलिपिकारेण आरम्भे B 11012 इति ग्रन्थसंख्यालेखनात्, इयं मत्सङ्केतितायाः T मातृकायाः प्रतिलिपिरिति सिद्ध्यति । प्रतिपुटं द्वित्राण्यक्षराणि अशुद्धानि निष्कासितानि दृश्यन्ते । T मातृकागतवर्णभ्रमात् कृताशुद्धिरपि दृश्यते । अन्यत्सर्वं T मातृकायाः यथावत् प्रतिलिपिः कृता दृश्यते ।

मातृकात्रयेऽपि समानस्थले दृश्यमानाः समाना अशुद्धयः परस्परलिपिप्रतिलिपिसम्बन्धं दृढीकुर्वन्ति, यथा-

मातृकात्रयगताः समानाः अशुद्धयः

पृष्ठसंख्या	T	T1	T2	शुद्धपाठः
A 28	नवांशाधिपराः	नवांशाधिपराः	नवांशाधिपराः	नवांशाधिपपराः
श्लो. 15 पृ.3	मेषनृपतिनेनेश	मेषनृपतिनेनेश	मेषनृपतिनेनेश	मेषे नृपतिसेनेश
श्लो. 41 पृ.97	सुहृदो दर्श.... देशकस्य वा	सुहृदो दर्श..... देशकस्य वा	सुहृदो दर्श... देशकस्य वा	सुहृदो दृष्टदर्शनं देशकस्य वा
श्लो. 13	°पातज°	°पातज°	°पातज°	°पादज°

मातृकालेखनकालः

T2 मातृकासमाप्तौ '24-12-1953तमे आङ्ग्ले दिने समाप्तिमगात्' इति लेखनेन मातृकासमाप्तिदिनं सुस्पष्टमेव भवति ।

T1 मातृकायां लिखितारम्भान्तिमदिनवचनात् मातृकालेखनकालः निर्धार्यते ।

अत्रारम्भवचने तिथिवारयोरलेखनात् कालनिर्धारणं दुष्करं तथापि ग्रन्थान्तवचनात् लेखनसमाप्तिदिनं निश्चित्य तदनुसारेण आरम्भदिनं निर्णीयते ।

ग्रन्थान्तवचनात् आनन्दसंवत्सरे ज्येष्ठशुद्धषष्ठ्यां भौमवासर इत्यस्यान्वेषणं ।n-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

dian Ephemeris L. D. Swami Kannan Pillai लिखिते ग्रन्थे अकारि । क्रिस्तशकानुसारेण विचारे तद्दिनं 3-6-1794 भवति ।

तदनुसारेण तत्पूर्वतनं प्रमादीचसंवत्सरस्य पौषमासस्य विंशं दिनम् 30-3-1794 ।

इत्थं T1 मातृकायाः लेखनारम्भदिनम् 30-3-1794,
लेखनसमाप्तिदिनम् 3-6-1794.

मूलमातृकानिर्णयः

T2 मातृकालेखनारम्भे T मातृकायाः एव 11012 सङ्केतसंख्यायाः निर्देशात्, T2 मातृका T मातृकायाः प्रतिलिपिरिति निश्चितमेव ।

T1, T2 मातृकाद्वयेऽपि प्रतिलिपिलेखनकालनिर्देशात् T1 पूर्वं लिखिता, परं T2 मातृकेत्यपि नूनम् ।

T मातृकायां लेखनकालादर्शनात् ग्रन्थान्तर्गतैः विभिन्नैः कारणैः T1 मातृकापि T मातृकायाः प्रतिलिपिरित्येव साधयामश्चेत् T मातृका मूलमातृकेति सिद्ध्यति ।

T मूलमातृकेति साधकप्रमाणानि

T मूलमातृका इति निरूपयितुमधो निर्दिष्टानि प्रमाणानि, यथा -

1) द्वयोः मातृकयोः समानस्थानगतया समानाशुद्ध्या, पङ्क्तौ समानस्थले द्व्याद्यक्षरलेखनस्थानपरित्यागेन च लिपिप्रतिलिपिसम्बन्धनिर्धारणम् ।

2) लिपि प्रतिलिपिसम्बन्धस्य त्रैविध्यसम्भावना ।

3) द्विविधसम्भावनानिरसनात् T1 मातृका T मातृकायाः प्रतिलिपिरिति निर्धारणम् ।

अतः T मूलमातृकेति निर्णयो भवति ।

T, T1 लिपिप्रतिलिपिसम्बन्धनिर्धारणम्

इदानीं T मातृकायां लेखनकालादर्शनात् T, T1 मातृकयोः प्राचीनतरा(मूलम्)का

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति सन्देह उदेति । तत्साधकबाह्यकारणादर्शनात् मातृकाभ्यन्तरवचनगतैः एभिः कारणैः लिपिप्रतिलिपिसम्बन्धनिर्धारणं क्रियते, यथा -

1) T, T1 मातृकयोः सदृशपदगतसमानदोषाः ।

2) द्वयोः मातृकयोः पुटत्रयगतवचनानां पुनर्लेखनेन साम्यम् ।

3) द्वयोः मातृकयोः समानस्थले द्वित्राद्यक्षरलेखनस्थानस्य परित्यागः ।

1) T, T1 मातृकयोः अशुद्धः पाठः शुद्धपाठः

	अशुद्धः पाठः	शुद्धपाठः
A 317	विरणा	रविणा
A 325	कर्युः	कुर्युः
299	पायुते	पापयुते
274	तत्रार्के भारात् भार्याहात्	तत्रार्के राजभार्यायाः

2) T मातृकायाः 38^{B} पृष्ठे द्वितीयपङ्क्तिमारभ्य 40^{A} पृष्ठे सप्तमपङ्क्तिं यावत् लिखितस्यैव पुनः अग्रे लेखनं कृतम् । T1 मातृकायामपि मातृकावत् द्विवारं लेखनं कृतम् ।

3) T, T1 अक्षरलेखनस्थानपरित्यागः । T, T1 मातृकयोः वर्णस्य वर्णानां वा लेखनस्थानपरित्यागः समानस्थले दृश्यते, यथा-

	T, T1 स्थानपरित्यागः	शोधितरूपम्
1775	सामि (....)युँते दृष्टे	स्वामि(मित्रे)युँते दृष्टे
1288	कन्दं (.....)समुद्रयुक्	कन्दं(मूलं)समुद्रयुक्
771	चिरकाला (....)	चिरकालान्मृतिर्भवेत्

एभिः त्रिभिः कारणैः T, T1 मातृकयोः लिपिप्रतिलिपिसम्बन्धः सुदृढो भवति ।

लिपिप्रतिलिपिसम्बन्धस्य त्रैविध्यसम्भावना

तस्मिन्सम्बन्धेऽपि त्रैविध्यसम्भावना भवितुमर्हति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

1) द्वयोरपि मूलमातृका काप्यज्ञाता अन्या इति ।

2) द्वयोः T1 मातृका T मातृकायां मूलमिति ।

3. द्वयोः T मातृका T1 मातृकाया मूलमिति ।



इत्यनेन द्वयोर्मातृकयोर्मूलभूता काचिदन्यैव मातृकेति ज्ञेयम् ।

द्वयोरपि अन्या काचित् मूलमातृका x इति पक्षस्य निरसनम् ।

द्वयोरपि काप्यन्या (x) मूलमातृकेति सम्भावनाया निरासः अधोनिर्दिष्टेन कारणेन साध्यते ।

1) T मातृकायां नष्टस्य एकपञ्चाशत्तमपत्रगतस्य भागस्य T1 मातृकायामप्यदर्शनम् ।

अस्मात्तर्क्यते द्वयोर्मूलमातृका x इति काप्यभविष्यत् तर्ह्यवश्यं T मातृकायां नष्टपत्रांशः T1 मातृकायाम् उपलभ्येत । अतः पूर्वोक्तं कारणं T, T1 मातृकयोः x इति मूलमातृकाकल्पनां निरस्यति ।

T मूलमातृकेति निर्धारणम्

T1 मातृकागतस्य ग्रन्थपातांशस्य T मातृकायां दर्शनात् T मातृकायाः प्रतिलिपिः T1 मातृका इति निश्चेतुं शक्यते । अधस्तालिखितानि कारणानि अन्यतरमूलमातृकासन्देहमपास्य T मातृकायाः प्रतिलिपिरेव T1 मातृकेति साधकानि भवेयुः ।

		T मातृकायाः शुद्धपाठः	T1 मातृकायाः ग्रन्थपातः
1)	A3-4	तत्र प्रश्नकाले प्रष्टुर्विस्मापनार्थमागमन	तत्र प्रश्नकाले प्रष्टदृष्टलक्षणानि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	काले प्रष्टृदृष्टलक्षणानि वाच्यानीत्याह ।	वाच्यानीत्याह ।
2) 524-527	तद्भावाप्तित्वपुष्टित्वशोभनत्व(नि.... आलस्यमशोभन)त्वं वा वदेदित्यर्थः ।	T मातृकायां कंसमध्यगतस्य 75 अक्षरात्मकग्रन्थभागस्य T1 मातृकायां लोपः ।
3) A 282	श्रीश्च विगतदृष्टिश्च यस्याः सा, पापा भूतं फलं प्राहुः शुभं भाविफलं तथा ।	श्रीश्च यस्याः सा पापा भूतं फलं तथा ।

अतः T1 मातृकायाः ग्रन्थपातांशस्य T मातृकायां दर्शनात् T मातृका, T1 मातृकायाः प्रतिलिपिर्न भवितुमर्हति ।

इत्थं T मातृकायाः एकपञ्चाशत्तमनष्टपत्रगतभागस्य T1 मातृकायामप्यदर्शनेन एकं मूलम् अपरा तत्प्रतिलिपिरिति ज्ञानं सुष्ठु जायते ।

एवं T, T1, T2 मातृकासम्बन्धविचारात् T मातृका मूलमातृका इति सिद्धम् । तस्याः T मातृकायाः प्रतिलिपिरूपेण T1, T2 मातृकाद्वयं सिध्यति ।

इदं तावत् अधोनिर्दिष्टे रेखाचित्रे द्रष्टव्यम् ।



प्रकारान्तरेण T मूलमातृकेति समर्थनम्

पुनः T मूलमातृकेति दृढीकर्तुमन्यानि कारणानि समुपस्थाप्यन्ते, यथा -

1. कानिचन T मातृकायाः कृमिकीटादिभक्षितभग्नपत्रभागगतानि नष्टाक्षराणि T1 मातृकायामपि नोपलभ्यन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2. T मातृकायाः लेखनकाले अनवधानतया परित्यक्तमक्षरं पदं वा लेखकः पङ्क्तेरधस्तात् सूक्ष्माक्षरैः यत्रास्फुटतया लिखति तत्रैव T1 मातृकायामपि अशुद्धिः दृश्यते ।

3. एकत्र T मातृकाप्रतिलिपिकारोऽशुद्धाक्षरस्याधस्तात् बिन्दुरूपं निष्कासनचिह्नं कृत्वा शुद्धमक्षरं पङ्क्तेरधस्ताल्लेखनरूपं स्वकीयं सम्प्रदायं विहाय पङ्क्तेरुपरि समालिखत् ।

T1 मातृकालेखकः अधस्तनपङ्क्तौ योजनीयं तद्वर्णं उपरितनपङ्क्तौ स्वेच्छया योजितवान्, यथा-

T मातृका 16B	.... चिन्त्यारोहादिषु......	T1 चिन्त्यायारोहादिषु
	मूर्तिवयः स्वशरीर....	....मूर्तिवर्दास्वशरीर....

अत्र T मातृकालेखकस्याभिप्रायः 'मूर्तिवर्दा' इत्यत्र 'र्दा' इत्यक्षरं निष्कास्य तत्स्थाने 'यः' इत्यक्षरं संयोज्य 'मूर्तिवयः' इति कर्त्तव्यमिति ।

T1 मातृकालेखकः 'र्दा' इत्यक्षरस्य निष्कासनमकृत्वा पङ्क्तिद्वयमध्यगतस्य 'यः' वर्णस्य उपरितनपङ्क्तौ 'या' इति कृत्वा योजनेन दोषत्रयं कृतवान् ।

4. T मातृकायाः 16B पृष्ठे भावविचारः विद्यते इति प्रकाशनार्थं पृष्ठसङ्ख्यालेखनस्थाने 'भावं' इति लिखितम् । परं T1 मातृकालेखकः 'भावं' इति पदं मातृकामध्ये संयोज्य लिखितवान् ।

एभिः पूर्वोक्तैः चतुर्भिः कारणैः T मातृकायाः प्रतिलिपिः T1 मातृका इति निर्धार्यते ।

* * *

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेलुगुमातृकालेखनप्रकारः

विविधलिपिगतासु सर्वास्वपि मातृकासु लिपिसाम्याद्वर्णभ्रान्तिः सहजतयानुभूयत इति मातृकावाचकानामनुभवसिद्धोऽयं विषयः ।.तद्वत् प्रकृतमातृकायामुपलभ्यमानासु तेलुगुलिपिष्वपि बहुसाम्यादक्षराणि दुरवगमानि भवन्ति, यथा- न, स, प, व - वर्णेषु, को, ण, रो वर्णेषु, थ, ध वर्णयोः, नि, सि, पि, वि - वर्णेषु, नु, मु वर्णयोश्च बहुसाम्यदर्शनात्, T मातृकायाः T1, T2 लिपिकारयोर्द्वयोरपि बहुत्र वर्णभ्रान्तिः समजनि । तत्क्लेशो मयाप्यनुभूतः । ईदृग्विधाः प्रमादाः लेखकसहजत्वेन स्वीकर्तुं शक्यन्ते । किन्तु गृ-स्थाने, ग्र-इति, तद्विपरिणामेन वा, क्र-स्थाने क्क इति बहुत्र कृतो वर्णव्यत्यासो दृश्यते । तथैव व्यञ्जनोपरिगतयोः इ ई वर्णयोः इ इति ह्रस्व इकारत्वेनैव सर्वत्र लेखनं, व्यञ्जनवर्णस्योपरि सर्वदा ह्रस्वस्य एकारस्य लेखनपद्धतिश्च तेलुगुमातृकासु विशिष्टा दृश्यते । तेलुगुलिप्यां व्यञ्जनवर्णोपरि वृश्चिकपुच्छवत् लेखनेनैव ईकारस्य, दीर्घस्य एकारस्य च सिद्धिर्भवति । तथा लेखने ताडपत्रपृष्ठेषु पङ्क्तीनां न्यूनता भवतीति तेलुगुलिपिलेखकाः दीर्घस्वरं न लिखन्तीति कारणमकथयन् तन्मातृकाग्रन्थालयस्थाः । इमे मातृकागतदोषाः त्रिविधाः दृश्यन्ते यथा-

1) अक्षरसाम्यजन्या मातृकायामशुद्धिः ।

2) लेखकस्य देशीयोच्चारणजन्या मातृकायामशुद्धिः ।

3) लेखकप्रमादजन्या मातृकायामशुद्धिः ।

अक्षरसाम्यजन्यलेखनाशुद्धिः यथा -

'पि' स्थाने 'वि', पा स्थाने वा लेखनम् ।

		अशुद्धम्	शुद्धम्
215	T; T1	विवासुः	पिपासुः
A 371	T,	विता	पिता
1103		अस्तनवमावत्येषु	अस्तनवमापत्येषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

A 763	T	वावस्थितिः	पापस्थितिः
897	T	वित्तस्य च श्लेष्मणोः	पित्तस्य च श्लेष्मणोः
A 271	T	वृत्ययार्थम्	प्रत्ययार्थम्

सन्दिग्धपाठो यथा-

142		वा विधवान्विताः ।	वापि धवान्विताः ।
104	T; T1	वनिता परा ।	T2 वनिता वरा ।
115	T	वाणी वानुगुणान्विता ।	वाणी वा सुगुणान्विता ।

न-स्थाने स; स स्थाने न; सु-स्थाने नु; नु-स्थाने सु लेखनम्, यथा -

		अशुद्धम्	शुद्धम्
21		मांस	मान
15	T, T1, T2	नेनेश	सेनेश
124	T2	नुदूर	सुदूर

वि स्थाने नि, ना स्थाने वा, वा स्थाने ना लेखनम्, यथा -

		अशुद्धम्	शुद्धम्
128	T	निरोधिता	T1 विरोधिता
84	T	निरक्ता	विरक्ता
82	T1	वापितशूद्र	T नापितशूद्र
102	T1	पक्षिनाशो	T पक्षिवाशो
186	T	गान	T2 गाव

(अत्र शुद्धपाठे सन्देहः)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

2) देशीयोच्चारणजन्यलेखनाशुद्धिः

1) द स्थाने त, ति स्थाने दि लेखनम् । अत्र देशीयोच्चारणं कारणं भवेत्, यथा-

		अशुद्धम्	शुद्धम्
13	T, T1, T2	पातज	पादज
111	T, T1	योषिता व्रजेत्	योषिदा व्रजेत्
986	T	मरुद्गताः	मरुद्गदाः
988	T	कुष्ठतः	कुष्ठदः
957	T	तन्त्रश्रमान्	तन्द्रीश्रमान्
A 28	T1	भविष्यदिति	भविष्यतीति
192	T1	ददाविदे (T तथाविदे)	तथाविधे

2) था स्थाने दा लेखनम् ।

		अशुद्धम्	शुद्धम्
192	T,	ददाविदे	तथाविधे
215	T, T1	कदा	कथा

3) थ स्थाने ध लेखनम् ।

		अशुद्धम्	शुद्धम्
226	T, T1,	अनर्धकलहौ	अनर्थकलहौ
A 225	T, T1,	इत्यर्धः	इत्यर्थः
203	T, T1,	बन्धुःकधे	बन्धुकथे
951	T,	प्राणोर्ध	प्राणोत्थ

4) र्ण स्थाने र्न लेखनम् ।

		अशुद्धम्	शुद्धम्
985	T	कर्न	कर्ण
220	T, T1,	दिग्वर्न	दिग्वर्ण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5) प्र स्थाने पृ लेखनम् ।

		अशुद्धम्	शुद्धम्
A 282		पृष्टा	प्रष्टा

6) क्र स्थाने क्ल लेखनम् ।

		अशुद्धम्	शुद्धम्
125, 138		शुक्ले	शुक्रे

7) ग्र स्थाने गृ, गृ स्थाने ग्र लेखनम् ।

		अशुद्धम्	शुद्धम्
1866		गृह	ग्रह
1817		ग्रह	गृह

8) ट स्थाने ड लेखनम् ।

		अशुद्धम्	शुद्धम्
A 372	T	कुडुम्बं	कुटुम्बं
250	T2,	कण्डकव्यथा	T कण्टकव्यथा

9) फा स्थाने भा लेखनम् ।

		अशुद्धम्	शुद्धम्
956	T	शोभामयं	शोफामयं
318		अनभा	अनफा

10) व्या स्थाने न्या लेखनम् ।

		अशुद्धम्	शुद्धम्
1051	T1	न्याधि	T व्याधि

11) रेफस्थाने अनुस्वारलेखनम्, अनुस्वारस्थाने रेफलेखनम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

		अशुद्धम्	शुद्धम्
53	T1	मार्जां आयाति	T मार्जार आयाति
पृ. 79	T1	लग्नं ध्रेऽपि	T लग्नरन्ध्रेऽपि
833	T2	संटा	T सरटा
1051	T1	सपापेंपुगे	T सपापे रिपुगे
73	T1	रवारशक	नवांशक

12) ह स्थाने व, व स्थाने ह लेखनम् । (लिपिगतसाम्यं कारणम्)

		अशुद्धम्	शुद्धम्
98	T	विवागो	T2 विहगो
102	T, T1	हनागतः	वनागतः

13) ण स्थाने को लेखनम् ।

		अशुद्धम्	शुद्धम्
1752	T1	द्रविकोस्य	T द्रविणस्य

14) अल्पप्राणस्थाने महाप्राणवर्णलेखनम् ।

		अशुद्धम्	शुद्धम्
167	T, T1,	मारणोच्छाटनक्रिया	मारणोचाटनक्रिया
192	T	तथाविदे	तथाविधे
187	T, T1,	पक्षिवेदो	T2 पक्षिवेधो
पृ. 114		दिगदिपा, धिगधिवाः	दिगधिपाः

लेखकप्रमादजन्याशुद्धिः

पदगताक्षरपरिवर्त्तनम्

(व्यञ्जनोत्तरगतस्वराणामपि स्वेच्छया परिवर्त्तनं दृश्यते ।)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

		अशुद्धम्	शुद्धम्
111	T1	अङ्गरागे	अङ्गारके
1216	T	शटगादिगः, T शविगादिगः	शकटादिगः
1406	T	जीवन्तं नतयो द्वयोः ।	जीवितं नयतो द्वयोः
810	T	जामित्रगौ भौमवरौ	जामित्रगौ भौमरवी
A 175	T,T1,T2	नामाविनिहाय	नामानि विहाय
2028	T	द्रेक्कापेण	द्रेक्काणपे
1274	T	काशादि	शाकादि

'रु' स्थाने 'गु' (तत्र पत्रच्छेदनं कारणम् । 'रु'- इत्यक्षरम् अधोभागे खण्डिते 'गु' इत्यक्षररूपतामाप्नोति)

		अशुद्धम्	शुद्धम्
2044	T1	पगुषो	T परुषो

केचन शोधकाः पाणिनीयव्याकरणज्ञानादिनापशब्द इति निश्चित्य शोधनं कुर्वन्ति । किन्तु कालिदासादिमहाकविप्रयोगेष्वप्यपशब्ददर्शनात् तस्यापशब्दत्वेन व्यवहारो योग्यो न भवति, शोधने कवेरपचार एव भवतीति आधुनिकशोधकानां मतम् । तथापि मद्दृष्ट्या सर्वथार्थहीनं पदं लेखकप्रमादजन्यं भवेदिति कृत्वा शोधितम् । प्रायः चतुरः नियमान् मनसि कृत्वा शोधिताः, यथा -

1) छन्दोनियमः

2) पाणिनीयव्याकरणनियमः

3) प्रकरणानुसरणम्

4) स्वबुद्ध्या अपि अर्थविहीनपदस्य प्रकृतानन्वितार्थकपदस्य वा प्रकृतान्वययोग्यतानुसारेण सार्थकपदत्वसम्पादनम् ।

1) तत्र छन्दोभङ्गभीत्या शोधनोदाहरणानि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

	अशुद्धम्	शुद्धम्
84	भानौ वृषे निरक्ता (अनुष्टुप्)	भानौ वृषे(वि)रक्ता (स्त्री)
85	ब्राह्मणी मदातुरा (अनुष्टुप्)	ब्राह्मणी मदनातुरा
70	राशेरंशकारेशेश्च	राशेरंशकराशेश्च

2) व्याकरणनियमानुसारेण कृतशोधनस्योदाहरणम्

	अशुद्धम्	शुद्धम्
112	चन्द्रौ	चान्द्रौ
288	बाध	बौधे
110	संयाति योषित	संयान्ति योषितः
286	शाक्रे	शौक्रे

3) प्रायः प्रकरणे पठितानां ग्रहादिपदगतविभक्तीनामानुगुण्येन शोधितम् ।

	अशुद्धम्	शुद्धम्
133	रविजो	रविजे
212	मृगो	मृगे

4) स्वबुद्ध्या कृतशोधनस्योदाहरणम् ।

	अशुद्धम्	शुद्धम्
A 282	समृद्धा वा दुर्बलनत्रायाश्च	समृद्धायाः दुर्बलनेत्रायाः
A 256	अरितरविवारे	अतीतरविवारे
A 256	यवागूपन	यवागूपानम्

लेखकदोषः

श्लोकस्य पूर्वार्धसमाप्तौ विरामचिह्नं न कृतम् । किन्तु सन्धिरेव दृश्यते ।

	अशुद्धम्	शुद्धम्
1653, 1654	प्रायो बहुकन्यकाःस्युः समराशिगतेऽन्यथा पुत्रश्शनिवर्गस्थे	..... अन्यथापुत्रः । शनिवर्गस्थे ..... ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तमिलमलयाळभाषापद्यानामसामर्थ्यात् शोधनं न कृतम् । अन्यत्रार्थानुदयात् शोधनं दुष्करं, तत्र प्रायेण प्रश्नचिह्नं कृतम्, यथा -

100 स्त्रीकृतद्रमन्निमाया?

183 नादारुदाराकाशोहिर्वेश्या च कीटकः?

130 शशिजे वनसं वासिश्शित्रेण वअ सयोषित?

नवीनसंस्करणे अनुसृता रीतिः

तिस्रः मातृका उपलभ्यन्ते इति प्रश्नसारसमुद्रस्य पाठसमीक्षात्मकं शोधनकार्यं प्रारब्धम् । किन्तु तासु जन्यजनकभावसम्बन्धात् योग्यपाठस्य वा पाठभेदस्य पर्याप्ता सिद्धिर्नैवाभूत् । तस्मादत्र नष्टग्रन्थभागपूरणाय अशुद्धेः शोधनाय च विविधोपायावलम्बनमकारि ।

एतदर्थमेव जम्बुनाथस्य प्रश्नरत्नाख्यान्या कृतिः तञ्जावूर् सरस्वतीमहलमातृकालये दृष्टा, भग्नापूर्णा कृमिभक्षिता च दशसु ताडपत्रेषु लब्धा, सा सङ्गृहीता । ग्रन्थेऽस्मिन्नस-कृत्स्मृतौ, अनुष्ठानपद्धतिकृष्णीयाख्यौ ग्रन्थौ मलयाळलिपिमुद्रितौ लब्धौ, तावप्यानीतौ । पूर्वोक्तानां ग्रन्थनामन्येषां च साहाय्येन मयानुसृता शोधनरीतिः प्रस्तूयते-

1) व्याख्यागतपदात् मूलश्लोकगताशुद्धशोधनम् ।

2) मूलवचनात् व्याख्यागताशुद्धशोधनम् ।

3) T मातृकायाः भग्नपत्रकृमिभक्षितादिभागस्य पूरणं शोधनं च T1 मातृकाया कृतम् ।

4) T मातृकायाः शोधनं T2 मातृकालेखककृतशोधनादपि कृतम् ।

5) ग्रन्थकर्तुर्ग्रन्थान्तरात् प्रश्नरत्नात् शोधनम् ।

6) प्रश्नमार्गादिग्रन्थान्तरात् शोधनम् ।

तथा 1) प्रश्नमार्ग 2) षट्पञ्चाशिका 3) आर्यासप्तति 4) प्रश्नज्ञानप्रदीप 5) प्रश्नायन 6) बृहज्जातक 7) सारावली 8) दशादर्पण 9) जातकपारिजाताद्यानुसारेण शोधनं ग्रन्थपातस्य पूरणं च विहितम् । अवशिष्टस्थले प्रकरणानुरोधेन, छन्दस अनुरोधेन,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पाणिनीयनियमानुसरणेन च मूलमातृकावशिष्टान् विसर्गानुस्वारवर्णादीन् संरक्ष्यैव ग्रन्थान्तरवचनसम्मत्या जागरूकेण शोधितम् । अन्ये केचिदपपाठाः तत्र तत्र यथावकाशं शोधिताः ।

1) व्याख्यानान्मूलपदशोधनम्

व्याख्यागात् पदात् अशुद्धस्य मूलपदस्य परिष्करणोदाहरणम्-

T, T1	मातृकापदगता समाना अशुद्धिः	व्याख्यागतपदेन शोधनम्
A 282	श्रीविद्रेक्पतिः	श्रीविद्दक्पतिः
277	धन्ये बुधे द्वौर्भौमेन्द्वोः	धन्यो बुधेन्द्वोर्भौमेन्द्वोः
275	शुक्रेरगस्तगतयोर्धनक्रमान्वितापति	शुक्रेन्द्वोरस्तगतयोर्धनकामान्विता पतिः
274	तत्रार्के भारात् भार्याहात्	तत्रार्के राजभार्यायाः

मूलाद्व्याख्यापदशोधनम्

2) मूलगतवचनात् व्याख्यागताशुद्धिशोधनस्योदाहरणम् -

	T टीकायामशुद्धिः	T मूलवचनाच्छोधनम्
A 333	इति वार्ताधिकं पि त्वाया	इष्टवार्त्तादिकमपि त्वया (मूलवचनं- 'इष्टवचः श्रुतिः')
A 544	भार्याप्रियावपि	भार्याविधावपि
A 843	T दिवाग्गतेन्द्वो	दिवाकरेन्द्वोः

3) T1 मातृकया शोधनम्

T मातृकाया भग्नकृमिकीटादिना नष्टभागस्य पूरणं T1 मातृकया कृतम्, यथा -

	T नष्टभागः	T1 पूरितभागः
24	मृगेमैथुनपाषण्डि...... ।	मृगे मैथुनपाषण्डि मत्स्यभक्ष्याणि संवदेत् ।

31-74 T मातृकाया द्वितीयपत्रस्यार्धं भग्नम् । पुटद्वयमाहत्य द्वादशपङ्क्तेरर्धभागः नष्टः प्रतिपङ्क्तिविंशत्यक्षराणि नष्टानि । नष्टभागः T1 मातृकया पूरितः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्वचित् T मातृकायाः भग्नान्यक्षराणि T1 T2 मातृकयोरपि न दृश्यन्ते । तस्य कारणं प्रतिलिपिकरणात्पूर्वमेव पत्रं भग्नं भवेदिति तर्क्यते, यथा -

	मातृकात्रयगतग्रन्थपातः	प्रश्नरत्नात् शोधितः
303	राभ्यां कलिर्विघ्नः	बुधाराभ्यां कलिर्विघ्नः

4) T2 मातृकया शोधनम्

T2 मातृकया कृतस्य परिशोधनस्योदाहरणम् ।

	T अशुद्धिः	T1 अशुद्धिः	T2 शुद्धिः
276	जीवेद्धोः	द्विजन्द्वोः	जीवेन्द्वोः
254	अम्भेदात्	अम्भेदात्	अंशभेदात्
136	वृषशिप्रसवः	वृषातिप्रसवः	वृषाळिप्रसवः

5) प्रश्नरत्नात् स्वीकृताः साधुपाठाः

1. T मातृकयां मूलं पद्यं नष्टम् । केवलं व्याख्या दृश्यते । तत्प्रश्नरत्नात् पूरितम्, यथा -

35 (पशुभीश्चोररोगार्तकलहो हृतिदर्शनम् ।
भुक्तिमैथुनकालाद्यं रव्याद्यैः कारकैर्वदेत् ।।) प्र.र. 83-84

(व्या-) कारकभूतै रव्यादिभिश्चतुष्पदादीनां दर्शनादि वदेदिति । रवेः चतुष्पदाद्भीः । चोरगदार्तकलहहृदिति । हृतिर्हरणम् । भुक्तिमैथुनादिकाले कथाप्रसङ्गोऽप्येतद्विषयः इति वक्तुं शक्यते प्रश्नकालेऽपि ।

2. T मातृकागतः अशुद्धश्लोकः यथा-	समानार्थकः प्रश्नरत्नगतः शुद्धः श्लोकः यथा-
29 भूपत्नी शस्त्रपाणिः स्यादर्ध विप्रो महाद्विजः। वैश्यत्नी वा वैश्यादि होरेश फलमर्कतः ।।	भूपस्त्री शस्त्रिनिन्द्यद्विजमहितबुधो जारिणी भृत्यवैश्या । वाच्या का(लेश)होरा.........

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्लोकद्वयगतयोः पदयोः समानार्थकत्वप्रदर्शनम्   प्रश्नरत्नाच्छोधनरीतिः

प्रश्नसारसमुद्रपाठः	प्रश्नरत्नपाठः	
शस्त्रपाणि	शस्त्री	
अर्धविप्र	निन्द्यद्विज	
महाद्विज	महितबुध	
वैश्यस्त्री	[1]जारिणी	1) T मातृकागतं 'वैश्यस्त्री' इतिपदं प्रश्नरत्नगतस्य 'जारिणी' इति पदस्य प्रयोगात् 'वेश्यास्त्री' इति शोधितम् ।
वा	[2]भृत्य	2) T मातृकागतं 'वा' पदं प्रश्नरत्नगतस्य 'भृत्य' इति पदस्य प्रयोगात् 'वाह' इति शोधितम् ।
वैश्य	वेश्या	

अत्र T मातृकागतस्य 'वा' इति वर्णस्य संरक्षणं कृतम् । छन्दसः नियमो रक्षितः । भारं वहतीति वाह इति कृते प्रश्नरत्नगतार्थोऽपि सङ्गतो भवति । उदाहरणान्तरं प्रश्नसारसमुद्रस्य पृष्ठेषु बहुत्र द्र.प्र.र. इति प्रदर्शितम् । तत्र द्रष्टव्यम् ।

6) प्रश्नमार्गाद्येकादशग्रन्थाच्छोधनम्

प्रश्नमार्गानुसारेण कृतस्य शोधनस्योदाहरणम् -

1) T, T1 अशुद्धापूर्णश्लोकः   प्रश्नमार्गे

222 अतीतमन्दवारे ते कालादिक्रमते जनम् ।
अत्यापच्च व्यतीतात्रे तमन्द..........? ।।

अष्टमस्थे रवेः पुत्रे वाच्यं भुक्तिविलम्बनम् ।
अत्यापत्तिश्च मन्दस्य समीपस्थे गतेऽहनि ।।
(2.91)

प्रश्नमार्गानुसारेण शोधितः श्लोकः -

अतीतमन्दवारे (तु) कालातिक्रम(भो)जनम् ।

अत्यापच्च व्यती(तेऽह्नि मन्दे त्वष्टमसंस्थिते) ।।

T तथा प्रश्नमार्गवचनस्यार्थसाम्यप्रदर्शनम् -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

T	प्र.मा.
अतीतमन्दवारे (तु)	मन्दस्य समीपस्थे....... अहनि
कालातिक्रम(भो)जनम् ।	वाच्यं भुक्तिविलम्बनम् ।
अत्यापच्च व्यती(तेऽह्नि	अत्यापत्तिश्च...... गतेऽहनि
मन्दे त्वष्टमसंस्थिते)	अष्टमस्थे रवेः पुत्रे

श्लोकद्वयगतार्थसाम्यप्रदर्शनम्

प्रश्नमार्गश्लोकानुसारेण शोधितः	तत्समानार्थकः प्रश्नमार्गश्लोकः
838 T श्लोकः	(13, 16-17)
पूर्वाहीन्द्रमरुच्छिवे (तु मरणं	ज्येष्ठासमीरोरगरौद्रपूर्वात्रयेषु न प्रागितिजातरोगः ।
मैत्रा(न्त्य)योर्दीर्घरुक्	मित्रपूष्णोस्तु कृच्छ्रात् ।
मासा(द्विश्वेन्दुभेऽ)	वैश्वे सौम्ये च मासात्
(अर्क) शूर्पवसुभे पक्षात्	वसुभब्रध्नशूर्पेषु पक्षात्
(मघा)यां नखैः	विंशदह्नो मघायां
चित्राम्भोधियमाच्युते शिवदिनैः	चित्राप्रचेतोयमहरिषु सुखं विन्दते रुद्रसंख्यात् ।
दस्राग्निमूले ग्रहैः	मूलाश्वियुक्ते हुतभुजि नवमात्
आदित्योत्तरबु(ध्न्य)तिष्य(विधिभे) रोगीसुखी सप्तभिः ।।	गुरुभगसुरसूबुध्निवेधस्सुभूभृत्संख्यात् । (आदित्यः=अदितेः पुत्रः=सुरसूः=देवमाता= पुनर्वसुनक्षत्रमित्यर्थः)

इत्थं पूर्वोक्ते श्लोके पञ्चविधप्रकारकं शोधनं यथा -

1) द्विवारं पठितम्	वसुभे इति पदम्
2) अनुक्तम्	रोहिणीनक्षत्रवाचकं 'विधिभे' इति पदम्
3) ग्रन्थपातः	विश्व, इन्दुभ, अर्क इति ग्रन्थपातः
4) अशुद्धा	अन्त्यस्थाने अ त्य, बुध्यस्थाने बुद्ध

बहुग्रन्थावलोकनेऽपि शुद्धपाठनिर्णयक्लेशः, यथा -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

T - मेषोदयेऽन्नं शाकाढ्यं

मेषराशौ भवेच्छागं — प्रश्नज्ञानप्रदीप, 16.2

मेषराशौ भवेच्छागं — प्रश्नायनम्, 12.27

प्रश्नमार्गोद्धृते ज्ञानप्रदीपिकावचनम् ।

अत्र ज्ञानप्रदीपिका -

मेषराशौ भवेच्छाकं

अत्र बहुग्रन्थावलोकनेऽपि शाकपदं वा छागपदं वा इति शुद्धपाठे सन्देह एव भवति ।

प्रश्नायनवचनाच्छोधनम्, यथा -

T - गताशुद्धिः ।

781 कोर्पादौ कर्किनान्त्या ससर्पा कुम्भसिंहयोः ।

आद्यावणिं मध्यमश्च ग्रन्ध्यास्यान्मृगकर्किणोः ।।

प्रश्नायनाच्छोदितांशः ।

(कौर्प्याद्या कर्किमीनान्त्ये) ससर्पा कुम्भसिंहयोः ।

(आद्या वणिङ्मध्यमा स्याद्गृध्रास्या) मृगकर्किणोः ।।

आदिमौ सूकरमुखौ द्रेक्काणस्थितिरीदृशी ।

प्रश्नायनगश्शुद्धः पाठः ।

सर्पावृतो वृश्चिकाद्यः कर्किमीनान्तिमावपि ।

गृध्रास्यस्तौलिमध्यश्च कुम्भसिंहादिमौ तथा ।। प्रश्नायन, 3.12

कोलास्यो वृश्चिकान्त्यश्च मृगकर्क्यादिमावपि । प्रश्नायन, 3.13

* * *

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ प्रश्नसारसमुद्रः ॥

[1]शुभमस्तु ।

[2]श्रीरामचन्द्राय नमः ।

[A]अस्तोकस्तनविन्यस्तनिस्तुलस्तुत्यगोस्तनम् । 1
[B]हस्तन्यस्तशुकं वस्तु [3]ध्वस्तांहःस्तोममस्तु नः । 2
वाधूलकुलपद्मार्को जम्बुनाथः सतां मुदे । 3
प्रश्नार्णवं रचयति प्रश्नशास्त्रामृताकरम् । 4

व्या – [4]स्पष्टः ।

॥ तत्र प्रश्नकाले [5]प्रष्टुर्विस्मापनार्थमागमनकाले [6]प्रष्टृदृष्टलक्षणानि वाच्यानीत्याह ॥

[C] [7]राहुश्चार्किः पृच्छकाधिष्ठितर्क्षे यद्वा तस्मान्पञ्चमे वाष्टमे वा । 5
[D]चण्डालानां पङ्क्तिरग्रे प्रदृष्टा [8]शूद्रा दृष्टास्तत्र चेद्भूमिजज्ञौ । 6
[E]लग्नसुताष्टमसंस्थौ[9] गुरुशुक्रौ [10]चेद्द्विजातिभिर्योगः । 7
पापयुतौ दृष्टौ चेद्गुरुशुक्रौ तन्तुधारिभिर्योगः । 8
[F][11]अर्को यद्येषु नृपैश्चन्द्रसितौ चेत्स्त्रिया योगः । 9
[G]चन्द्रार्कजौ स्थितौ [12]चेद्दुष्टस्त्रीभिः सितः कुलस्त्रीभिः । 10
[H]अशुभशुभदृष्टियोगात्तज्जातीयैश्च योगमपि विद्यात् । 11

---

1. T1 अस्मात्परम् अविघ्नमस्तु । श्रीमद्गुरुभ्यो नमः इत्यधिकः पाठः
2. T1 अयं पाठो नास्ति ।
3. T तथा T 1 धस्तांह° ।
4. T तथा T1 स्पष्टा ।
5. T2 पाठः T प्रष्टुवि° T1 प्रष्टुर्विस्मापनार्थमागमनकाले इति ग्रन्थपातः।
6. T1 प्रष्ट्°
7. T2 पाठः, T तथा T1° श्चार्की ।
8. T अस्फुटम्, T1 शोद्या दृष्टात्र ।
9. T1 °स्थौ for °संस्थौ
10. T तथा T1 च द्वि°
11. T तथा T1 अर्के
12. T तथा T1 चेत्ष्टस्त्रीभिस्थितः T2 चे दिष्ट°

A. प्र. र. 1
B. प्र. र. 2
C. प्र. र. 75 तथा प्र. मा. 2.77
D. प्र. र. 76
E. प्र. र. 77 तथा प्र. मा. 2.78
F. प्र. र. 78 तथा प्र. मा. 2.79
G. प्र. र. 79
H. प्र. र. 80 तथा प्र. मा. 2.80

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्रष्टृधिष्ठितदिग्वशात् प्रष्टृदृष्टवस्तुनिरूपणम् ।

[1]अजो द्विजश्शस्त्रपाणिश्चतुष्पाज्जलजो वणिक् । 12
[A] [2]अरिर्विहङ्गरोगार्तकन्यापादजकुक्कुराः[3] । 13
[B] [4]गृहात्प्रत्युद्गमे [5]दृष्टाः प्रष्टृधिष्ठितदिग्वशात् । 14

व्या - प्रागादिफलं वदेत् । ईशदिशं पञ्चधा कृत्वा विहङ्गादिफलं ब्रूयादिति ।

॥ यत्रकुत्रचित् स्थितमेषादिराशिनवांशवशात् प्रष्टृदृष्टवस्तुनिरूपणम् ॥

[C] [6]मेषे नृपति[7]-सेनेश[8]-चोरस्थानकथां वदेत् । १५
[D]गन्धमाच्छादनं माल्यं चतुष्पात् [9]कर्षकौ वृषे ॥ १६
[E]गान्धर्वहास्यनटन-[10]मैथुनस्त्रीकथां यमे । 17
[F]आरामोद्यानौषधानि शय्यां कर्कटके वदेत् ॥ 18
[G]सिंहेऽरण्यं[11] चतुष्पादं वदेद्दुर्ग[12]-गुहे क्रमात् । 19
[H] [13]कन्यायां वस्त्रमालेख्य-[14]गान्धर्वान् सप्तमे पुनः ॥ 20
[I] [15]ब्रूयान्मान-[16]तुलाभाण्डमद्यान्यळिफलानि तु । 21
[J] [17]कीटाग्निजीविनौ [18]गोमी सर्पभुक्ति-[19]विषाणि षट् ॥ 22

---

1. T° मुख अजो T1 मखो अजो
2. T° तथा T1 पातजॅ
3. T1 तथा T2 पाठः T कुक्कुटाः
4. T1 हा° for गृहा°
5. T1 ष्टाः for दृष्टाः
6. T1 मेष
7. T, T1, T2 नेनेश
8. T1 ° चोरस्था° पाठः T पत्रं भग्नम् ।
9. T2 ° त्तर्षकौ
10. T1 मैथुन इति ग्रन्थपातः।
11. T1 पाठः रण्यं । T पत्रं भग्नम्
12. T1 गृहक्रमात् T पत्रं भग्नम् । T2 ग्रहादिकम् ।
13. T1 पाठः। T पत्रे ''सप्तमे पुनः'' इत्येव दृश्यते ।
14. T1° ख्याष्टेस्त्र for ख्यवस्त्र
15. T1 पाठः। T भग्ने पत्रे बहुत्र अक्षरार्ध भाग एव दृश्यते।
16. T2 मांसं
17. T2 पाठः । T अस्फुटम् । T1 कीटाग्निजीविना
18. T1 तथा T2 पाठः । T अस्फुटम्
19. T1 ''विषांस्तुष'' T अस्फुटम् ।

A. प्र. र. 81
B. प्र. र. 82
C. प्र. र. 136 तथा कृ. 20.1
D. प्र. र. 137
E. प्र. र. 138 तथा कृ. 20.2
F. प्र. र. 139
G प्र. र. 140 तथा कृ. 20.3
H. प्र. र. 141
I. प्र. र. 142
J. प्र. र. 143 तथा कृ. 20.4

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[A]दैवज्ञविप्रगुरवो माल्यगन्धभटस्त्रियः । 23
[B]मृगे मैथुन-[1]पाषण्डिमत्स्यभक्ष्याणि संवदेत् ॥ 24
[C]दीर्घरोमनखक्रूरवधूयुग्मानि [2]कुम्भतः । 25
[D]रम्यस्त्रीमित्रनीलाब्जमत्स्यपद्मानि मीनभे ॥ 26
[E]एते स्युः कथिता लब्धा [3]दृष्टा राश्यंशकैः क्रमात् । 27
[F]एतानि लक्षणान्यत्र मुहूर्तेष्वपि [4]चिन्तयेत् ॥ 28

व्या – मेष इत्यादिश्लोका [5]यत्र कुत्रचित् स्थितमेषनवांशाधिपपराः । एतेषामुदये तेषां लाभो दर्शनं [6]कथा वाभूदिति वदेत् । रविस्थितद्वादशांशगतमेषादिवशात् मुहूर्तेष्वप्येषां लाभादि [7]भविष्यतीति मुहूर्तलक्षणत्वेन वदेदित्यपि केचिद्वदन्ति । यस्यांशस्य यावन्ति फलानि तमुद्यन्तमंशं तावद्भेदं कृत्वा क्रमादेतानि वाच्यानि । [8]मेषे त्रीणि । वृषे पञ्च । यमे-मिथुने पञ्च । कटके चत्वारि । सिंहे चत्वारि । कन्यायां त्रीणि । जूके चत्वारि । वृश्चिके षट् । तत्र गोमी-जलौकाः, चापे दैवज्ञादिफलानि सप्त । तत्र भटः-योद्धा । मृगे-मकरे चत्वारि । घटे त्रीणि । मीने पञ्च । नीलाब्जम् उत्पलम्। ८-१४

॥ कालहोरेशवशात् फलमाह ॥

[G]भूपः स्त्री शस्त्रपाणिः स्यादर्धविप्रो महाद्विजः । 29
[9]वेश्यास्त्री वाहवैश्यादि होरेशफलमर्कतः ॥ 30

व्या - अर्कमारभ्य होरेशफलं क्रमाद्वदेदिति । यथा रवौ कालहोरेशे, केन्द्रस्थे बलिनि राजा आगच्छति[10] । चन्द्रे एवं सति स्त्री आयाती[11]त्यादि योज्यम् । [H][12]शनैश्चरे वैश्यजो नरो आयातीति शेषः ॥ १५ ।

---

1. T1 पाठःपाषण्डिपदात् पङ्क्त्यन्तम्। T अस्फुटम्
2. T कुम्भत्
3. T1 द्रष्टा
4. T1 पाठः T अस्फुटम् ।
5. T वत्र
6. T1 कथां
7. T1 पाठः T2 भविष्यदि॰ T पत्रं भग्नम्।
8. T1 मेवे
9. T वैश्यस्त्री
10. T ॰न्ति
11. T1 पाठः ॰तीत्यादि T पत्रं भग्नम्।
12. T शनैत्य for शनैश्चरे

A. प्र. र. १४४ B. प्र. र. १४५ तथा कृ २०.५
C. प्र. र. १४६
D. प्र. र. १४७ तथा कृ२०.६
E. प्र. र. १४८ F. प्र. र. १४९

G. प्र. र. 85 भूपः स्त्री शस्त्रिनिन्द्यद्विजमहितबुधा जारिणी भृत्यवैश्याः । अत्र प्रश्नरत्नगतस्य ''जारिणी'' इति पदस्य समानार्थकपदत्वसम्पादनाय T ''वैश्यस्त्री'' इति पदं ''वेश्यास्त्री'' इति शोधितम्। T मातृकायां ''वा'' इत्यनन्तरम् एकवर्णलेखनपर्याप्तस्थानं परित्यक्तम्। अतः प्रश्नरत्नगतस्य'' 'भृत्यवैश्यं'पदस्य समानार्थकपदत्वसम्पादनाय ''वाहवैश्य'' इति कृतम् । अत्र प्र.अ.प. १२.८ ग्रन्थान्तरेण पाठशोधनमत्र कथं कृतमिति दिङ्मात्रमत्र प्रदर्शितम् ।

H. T मातृकायां ''शनैत्य वैश्य'' इति विलिख्य वर्णद्वयलेखनपर्याप्तं स्थानं परित्यक्तम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। केन्द्रगतानां कालहोरेशादीनामुत्तमफलदातृत्वनिरूपणम्।

[A]बलिनः कण्टकसंस्था होराधिपमासदिवसवर्षेशाः । 31

व्या - [1]इत्युक्तत्वात्। [2]कालहोरेशे केन्द्रस्थे [3]उत्तमफलमवश्यं भवतीति मुहूर्तकालेष्विदं लक्षणमवश्यं वाच्यम्।

। कालहोराप्रशंसापरं मलयाळप्रबन्धप्रसिद्धं वचनम् ।

दोषादिरेणुरैचिते कालहोरैव नन्नतु ॥ 32

[4]क्षणिकग्रहमुङ्ङोलां प्रसिद्धग्रहमाकिलाम् । 33
प्रधान[5]कालहोराख्यं लक्षणं चिन्तनीयमे ॥ 34

[B]पशुभीश्चोररोगार्तकलहहृतिदर्शनम्। 35
भुक्तिमैथुनकालाद्यं रव्याद्यैः कारकैर्वदेत् ॥ 36

व्या - कारकभूतै [6]रव्यादिभिश्चतुष्पदादीनां दर्शनादि वदेदिति रवेश्चतुष्पाद्भीश्चोरगदार्तकलहहृतिति । [7]हृतिः हरणम् । भुक्तिमैथुनादिकाले कथाप्रसङ्गोऽप्येतद्विषय इति वक्तुं शक्यते प्रश्नकालेऽपि ॥

॥ मुहूर्तादौ प्रश्ने [8]च वक्तव्यं फलान्तरमाह ॥

। मेषद्रेक्काणजन्यं फलम्।

मेषादिगैश्च द्रेक्काणैः फलं पादक्रमाद्वदेत् । 37
खरयुद्धं पूर्ण[9]कुम्भो गर्भिण्यः पुष्पसञ्चयः ॥ 38

1. T1 इत्युक्त्वा
2. T कालहोरा T1 कालहोरे
3. T1 पाठः। T उत्तमफलमं इत्यस्मात्परं रेणुरैचिते इत्यस्मात्पूर्वं ग्रन्थापातः।
4. T1 पाठः। T मुङ्कोल्लां
5. T काले
6. T1 पाठः। T ''रव्यादि'' इत्यस्मात् परं ''गदार्थ'' इत्यस्मात् पूर्वं ग्रन्थपातः ।
7. T1 पाठः। T हृतिं
8. T1 पाठः। T ''च वक्तव्यं'' इत्यस्मात्परं द्वदेत् इत्यस्मात् पूर्वं ग्रन्थपातः ।
9. T कुम्भ

A. T मातृकायां द्वितीयपत्रार्धं भग्नम् । अतः प्रतिपङ्क्ति सामान्यतः विंशत्यक्षराणि लुप्तानि । अतः ''बलिनः कण्टकसंस्थाः'' इत्यारभ्य तस्मात् ५२ तमपङ्क्तौ स्थितस्य ''कथयन्मुहूर्ते'' इत्यन्तं T1 मातृकया पूरितम्।

B अस्य पद्यस्य केवलं व्याख्या दृश्यते । मूलपद्यस्य ग्रन्थपात इति धिया प्रश्नरत्नात् उद्धृतम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। वृषद्रेक्काणजन्यं फलम् ।

गोकुक्कुटध्वनिर्वाद्यवृक्षयोः कंसजः स्वनः । 39

व्या - वृक्षजः कंसजो रवो दुष्टकं ध्वनिर्वा ।

। मिथुनद्रेक्काणजन्यं फलम् ।

[1]श्वाजशब्दौ [2]नृगोशब्दौ [3]नाशवाग्वाद्यसुस्वरौ ॥ 40

। कर्कद्रेक्काणजन्यं फलम् ।

कुळीरे योषिदायाति ब्राह्मणो वा समाव्रजेत् । 41

मध्ये चण्डालशब्दो वा विप्रदीर्घस्वरोऽपि वा ॥ 42

। सिंहद्रेक्काणत्रयजन्यं फलम् ।

सिंहे मृगरवो वा स्याच्चण्डालवचनं तु वा । 43

मध्ये रोगी समायाति [4]मृगो वापि तदा व्रजेत् ॥ 44

अन्त्ये विनोदशब्दो वा [5]मार्जारागम एव च । 45

। कन्याद्रेक्काणजन्यं फलम् ।

कन्याद्ये योषिदायाति शस्त्रपाणिस्तथा नरः ॥ 46

अन्त्ये नष्टकशब्दो वा स्वर्णस्यागम एव वा । 47

। तुलाद्रेक्काणत्रयजन्यं फलम् ।

तुलाद्ये वन्यमायाति कन्यका वा तदा व्रजेत् ॥ 48

[6]मध्ये कश्चित्समायाति वर्षादागमनं [7]तु वा । 49

अन्त्ये शुनो ध्वनिर्वा स्याच्चण्डालध्वनिरेव वा ॥ 50

---

1. श्वाज इत्यस्मात्परं ''ति ब्राह्मणो'' इत्यस्मात् पूर्व पत्रं खण्डितम् ।
2. T °न° for नृ
3. T नाशनना ° for नाशावॉ
4. मृगो वा इत्यस्मात् परं दायातिँ इत्यस्मात्पूर्वं T1 पाठः । T पत्रं खण्डितम् ।
5. T2 मार्जारगम T1 मार्णारसम
6. मध्ये कश्चित् इत्यस्मात्परं ''र्वा स्याच्चण्डाल° '' इत्यस्मात् पूर्वं T1 पाठः। T पत्रं खण्डितम् ।
7. T2 पाठः । T1 तो वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। वृश्चिकद्रेक्काणत्रयजन्यं फलम् ।

वृश्चिके विप्र आयाति धेनुर्वापि तदा व्रजेत् । 51
मध्ये तूष्ट्रागमं विद्याद्वृक्षच्छेदः परन्तु वा ॥ 52
अन्त्ये [1]मार्जार आयाति सारमेयोऽपि वा भवेत् । 53

। धनुर्द्रेक्काणत्रयजन्यं फलम् ।

चापे कुक्कुटशब्दः स्याद्द्विजशब्दोऽपि वा भवेत् ॥ 54
मध्ये पापागतिर्वा स्यादन्त्ये [2]मृध्वनिरेव वा । 55

। मकरद्रेक्काणत्रयजन्यं फलम् ।

मृगाद्ये मांसमायाति [3]शस्त्रपाणिस्तु वा भवेत् ॥ 56
मध्ये वृषभ आयाति पात्रस्य ध्वनिरेव वा । 57
अन्त्ये पटहशब्दो वा विहीनस्वर एव वा ॥ 58

। कुम्भद्रेक्काणत्रयजन्यं फलम् ।

कुम्भाद्ये गर्भिणी वा स्यात् [4]शिखी वा यदि वा व्रजेत् । 59
मध्ये चण्डालशब्दो वा विप्रदीर्घस्वरोऽपि वा ॥ 60
अन्त्ये रोगी नरो वा स्या[5]द्भिक्षाशनपरोऽपि वा । 61

। मीनप्रथमद्रेक्काणजन्यं फलमेव ।

मीनाद्ये गोरसप्राप्तिस्तैलपात्रधरोऽपि वा ॥ 62

॥ अथ मुहूर्तलक्षणं स्वल्पं प्रदर्श्यते ॥

॥ चन्द्राक्रान्तराशिवशात् नवांशवशाच्च लक्षणज्ञानम् ॥

यस्य ग्रहस्य [6]शीतांशुरंशके व्यवतिष्ठति । 63
यस्य राशिरुपात्तस्स्यादुभयं तस्य लक्षणम् ॥ 64

---

1. T2 मार्जार आयाति पाठः । T पत्रं खण्डितम् । T1 मार्जा आयाति
2. T तथा T1 मृध्वरेव T2 मृध्वरेव (मृद्ध्वनिरेव) एवं लिखितम् ।
3. शस्त्रपणिस्तु वा ''इत्यस्मात्परं'' वा विहीनस्वर'' इत्यस्मात्पूर्वं T1 पाठः। T पत्रं खण्डितम्।
4. शिखा
5. द्भिक्षा ''इत्यस्मात्परं'' ''अथ मुहूर्तलक्षणं'' इत्यस्मात्पूर्वं T1 पाठः T पत्रं खण्डितम् ।
6. T1 शीतांशुरंशरशके

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। चन्द्राक्रान्तांशकेशस्थितराशेः फलोत्पत्तिदिग्ज्ञानम् ।

अंशकेश[1]स्थितर्क्षे[2]ऽस्य दिशि लक्षणमादिशेत् । 65

। सप्तांशाधिपविचारः।

[3]सप्तांशकानामधिपास्तथा द्वादशराशयः । 66
तद्योगाल्लक्षणानां [4]स्यादशीतिश्चतुरुत्तरा ॥ 67

। सप्तांशकविचारोपयोगः ।

स्थावरेषु विवाहेषु यात्रायां कृषिकर्मणि । 68
[5]दर्शनेषु विनिर्देश्यं न तु सर्वत्र [6]लक्षणम् ॥ 69

। राशेरंशकराशेश्च फलनिर्णयप्रकारः ।

राशेरंश[7]कराशेश्च जातिरूपगुणत्रयम् । 70

संवादं च विवादं च प्राप्तिं चालक्ष्य निर्दिशेत् ॥ 71

राशि[8]ग्रहेण युक्तश्चेत् तद्गुणानपि [9]लक्षयेत् । 72

। द्रेक्काणादिना ग्रहबलाबलं निर्धार्य फलनिरूपणविधिः ।

द्रेक्काणशीतगुन[10]वांशककालहोरा
[11]लग्नग्रहाद्युदयदृष्टिषु[12] यस्तु [13]वीर्यः । 73
तत्तुल्यवस्तुकथनागमनेक्षणाद्यं
[14]तत्काललक्षणमसौ[15] कथयेन्मुहूर्ते ॥ 74

---

1. "°स्थितर्क्षे" इत्यस्मात्परं "°राशय" इत्यस्मात्पूर्वं T1 पाठः ।
2. T2 पाठः T1 °र्क्षेन्य°
3. T2 पाठः। T1 सप्ता°
4. T2 स्याद° इति ग्रन्थपातः ।
5. T1 पाठः T कृमिभक्षितमस्फुटञ्च T2 दशषु for दशनेषु ।
6. "लक्षणम्" इत्यस्मात्परं " च प्राप्तिं" इत्यस्मात्पूर्वं T1 पाठः (पत्रं खण्डितम्) । T पत्रं भग्नम् ।
7. T1 ° कारेशेश्व
8. T °ग्रहोव°
9. T2 पाठः T1 अक्षचेत् T क्षयेत् द्रे° इति भागे पत्रं खण्डितम् ।
10. T1 °रवारशक° T अस्फुटम् , T2 रवारवाशक
11. T "द्युदयदृ" इत्यस्मात् परं "लक्षण" इत्यस्मात् पूर्वं ग्रन्थपातः ।
12. T1 दृष्टे T अस्फुटम्
13. T1 विर्याम् ।
14. T1 °ले
15. T2 पाठः। T नौ for मसौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। मित्रशत्रुक्षेत्रशुभांशवशात्फलनिर्णयप्रकारः ।

[1]मैत्रे तु सुहृदो ज्ञेयाश्शात्रवे तु विरोधिनः । 75
पुण्यांशकेष्वनभ्यस्ता ज्ञेया [2]लक्षणजास्त्रयः ॥ 76

। मेषे मेषांशके वा गतसूर्यादिजन्यफलम् ।

[3]मेषे मेषांशके वार्के राजवार्तापरो नरः । 77
दृश्यते दुष्टविप्रो वा शुभवार्तापरायणः ॥ 78
भूमिजे शूरतां प्राप्तो द्विजो वा व्यसनाकुलः । 79
बुधे वणिगमात्यो वा वनिता शोकपीडिता ॥ 80
जीवे धर्मचरो विप्रो भिक्षार्थी वा गुणान्वितः । 81
शुक्रे [4]नापितशूद्रो वा वणिग्वा भारवाहकः ॥ 82
[A]सूर्यजे [5]विहगः कृष्णस्तोयपात्रधरोऽपि वा । 83

। वृषे वृषनवांशे वा गतानां सूर्यादीनां फलम् ।

भानौ वृषे [6]विरक्ता स्त्री शीतांशौ कार्यवादिनी ॥ 84
भूमिजे पशुदुःखार्ता ब्राह्मणी [7]मदनातुरा । 85
चन्द्रजे पक्षिणो [8]दृष्टाः पुत्रिकासम्भवोऽपि वा ॥ 86
वागीशे शूद्रव्यसनं विप्रो वा किञ्चिदानयेत् । 87
शुक्रे महागुणो विप्रश्शूद्रो [9]वा रिपुपीडितः ॥ 88
मन्दे तु कृष्णवनिता मङ्गळध्वनिरेव वा । 89

। मिथुने वा मिथुननवांशे वा गतानां सूर्यादीनां फलम् ।

सूर्ये तु मिथुने वाग्मी कश्चिदायाति गायकः ॥ 90
इन्दावर्थिजनप्राप्तिर्बहुधा जायते ध्रुवम् । 91
भूमिपुत्रे [9]हि जायासिद्धिर्जस्य [10]व्यसनानि वा[B] ॥ 92

1.T1 मेत्रे
2.T1 पाठः लक्षणजं तव इति । T पत्रं खण्डितम्।
3.T2 पाठः। T मेषशके for मेषमेषांशके
4.T1 वापित°
5.T विग्रहग for विहग
6.T1 °निर°
7. T मदातुरा
8. T दृष्ट्वाः
9. T1 वारिप्रपीडितः
10. T ह ज्वयापि T2 ह ज्वयार्पि
11. T व°

A. अत्र छन्दो भङ्गः । विग्रहग for विहग
B. बुधफलं न दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जीवे तु दारग्रहणं यद्वा वारिजसम्भवः । 93
न योषिद्भार्गवस्योक्ता वीणाराशिगतो ह्ययम् ॥ 94

शुक्रे महागुणो विप्रो यद्यसौ पितृपक्षजः । 95
सूर्यजे पक्षिभिर्योगः पुत्रजन्मकथापि वा ॥ 96

। कर्के वा कर्कांशे वा गतानां सूर्यादीनां फलम् ।

भानौ कुळीरे द्रविणमिन्दौ सज्जनयोषितः । 97
कुजे तु [1]यक्षो [2]विहगो धर्मयोषिच्छ्रियोऽपि वा ॥ 98

वनिता कृष्णधम्मिल्ला [3]हयघोषितमेव वा । 99
शशिजे स्त्रीकृत[4]द्रमन्नमायाः पार्श्वमाव्रजेत् ॥ 100

[A]जीवे स्त्रीपुंसकलहो ---- ----------- । 101
भृगौ श्रेष्ठकृतो लाभः पक्षि[5]वाशो [6]वनागतः ॥ 102

सूर्यजे कुलटा नारी कलहश्रुतिरेव वा । 103

। सिंहे वा सिंहांशे वा गतानां सूर्यादीनां फलम् ।

सिंहे भानौ पशुश्रेष्ठश्चन्द्रे च वनिता [7]परा ॥ 104

[8]क्षितिजे [9]शत्रुसङ्घातः पशोर्वा दुःखसम्भवः । 105
चान्द्रौ चायान्ति विद्वांस[10]श्चान्यो वा[11]धीयते क्वचित् ॥ 106

[12]गुरौ प्रभुविरोधोक्तिर्विप्रो वा पशुपीडितः । 107
शुक्रे तु मङ्गळकथा समागच्छति वा सखा ॥ 108

शनौ वातुरवृत्तान्तः पुमान्वा मदनाकुलः । 109

---

1. T यक्ष°
2. T1 तथा T2 पाठः । T विवागो
3. T वायो for हय
4. T1 द्रुमन्नि°
5. T1 पाठः । T °नाशो
6. T तथा T1 हनागतः
7. T2 वरा
8. T1 पाठः । T क्षितिजे
9. T शतृ°
10. T° सो अन्यो
11. T वादियते T2 वाधीयते
12. T °रु

A. जीवफले श्लोकपादस्य ग्रन्थपातः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। कन्यायां कन्यांशे वा गतानां सूर्यादीनां फलम् ।

भानौ पश्यन्ति पशवश्च[1]न्द्रे संया[2]न्ति योषितः ॥ 110

अङ्गा[3]रके पशुक्लेशस्सखी वा योषिदा[4]व्रजेत् । 111

[5]चान्द्रौ स्वबन्धुभिः प्रीतिरबलाप्राप्तिरेव वा ॥ 112

जीवे बन्धुजनप्रीतिर्नारी वा सज्जनोऽपि वा । 113

शुक्रे [6]स्यात्पतिता शूद्रा धनिनो वा परान्विताः ॥ 114

सूर्यजे वनिताभेदो [7]वणिग्वा व्यसनान्वितः । 115

। तुलायां तुलांशे वा गतानां सूर्यादीनां फलम् ।

भानौ सखिजनप्राप्तिश्चन्द्रे पक्षी जलाश्रयः ॥ 116

भूमिजे कर्षको ज्ञेयस्तुलायाः पन्नगोऽपि वा । 117

चन्द्रजे पितृपक्षाप्तिर्वनिताः प्रत्ययन्ति वा ॥ 118

गुरौ [8]कलावित्पुरुषः कृच्छ्रमा[9]प्तिर्मिथोऽथवा । 119

शुक्रे लाभार्थिनो [10]मर्त्या महतां वा निवृत्त[11]यः ॥ 120

[12]शनौ वारिगतक्लेशः श्रूयते[13] वा वणिग्जनः । 121

। वृश्चिके वृश्चिकांशे वा गतानां सूर्यादीनां फलम् ।

भानौ लग्ने पशु[14]र्व्यङ्गो ब्राह्मणीन्दौ तु वृश्चिके ॥ 122

क्षितिजे [15]सदसल्लाभो [16]यद्वोपद्रवसम्भवः । 123

चान्द्रौ [17]शत्रुगता वाचो लाभो वा योषितां वरः ॥ 124

गुरौ नष्टकथा नृणां वाणी [18]वानुगुणान्विता । 125

---

1. T °न्द्र
2. T °ति
3. T1 अङ्गरागे
4. T °ता व्र°
5. T चन्द्रौ
6. T स्याप° अथवा स्याव T2 न्यावचिता
7. T1 पाठः वणिग्वा । T पत्रं खण्डितम्
8. T1 पाठः T अस्फुटम् T2 कलौ
9. T2 मासे विधोधवा ।
10. T मत्या
11. T1 पाठः । T °त्तवः
12. T1 शराना वारिगतकेशः
13. T °ति
14. T1 पाठः व्यङ्गो । T अस्फुटम्
15. T1 पाठः T सदनल्लाभो
16. T यद्वादापद्रन°, T2 यद्वा षड्रस°
17. T1 पाठः '' शत्रुगता वाचो इति T अस्फुटम्
18. T1 वा सुगुणान्विता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]शुक्रे मङ्गळ[2]योगस्स्याद[3]र्थनाशकथापि वा ॥ 126

भानुपुत्रे [4]सुखं नार्या बान्धवोत्सव एव वा । 127

। चापे चापांशे वा गतानां सूर्यादीनां फलम् ।

भास्करे[5] वाहनारूढश्चापे चन्द्रे[6] [7]विरोधिता । 128

भूमिजे राज[8]भृत्यस्य नाशो वा दुर्जनैः कृतः ॥ 129

शशिजे [9]वनसंवासिश्श्वित्रिणो वा सयोषितः । 130

वाक्पतौ बलसंयुक्ते पशवो वा [10]धनार्थिनः ॥ 131

भृगावनर्थो बलिभिः कार्यवादिनरोऽपि वा । 132

रविजे[11] गुरुवृत्तान्तः [12]पशवो यान्ति वा पराः ॥ 133

। मकरे मकरांशे वागतानां सूर्यादीनां फलम् ।

रवौ मृगे मृगभयं चन्द्रे पक्षी तु वा मृगः । 134

भूमिजे पक्षिदुर्वाक्यं प्रमदायाति वा परा ॥ 135

बुधे विकारश्रवणं [13]वृषाळिप्रसवोऽपि वा । 136

गुरावर्थयते[14] शस्त्री जलसम्पात एव वा ॥ 137

[15]शुक्रे [16]मत्स्यहरः पक्षी [17]महिषी वा प्रसूयते । 138

सूर्यजे काकदुर्वाचस्तोयसंभव[18] एव वा ॥ 139

। कुम्भे कुम्भांशे वा गतानां सूर्यादीनां फलम् ।

कुम्भे भानौ नरः[19] कामी चन्द्रे त्वातुरसम्भवः । 140

---

1. T शुक्ले
2. T2 यागाः
3. T2 °दर्धं
4. T सुखे नारी
5. T स्करो
6. T तथा T1 °न्द्र
7. T1 पाठः T निरोधिताः
8. T तथा T1 °पुरुषो
9. T1 पाठः वनसंवासिश्शित्रेणिवा इति । T अस्फुटम्
10. T1 जना°
11. T °जो
12. T पशुलो याति वा परः
13. T2 पाठः । T वृषाशि°, T1 वृषानि
14. T °येत
15. T शुक्ले
16. T1 पाठः T मन्महरम् इति अस्फुटतया दृश्यते
17. T2 महर्षिणा
18. T °भा°
19. T1 नवः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षितिजे [1A]सुहृदो दृष्टा दर्शनं देशकस्य च ॥ 141
बुधे गुणवतां प्राप्तिः स्त्रियो [2]वापि धवान्विताः । 142
गुरावायाति बलवान्वाततीक्ष्णान्वितावुभौ ॥ 143
[3]शुक्रे तु पुत्रजन्माप्तिः पशुर्वाम्भःपिपासितः । 144
अर्कजे वर्षनिर्वृत्तिः पुरुषो वा बलान्वितः ॥ 145

। मीने मीनांशे वा गतानां सूर्यादीनां फलम् ।

भानौ मीने द्विजो दुःखी शशाङ्के ब्राह्मणस्त्रियः । 146
[4]कुजे सस्यं पशुर्जातो दृष्टा वा ब्राह्मणस्त्रियः ॥ 147
[5]बुधे नरोऽतिदुष्टात्मा स्त्रियो वा मदनातुराः । 148
[B]गुरौ प्रभुजनः श्रान्तः समाहक्षणमेव वा ॥ 149
[6]शुक्रे स्याद्बलचापार्तिः [7]पिता वा [8]व्यवहारिणः । 150
अर्कजे वर्षचिह्नानि दृश्यन्ते वा जलार्थिनः ॥ 151

। अहोरात्रगतनाडीनां नामफलयोर्निरूपणम् ।

अतः परं प्रवक्ष्यामि [9]लघुहोरां यथाविधि । 152
अहोरात्रस्य नाडीनां प्रत्येकं नाम कथ्यते ॥ 153
[10]सृष्ट्याख्या प्रथमा नाडी प्राच्यां [11]कर्षकलक्षणम् । 154
द्वितीया [12]सिद्धिनामा स्यात्तस्यां कार्यं प्रसिध्यति ॥ 155
याम्यां दिशि तदा शूद्रो दृश्यते जायया सह । 156
तृतीया नाशनाडी स्यान्नाशकार्यं प्रसिध्यति ॥ 157
ऐशान्यां दृश्यते तस्यां महिषीति विदुर्बुधाः । 158

1. T सुहृदो दर्श
2. T वा विधवान्विताः
3. T शुक्ले
4. T कृशस्य पशुरज्जातो
5. T बुधो
6. T शुकस्य for शुक्रे स्यात्
7. T विता
8. T2 पाठः T वान्यहारिणः
9. T2 पाठः T °होरा
10. T1 सृष्ट्यात
11. T2 कर्षण°
12. T सिद्ध°

A. T मातृकायां ''सुहृदो दर्श'' इत्यस्मात्परं अक्षरत्रयलेखनपर्याप्तं स्थानं परित्यक्तम् ।
B. T गुरौ प्रभुजनस्य प्रभवाश्रान्तप्रभवः समहक्षणमेव ॥ T1 त्रभव for प्रभव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थी मित्रनामा स्यान्मित्रकार्यं प्रसिध्यति ॥ 159

वारुण्यां मृगदृष्टिः [1]स्यादथवा श्वानगर्जितम् । 160
पञ्चमी जीवसंज्ञा स्यात् स्थापनादीनि योजयेत् ॥ 161

आग्नेय्यीं दिशमाश्रित्य दृश्यते काष्ठधारकः । 162
षष्ठी तु विहगा[2]नामा व्यवहारादि सिध्यति ॥ 163

नैर्ऋर्ती दिशमाश्रित्य [3]गान्धर्वं श्रूयते तदा । 164
सप्तमी [4]कीटनामात्र कृषिकार्यादि सिध्यति ॥ 165

उत्तरां दिशमाश्रित्य दृश्यते धान्यधारकः । 166
अष्टमी [A]पत्निनामात्र मारणो[5]च्चाटनक्रिया ॥ 167

पूर्वस्यां दिशि [6]या काचित् सह पुत्रेण दृश्यते । 168
नवमी शत्रुनामात्र शत्रुनाशादि लभ्यते ॥ 169

नैर्ऋत्यां दिशि दृश्यन्ते गौळिकाः शोकधारिकाः । 170
दशमी व्याधिनामात्र[B] ----------------- ? ॥ 171

एकादशी [7]पशुनामा पश्वा[8]दिर्यत्र सिध्यति । 172
नैर्ऋतिं दिशमाश्रित्य पुरुषः कोशधारकः ॥ 173

त्रयोदशी शूद्रनामा याम्यां शूद्रस्य दर्शनम् । 174
चतुर्दशी [9]नावं[C]गरा नाम[D] ----------- ? ॥ 175

---

1. T1 °वथवा for °दथवा
2. T नाम
3. T गन्धर्वं
4. T2 पाठः । T कीट इत्यत्र अस्फुटम्
5. T2 °च्छाटन
6. T का, T2 वा, T1 रौ
7. T पश्य
8. T2 °दीत्यत्र
9. T1 नावरगरनाम

A. अत्र पत्रिनामा इति युक्तं भाति

B. अस्मात्परं मातृकात्रयेऽपि स्थलं रिक्तं दृश्यते ।

C. अत्र नागरनामा इति युक्तं भाति

D. अहोरात्रगतनाडीनां प्रत्येकं नाम कथ्यते इति प्रतिज्ञातम्, किन्तु ग्रन्थे चतुर्दशनाडीनां नामानि दृश्यन्ते। तत्रापि द्वादश्याः नाड्याः प्रस्ताव एव नास्ति । ग्रन्थपातः स्यात्? यद्यपि उदाहृते सारोद्धारग्रन्थवचने षष्ठिनाडीफलानि स्युः तथापि अस्फुटत्वात् विभागकरणं दुष्करम्। अस्मात्परं मातृकात्रयेऽपि स्थलं रिक्तं दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ सारोद्धारः ॥

सृष्टिसिद्धीत्यादिघटिकानामा[1]नि विहाय फलं लक्षणं च कथ्यते ।

॥ फलम् ॥

कर्षकः शूद्रमिथुनं महिषीमृगदारकः । 176
गान्धर्वधान्यभक्ष्याणि ससुता स्त्री च गौळिका ॥ 177

निर्ध्वनिर्गौळिकाशब्दः [2A]सस्यालीनः फलध्वनिः । 178
भेरी पश्वादिमिथुनं ताम्बूली भेरिकुक्कुटौ ॥ 179

खगो धान्यं खगः पक्षी स्वतक्री पञ्चविंशकः । 180
गानं मांसं [3]वृषः कोशो गन्धो गोबन्धनो नरः ॥ 181

[4]पक्षी पक्षी सारमेयः पतत्रिगौंळिकास्वरः । 182
ना दारुदार आकाशो हिदिर्वेश्या च कीटकः ॥ 183

सारमेयो नराक्रोशः कान्ता गौः श्वान एव च । 184
दुःस्वप्नाकाशानिलो वृष्टिक्रोशोऽनिलस्वनः ॥ 185

व्या - [5]शब्दो ध्वनिः ।

वृषभो मूषिका[6]गाव[7]श्चाक्रोशस्तुरगध्वनिः । 186
पक्षी[8] वेधो जनारावो जयेति [9]स्वस्ति वागपि ॥ 187

एतेषामुपलब्धिः [10]स्यान्नाडीषु प्रथमादिषु । 188
प्राच्यादिदिशि[11]दृष्टास्तद्दिक्षु सव्येना[12]कादिभिः ?॥ 189

कुले शारितरं [13]सङ्घे यदा तस्मिन् [14]लसाद्रधे ?। 190
माता [15]सेव्यजरापित्ते मांसदं वृषणेऽहनि?॥ 191

---

1. T नामा विनिहाय
2. T2 स्सहीना T1 स्सलेना
3. T वृषा T1 वृवृषा for वृषः
4. T1 पक्षी for पक्षी पक्षी
5. T शबदनः T2 शब्दध्वनिः, शब्दो ध्वनिः, शब्दनो वा
6. T2 पाठः, T गान
7. T1 °श्वाक्रोश°
8. T2 पाठः T वेदो
9. T स्वस्त°
10. T स्यान्नाडीधु
11. T1 दृष्ट्चा
12. T °नाकार्दिभिः T1 °नाकाधिभिः
13. T2 पाठः, T सङ्घ
14. T1 पाठः T अस्फुटम्
15. T मातासि T1 मातामे or मातादे

A. सस्यहीना इति भाति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यथा भागं क्वचिद्दाये गोमाद्यो[1] सा [2]तथाविधे ? 192
समयामययो[3]ग्राथे गोवशी सङ्गकेशिनी ?॥ 193

॥ इति नाडीलक्षणम् ॥

। मेषराशिफलम् ।

मेषराशौ पशुर्वार्ता राजनिद्रे वणिक्स्त्रियौ । 194
द्विजभिक्षू[4] वणिच्छूद्रौ [5]जलपक्षिपती क्रमात् ॥ 195

। वृषराशिफलम् ।

वृषे रक्तः कुमारीशौ [6]ब्राह्मण्यौ [7]नौकपक्षिणौ । 196
[8]शूद्रो विप्रो द्विजः शूद्रः कृष्ण[9]स्तेयो गळध्वनिः ॥ 197

। मिथुनराशिफलम् ।

मिथुने [10]गायकोऽर्थार्थी बन्धुविप्रौ सुगर्वितौ । 198
दारा[11]म्बुजे शत्रुकान्तौ पुत्रजन्मारिसङ्गमौ ॥ 199

। कर्कटराशिफलम्।

कर्कटे द्रविणं नारी खगनाड्यौ धनिस्त्रियौ । 200
कलहः [12]प्रसवो लाभः पक्वं [13]गौः कुलटा भवेत् ॥ 201

। सिंहराशिफलम् ।

सिंहे पशुः स्त्री विहगो न शत्रुः कन्यकाविदौ । 202
[14]विशोकब्राह्मणो [15]बन्धु[A]कथा व्यथितकार्मुकौ ॥ 203

---

1. T2 °द्योऽसो
2. T तथाविदे T1 ददाविदे
3. T2 °ग्राढे
4. T °भिक्षो
5. T1 जलव°
6. T1 ब्राह्मण्यो
7. T नौता° T1 नौत°
8. T शूद्र
9. T2 पाठः T °स्ते मङ्गलध्वनिः
10. T1 शयको
11. T °म्बुजौ शत्रुं
12. T1 पाठः T प्रसलो
13. T कौ
14. T विरोचब्रह्मणो
15. T बन्धुःकधे for बन्धुकथा

A. द्रविडान्ध्रदेशीयप्रतिलिपिकारेषु थ - धवर्णयोः लेखनं समानम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। कन्याराशिफलम्।

[1]षष्ठ्यां पशुविनाशः स्त्री गोसङ्घो[2] बन्धुपौष्टिकौ । 204
बन्धुस्त्रियौ धनी शूद्रे त्रिदेवद्रविणं[3] क्रमात् ।। 205

। तुलाराशिफलम् ।

सप्तमे बान्धवः पक्षी [4]कृष्णसर्पः पितृस्त्रियौ । 206
जलाहाम्बुभियौ[5] वापी पक्षिणो[6] वणिगम्बुनी ।। 207

। वृश्चिकराशिफलम्।

वृश्चिके शस्त्रिरजसी रोगसर्पावरस्त्रियः । 208
[7]नष्टकष्टे सौख्यनाशौ बान्धवोत्सव[8]पोषणौ ।। 209

। धनूराशिफलम्।

चापे लाभश्शत्रुबाधो राजनाशो [9]सुतस्त्रियौ । 210
अम्बु गावो पुरनरौ पशुवृत्तान्तनागरौ ।। 211

। मकरराशिफलम्।

[10]मृगे मृगभयं पक्षी खगनार्यौ सुतस्त्रियौ । 212
शस्त्राम्बुनी मत्स्यखगौ [11]वयस्याम्बुजसम्पदौ ।। 213

। कुम्भराशिफलम्।

[12]कुम्भे कामी व्याधितसः सुहृद्द्वेष्टः गुणिस्त्रियौ । 214
[13]पिपासुर्बलिनौ पुत्रः पुत्रजन्म[14]कथाम्बुनी ।। 215

। मीनराशिफलम् ।

मीने विप्रो ब्राह्मणस्त्री चर[15]स्त्रियौ तु गोस्त्रियौ । 216

---

1. T षष्ठी
2. T °ख्या
3. T °जौ
4. T2 पाठः T कृषिसर्वं°
5. T जलाहाम्बुभियापि
6. T दक्षिणो
7. T नष्टाष्टौ सुखनाशा च for नष्टकष्टे सौख्यनाशौ T1 सखनाशा
8. T2 पाठः । T °षोषणौ
9. T स न
10. T मृगो
11. T वयसा°
12. T कुम्भकामी
13. T विवासु°
14. T कदा°
15. T1 पाठः °रोस्त्रियौ T पत्रं खण्डितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृष्टिः [1]श्रान्तो बली भारभृतौ बलपयोधरौ ॥ 217

अर्कादीनामुदयोऽथ [2]नवेशास्तु नवांशकैः । 218

द्रेक्काणद्वादशत्रिंशत्सप्तांशैर्वा बलान्वितैः ॥ 219

दिग्वर्ण[3]स्थानकालादि[4] ग्रहराशिबलाबलम् । 220

अन्वीक्ष्य लक्षणं वाच्यं न सर्वेषां तु संवदेत् ॥ 221

॥ इति काललक्षणम् ॥

। प्रष्टारूढराशिसन्देहे तत्परीक्षाप्रकारमाह ।

। अष्टमस्थशनिफलम् ।

[A]अतीतमन्दवारे तु[5] कालातिक्रम[6]भोजनम्। 222

अत्यापच्च [7]व्यतीतेऽह्नि मन्दे त्वष्टमसंस्थिते ॥ 223

। अष्टमस्थरविफलं तथा धात्वाद्यंशगतरविफलम् ।

[B8]रन्ध्रेऽर्केऽनर्थकलहौ रविस्थांशफलं पुनः । 224

[C]धात्वंशे द्रव्यनाशः[9]स्यान्मूले जीवे नृपाद्भयम् ॥ 225

व्या - आरूढाद्रन्ध्रेशेनापीत्यर्थः[10] । सार्धे पापेऽपि वा फलम् ।

[11]रन्ध्रेऽर्केऽनर्थ[12]कलहौ मूलांशे व्रीहिनाशनम् ॥ 226

[13]जीवांशे राजतोऽ[14]पत्स्याच्चतुष्पात्स्थे भयं ततः । 227

गते रविदिने योज्यं फलमेतदसंशयम् ॥ 228

---

1. T1 श्रान्ता
2. T1 नवेपो
3. T वर्न दोति
4. मातृकात्रयेऽपि ग्रन्यपातः
5. T ते
6. T °क्रमतेजनम् T2 °क्रमतेजसम्
7. T व्यतीताते त मन्द
8. T रन्ध्रेकौ र्ध कालहो T1 रेन्ध for रन्ध्रे
9. T धात्वंशे द्रव्यनशस्य भाक्.......। ग्रन्थपातः.
10. T °त्यर्ध
11. T रन्ध्रेऽर्धे
12. T नर्धकलहौ
13. T जीवांश
14. T °वश्या°

A. द्र.प्र. मा. २.९१ अष्टमस्थे रवेः पुत्रे वाच्यं भुक्तिविलम्बनम् ।
अत्यापत्तिश्च मन्दस्य समीपस्थे गतेऽहनि ॥

B. द्र.प्र. मा. १५० तथा द्र.प्र.मा २.८१ ।

C. द्र.प्र. मा. १५१ क्रमाद्धात्वाद्यशैर्धनयुवातिहतिर्भूपतिभयम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। अष्टमस्थस्य तथा धात्वाद्यंशगतस्य चन्द्रस्य फलम् ।

[A]चन्द्रेऽष्टमे तूपवासो यवागूपानमेव वा । 229
गतसोमदिने योज्यमित्थं [1]धात्वादिजं फलम् ॥ 230

। अष्टमस्थस्य तथा धात्वाद्यंशगतस्य कुजस्य फलम्।

[B]रन्ध्रे कुजे पदभ्रंशो भङ्गः स्यान्मान्दिना[2] युते । 231
धात्वंशस्थे [3]त्वायुधेन मूलांशस्थे तु कण्टकात् ॥ 232
[C]भङ्गो नखेन जीवांशे [4]सर्पदंशात् सरीसृपे । 233
मरिच्चु कोम्बुतान् कोण्डु चतुष्पादंशमाकिलो ॥ 234
द्विपात्तंशकमाणंगिल् नखं गोण्डु [5]मुरिश्चिडाम् । 235

। अष्टमस्थस्य तथा धात्वाद्यंशगतस्य बुधस्य फलम् ।

[D]इष्टकर्म[6]विनाशो ज्ञे रन्ध्रेऽतीतज्ञवासरे ॥ 236
[E7]ताम्बूलनाशोऽभावो वा वाक्पारुष्यं तनौ रुजा । 237
भवेत्तस्यैव[8] कलहे [9]रक्तं कोण्डार्तियुं वरुम् ॥ 238

। अष्टमस्थस्य तथा धात्वाद्यंशगतस्य जीवस्य फलम् ।

[F]जीवेऽष्टमे द्रव्यनाशः[10]मूप्पान्वैकुं द्विजन्मनः । 239
[G]धात्वाद्यंशं कालहोरां गुरोर्निर्धार्य[11] निर्दिशेत्॥ 240

---

1. T ध्या°
2. T मान्दिता
3. T त्वयुद्धेक
4. T2 सर्वं T मरिच्चि कोम्बुकोण्डेन् त चतुष्पान्तशेमात्विलो।
5. T मूरि येन तिरिये मेड T1 मुरि यणत्तिरिय
6. T °कम
7. T1 ताम्बूली
8. T1 तस्मैव
9. T रक्तमुण्डे मार्ते युमवरुम्, T2 युं मवरुं
10. T मुप्पान्वैकुं for संध्यात्यागो
11. T निर्धत्य

A. द्र.प्र.र. १५२ तथा द्र.प्र.मा. २.८२
B. द्र.प्र.र./द्र.प्र.मा. १५३ तथा २.८३
C. द्र.प्र.मा. २.८४
D. द्र.प्र.र. १५४ तथा द्र.प्र. मा २.८५-८६
E. द्र.प्र.र. १५५-१५६ भवेद्वाक्पारुष्यं द्रविणरुधिरजातं कलहतः । स्वसन्ध्यातिक्रान्तिर्द्रविणविहतिर्वा सुरगुरौ ।
F. प्र. मा २.८७ रन्ध्रस्थितेऽमराचार्ये नित्यकर्मविलम्बनम् । द्विजानां द्रव्यनाशो वा वाच्यं गुरुदिने गते ॥
G. द्र.प्र.र. १५७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। अष्टमस्थस्य तथा धात्वाद्यंशगतस्य शुक्रस्य फलम्।

[A]इष्टस्त्रीविरहो रन्ध्रे शुक्रे बन्धुविनाशनम् । 241
[B]धृतवस्त्रे पङ्कयोगो गतशुक्रदिने फलम् ॥ 242
शुक्रे धात्वंशकगते [C]पीतं कुन्निं चोरे निर्नियम् । 243
मूलांश[1]शुक्रे काष्ठेन वस्त्रे छिद्रं भविष्यति ॥ 244
[2]जीवांश[3]मागिलाताणुं [D]कोड्डुतुष्पो न संशयः । 245
[E]द्विपात्तंशक [4]मालो नखं [5]रौप्योपाम् ॥ 246
[6]सरीसृपांश मारुं [7]रोलमूषिकं तानिश्चयम्बुतान् । 247
[8]पेण्डिलि तु साच्युत नैय्युं [9]वस्त्रमन्नं न संशयः ॥ 248

। अष्टमस्थस्य तथा धात्वाद्यंशगतस्य राहोः फलम्। तत्समानं शनेश्च फलम् ।

[F10]गतार्किवारे रन्ध्रेऽह्नौ[11] [12]पादयोः कण्टकव्यथा । 249
धात्वंशे स्खलनं पादे मूलांशे [13]कण्टकव्यथा ॥ 250
जीवांशे सर्पभीतिः स्याच्चण्डालैर्योग एव वा । 251

। अष्टमस्थकेतुफलम् ।

रन्ध्रे केतुर्यदि भवेच्छिलया स्खलनं [14]पदे ॥ 252
यदि मान्दियुतः केतुः पादभेदो भविष्यति । 253
[G15]अंशभेदात्फलं वाच्यं कुजेऽह्नि शिखिजं [16]फलम् ॥ 254

---

1. T शुक्ले T1 मूलांशशुक्ले T2 मूलाङ्क शुक्ले
2. T जीवंश
3. T1 °माकिल°
4. T1 मांवो T2 मांळो
5. T1 कोष्पापां T2 कोण्ड्रोपों
6. T सरीस्सपां°
7. T1 पोल
8. T1 वेल्लितु
9. T1 पस्त्रमन्नुं
10. T1 गतार्के
11. T1 °हे
12. T1 तथा T2 पदयोः
13. T1 कर्कट T2 कण्डक°
14. T पादे
15. T2 पाठः T तथा T1 अम्भेदात्
16. T फलौ इत्यस्फुटम्

A. प्र. र. १५८ तथा द्र. प्र. मा. २.८८-९०
B. द्र. प्र. र. १५९
C. ''कीलोपेतं कुट्टिं चीरे निर्नयम्'' इति वा
D. कोण्डुपों for कोण्डुतुष्पो इति वा ।
E. द्विपात्तंशकमायालो इति वा
F. द्र.प्र.र. १६०-१६४ तथा द्र.प्र.मा. २.९२-९४
G. द्र.प्र. र. १६५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[A]एवं द्वादशभिभवैस्तत्तद्योगं फलं वदेत् । 255
[B1]मूनुमारुं पन्दिरण्डुमष्टमं [2]कष्टमायिङुम् ॥ 256

व्या - [3]द्विपुनरित्यनन्तरं [4]वक्ष्यते इति शेषः । भयं ततश्चतुष्पाद्भ्यो भयं वदेदित्यर्थः । व्ययषष्ठतृतीयभावा नेष्टा यथाष्टमः । [5]एतत्सर्वं अतीतरविवारे योज्यमिति । प्रातरेव यवागू[6]पानमिति केचित् । एतत्सर्वमतीते [7]तत्तद्वारे योज्यमिति ।

। लग्नारूढाभ्यामशुभप्रश्नचिन्तामाह ।

[8]संहारर्क्षं तदंशो वा पापैः दृष्टो युतोऽपि वा । 257
प्रश्नस्तु [9]न शुभो लग्नारूढाभ्यां तुल्यमादिशेत् ॥ 258

व्या - अत्रारूढं प्रधानत्वेन ग्राह्यं किल ।

। भूतभाविफलचिन्ता तथा भूमिमध्याकाशग्रहफलचिन्ता ।

पापा भूतं फलं [10]प्राहुः शुभा भाविफलं तथा । 259
पापा भूमिग्रहाश्चन्द्रबुधौ मध्यग्रहावुभौ ॥ 260
गुरुशुक्रौ तथाकाशग्रहाविति विनिश्चितौ । 261
[11]तनैनाळियाळ शैयुटे ग्रहस्थिति पिळे किलो ॥ 262
आरूढ[12]त्तिन्नकोळुं पोळाक [13]ततैनाळ् ध्रुवम् । 263
पित्तनाळै व्याळावुडे ग्रहस्थिति पिळै किलो ॥ 264
उदिच्च्या क्कोक्कु पोळ पिररै नाळे पिळै शोल्लु । 265
काकि पेच्चड मारुदान्मलेळ्ळु मन्नुदयात् फलम् ॥ 266

1. T2 मुनि मारुं
2. T2 कष्टमाय
3. T2 द्विप्र
4. T2 पाठः T वक्ष्यते त इति
5. T1 तत्सर्वम् अरित॰ T एतत्सर्वम् अरित॰
6. T पन॰
7. T तत्तद्वरो T1 तद्वारो
8. T संहारक्ष
9. T न शभो
10. T1 प्राहुः शुभा भावि फलम् इति ग्रन्थपातः
11. T1 तवै
12. T1 त्तिण्ण कोड्डुं
13. T1 तलैनाळ् ध्रवम्

A. द्र.प्र.र. १६६
B. द्र.प्र.र. १६७ मूनुमारुं पन्दिरण्डुम् इति वा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। कर्म-भोग-विनाशान् तथा धातु-मूल-जीवनानि क्रमेण द्रेक्काणेषु नवांशकेषु च कल्पयित्वा फलकथनम् ।

[1]कर्म [2]भोगं विनाशं च [3]धातुं मूलं च जीवनम् । 267
कल्पयित्वा फलं ब्रूयाद्द्रेक्काणेष्वंशके[4]ष्वपि ॥ 268

कर्मधातुः कर्ममूलं कर्मजीव इति क्रमात् । 269
भोगधातुर्भोगमूलं भोगजीव इति क्रमात् ॥ 270

विनाशधातुरित्यादि योजयित्वा विचिन्तयेत् । 271

॥ प्रष्टुः प्रश्नफल[5]प्रत्ययार्थं तदनुभूता[6]न्यनेकानि लक्षणानि वदेदित्याह ॥

शुक्रारवर्गे योगेऽङ्गे स्यात्प्रष्टा पारदारिकः । 272
पुनर्भूनायकः शुक्रे कन्यागामी बुधेड्ययोः ॥ 273

व्या - अङ्गे - लग्ने । शुक्रभौमयोः षड्वर्गोदये शुक्रारयोः संयुतयोरुदये वा तयोः [7]सप्तमस्थयोर्वा, प्रष्टा पारदारिक इति वाच्यम् । शुक्रारवर्गस्थितशुक्रोदये पूर्वं सदोषा स्त्री पुनः [8]प्रष्ट्रा गृहीतेति वाच्यम् । शुक्रार्कवर्गे बुधजीवयोरुद्गच्छतोः पश्यतोर्वा कन्यादूषकः । 272-273 ।

[9]तत्रार्के राजभार्यायाः शुक्रेऽस्ते श्रीविदृक्पतिः । 274
[10]शुक्रेन्द्वोरस्तगतयोर्धनकामान्वितापतिः ॥ 275

मन्देन्दुवर्गे [11]जारेशो [12]जीवेन्द्वोः श्रीमतीपतिः । 276
[13]धन्यो बुधेन्द्वोर्भौमेन्द्वोर्मातृहीनोऽर्कजारयोः ॥ 277

क्रूरः कुजज्ञयोः [14]रक्षाकारी मल्लोऽच्छभौमयोः । 278

---

1. T क्रमन्
2. T1 पाठः । T भोगविनाशं
3. T धातुमूलं
4. T1 °ष्वधि
5. T °वृत्य T1 °वृत्यायात्यं
6. T °नेलभूतानि लक्ष°
7. T1 सप्तमस्थयोः इति ग्रन्थपातः
8. T प्रष्टा
8. T तत्रार्के भारात् भार्याहात् इति विद्यमानं व्याख्यया शोधितम् ।
10. T शुक्रे रगस्तगतयोर्धनक्रमान्वितां पतिः इति विद्यमानं व्याख्यया शोधितम् ।
11. T दारेशो जीवेद्रो श्रीमपतिः इति विद्यमानं व्याख्यया शोधितम् ।
12. T2 पाठः । T1 द्विजन्द्वोः । T जीवेद्रो
13. T धन्ये बुधे द्वो भौनिमेन्द्वोः इति विद्यमानं व्याख्यया शोधितम् ।
14. T रक्षाकाशी द्र.व्या.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौरेन्दुभ्यामानृतिकः पितृहीनः कुजार्कयोः ॥ 279

धर्मे जीवार्कयोस्तातः श्रीमान् साध्वी [1]पुरोधसोः । 280

[2]मन्देन्द्वोर्जननी दुष्टा भार्या मन्दाब्जयोर्भवेत् ॥ 281

पितृमातृजनैः पूज्यो रवीन्द्वोः पितृयोगयोः । 282

व्या - तत्रार्क इति शुक्रार्कवर्गेऽर्कयुतेऽर्कदृष्टे वा राजभार्यापतिः । अर्कवर्गेऽर्कयुतदृष्ट इत्यन्ये । शुक्रे रवौ वा सप्तमस्थिते [3]श्रीविदृक्पतिः । श्रीश्च [4]विगत[5]दृष्टिश्च यस्याः सा [6]श्रीविदृक्, तस्याः पतिरित्यर्थः । [7]समृद्धायाः दुर्बल[8]नेत्रायाश्च पतिः प्रष्टेति यावत् । शुक्रचन्द्रयो[9]स्सप्तमस्थयोरपि प्रष्टा धनकामसमन्वितायाः पतिरित्यर्थः । मन्दे द्वितीये मन्देन्दुवर्ग उद्यति मन्देन्द्वोरुद्यतोर्वा जारिणीपतिः । जीवेन्द्वोर्वर्गे मिश्र [10]उद्यत्युत्साही [11]आढ्यायाः पतिर्वा । [12]प्रष्टा [13]प्रतीक्षकः । तस्य माता च दुःशीला । बुधशशिवर्गे लग्नगते धन्यः । शशिकुजयोर्वर्गे योगे वा लग्नस्थे [14]मातृहीनः । चन्द्रे च बलिनि रुग्णमातृकः । कुजवर्गे मन्देन [15]सहोद्गच्छति क्रूरः [16]प्रष्टा । कुजवर्गे बुधेन सहोद्गच्छति रक्षाकारिपुरुषः । शुक्रेण सहोद्यति मल्लः [17]प्रष्टा । सौरेन्दुभ्यामिति । कुजवर्गे सौरेन्दुभ्यां सहोद्यति [18]आनृतिकः। कुजार्कयोर्वर्गोदये योगे वा पितृहीनः । नवमे जीवार्क[19]योगे पिता सम्पन्नः । गुरुशुक्रवर्गोदये तौ लग्ने सप्तमे वा एकराशिगतौ चेत्तस्य भार्या [20]साध्वाचारा । मन्देन्द्वोरिति - [21]भार्येत्यत्रापि दुष्टेत्यनुषङ्गः । 274- 282 ।

॥ प्रष्टुरनुभूतार्थकथनात् [22]प्रष्टृविस्माप[23]नार्थं केत्वादिचारमाह ॥

[A]पुरतोऽर्काच्चतुर्थेशः केतू राहुश्च पृष्ठतः । 283

1. T1 पुरोधसाः T2 प्ररोधसोः
2. T मन्देन्दो, मन्दाब्जयो
3. T श्रीविद्रेक्पतिः
4. T1 विगतदृष्टिश्च इति ग्रन्थपातः
5. T2 पाठः T °दृष्टेश्च
6. T2 पाठः T श्रीवविद्रक
7. T समृद्धा वा
8. T °नत्रा°
9. T1 °स्ससमस्थयोः इति ग्रन्थपातः
10. T इद्य°
11. T आढ्या वाः
12. T2 पाठः T पृष्टा
13. T पतिच्छकः
14. T2 मानृनः
15. T सहे गच्छति
16. T पृष्टा
17. T पृष्टा
18. T1 आनृति इति ग्रन्थपातः
19. T °योगो विता
20. T1 साद्ध्यवार
21. T भाव्ये
22. T2 पाठः T प्रष्ट °
23. T °न्ना°

A. द्र.प्र.र. १६८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - काल्पनिकश्चायं चारः, यो राशिरर्केणानुभूयते मेषादिः ततश्चतुर्थः [1]कर्कादिः केतुक्षेत्रम्। पृष्ठतश्चतुर्थो मकरादी राहुक्षेत्रम्। तत्र प्रसिद्धकेतुलग्ने [2]कल्पिते तत्क्षेत्रलग्ने वा राशिविशेषात्, ग्रहविशेषयोगाच्च फलान्युच्यन्ते। अत्र प्रकरणे केतुराहुशब्दौ प्रसिद्धयोस्तयोः कल्पिततत्क्षेत्रयोर्यथोचितम् अभिधायकौ। 283।

। सूर्यक्षेत्रे केतुराशौ लग्ने सति तत्फलम्।

[A]रविक्षेत्रोदये केतु[3]र्नृपपूजायसम्पदः ॥ 284

। मन्दक्षेत्रं केतुराशिर्भूत्वा लग्नं चेत्तत्फलम्।

स्थानार्थ[4]पुत्रान् कुरुते [5]मन्दक्षेत्रोदये शिखी। 285

। शुक्रक्षेत्रे केतुराशौ लग्नगते तत्फलम्।

[6B]शौक्रे मान्दफलं ज्ञातिभयं युवतिनाशनम् ॥ 286

। कुजक्षेत्रं जीवक्षेत्रं वा केतुराशिर्भूत्वा लग्नं चेत्तत्फलम्।

[7C]कौजे मान्दं च सायासं[8] [9]जैवे रुग्गृहदाहकौ। 287

। चन्द्रक्षेत्रं वा बुधक्षेत्रं वा केतुराशिर्भूत्वा लग्नं चेत्तत्फलम्।

[10D]राजभीः सुतहा [11]चान्द्रे [12]बौधे वस्त्रधन[13]क्षयौ ॥ 288

। केतुराशौ चन्द्रगुरुशुक्राश्चेत्तत्फलम्।

[1E]आज्ञापूजे सुहृत्सम्पत्स्त्रीलाभान् सुतसम्पदौ। 289

[14F]केतुक्षेत्रे सहोद्यन्तः [15]कुर्युश्शुक्रेन्दुमन्त्रिणः ॥ 290

---

1. T कन्यादि
2. T °त for ते
3. T नृप° for नृप
4. T °पुत्रवान्
5. T तथा T1 मातृकायां मन्दक्षेत्रोदये इत्यस्मात् परं अक्षरचतुष्टयलेखनस्थानं रिक्तं दृश्यते।
6. द्र.व्याख्यया उद्धृतं ''शाक्रे'' इति
7. T1 कौमान्दं द्र.व्या.। T कामान्धं
8. T द्र.व्या.सायास
9. T व्याधिरुग्रह°
10. T राजिभस्सु°
11. T च°
12. T1 बाध
13. T1 °क्षयाः
14. T1 पाठः ''केतुक्षेत्र'' इति T पत्रं खण्डितम्।
15. T कुर्या°

A. द्र.प्र.र. १७०
B. द्र.प्र.र. १७१
C. द्र.प्र.र. १७२ प्रश्नरत्ने जैवफलं दृष्ट्वा जैवमिति व्याधिपदस्थाने लिखितम्। व्याख्यायां जीवक्षेत्रे व्याधिरुग्गृह इत्येव दृश्यते।
D. द्र.प्र.र. १७३
E. द्र.प्र.र. १७५
F. द्र.प्र.र. १७४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। केतुराशौ गर्भदगर्भघ्नग्रहचिन्ता ।

[A]गर्भदोऽत्र सशुक्रेन्दुर्गर्भघ्नस्सार्किभूसुतः । 291
[B]शुक्रेड्ययुक्तचन्द्राढ्यो गर्भदो जातको बली ॥ 292

। केतुराशिस्थबुधात् वातरोगितनयादेः चिन्ता ।

[C]वातार्तस्तनय[1]स्सज्ञो यात्रा भार्याजितं [2]गृहम् । 293

। केतुराशिस्थशुक्राङ्गारकजन्यफलचिन्ता ।

[D]साच्छस्त्रीभुक्तिर्गर्भार्ति[3]र्बन्धार्तिर्वित्तहा कुजे ॥ 294

। शनियुतकेतूदयजन्यं, कुजदृष्टकेतूदयजन्यं च फलम् ।

[E][4]सार्कौ दाहार्थ[5]रोधौ स्तः कुजदृष्टेऽन्यया युतिः । 295

। शुक्रशनिदृष्टकेतूदयफलम्।

[F]शुक्रे [6]रहस्यकथनं शनिदृष्ट्या निकृष्टया ॥ 296

। कुजगुरुदृष्टकेतूदयफलम् ।

[G]गुरुव[7]ध्वात्रारदृष्टे [8]भूषालाभोऽत्र मन्त्रिणा । 297

। बुधगुरुशुक्रदृष्टकेतूदयफलम् ।

[H][9]बुधेड्यशुक्रदृष्टेऽत्र जागरस्त्रीविवादभाक् ॥ 298

। जीवक्षेत्रे पापयुतकेतूदयस्य फलम् ।

जैवे पापयुते चोरदूषणस्त्रीरुजागतिः । 299

व्या - रविक्षेत्र इति - सिंहे केतुराशौ लग्नगते, लग्नद्रेक्काणक्रमेण नृपपूजादीनि त्रीणि। मन्दक्षेत्र इति - मकरः कुम्भो वा मन्दक्षेत्रं, तत्र स्थानलाभादीनि त्रीणि। [10]शौक्र इति -

---

1. T °स्तज्ञो°
2. T ग्रहम्
3. T बन्ध्वात्यर्थभाक् द्र. व्या.
4. T सार्का द्र.व्या.
5. T °कोदौ द्र.व्या.
6. T रहसि
7. T2 °वध्वात्वा°
8. T भ्रष्टा° द्र.व्या.
9. T बुधस्य T1 भधेस्य द्र.व्या.
10. T शाक्र

A. द्र.प्र.र. १७६-१७७
B. द्र.प्र.र. १७८
C. द्र.प्र.र. १७९
D. द्र.प्र.र. १८०-१८१
E. द्र.प्र.र. १८२
F. द्र.प्र.र. १८३
G. द्र.प्र.र. १८४
H. द्र.प्र.र. १८५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुक्रक्षेत्रे केतुराशौ लग्नगते पञ्चधा कृते मन्दराश्युक्तफलत्रयमादितः, ततश्चतुर्थे ज्ञातिभयं, पञ्चमे युवतिनाशः । कौज इति - कुजक्षेत्रे चतुर्धा कृते आदितो मन्दराश्युक्तफलत्रयं, स्थानार्थपुत्रलाभाख्यं चतुर्थे आयासयुतं फलम् । जैव इति जीवक्षेत्रे व्याधि[1]रुग्गृहदाहौ। राजेति - चान्द्रे - कटके । [2]आज्ञेति - शुक्रेन्दुजीवाः क्रमेण पदत्रयफलानि कुर्युः । गर्भदोऽत्रेति - अत्र गुरुचन्द्रबुधभवने [3]शुक्रचन्द्रान्यतरयुतकेतूदये गर्भः स्यात् । अत्र गुरुचन्द्रबुधभवने सौरभौमान्यतरयुतकेतूदये गर्भनाशः । चन्द्रयुतस्य [4]केतोः [5]गुरुशुक्रान्यतरयुक्तस्योदये गर्भः स्यात् । तत्र जातो बलवान् निरोगश्च भवति । वातार्त इति - बुधयुतकेतूदये [6]पुत्रस्य वातरोगः स्यादिति वदेत् । तव देशान्तरगमनं, तव भवनं [7]स्त्रियापहृतमिति च वदेत् । शुक्रयुतकेतूदये स्त्रीलाभो भोजनं गर्भनाशश्च त्रीणि स्युः । द्रेक्काणक्रमेण भौमयुतकेतूदये बन्धनमरणस्वर्णनाशास्त्रयः, तथाग्निभयं वात्रेति केचित्। सार्कीति - शनियुत[8]केतूदये [9]गृहदाहार्थरोधौ स्याताम् । कुजदृष्टकेतूदये परस्त्रीसङ्गतिः । शुक्रक्षेत्रे शुक्रांशके वा स्थितस्य केतोरुदये रहस्यकथनं, तत्रैव शनिदृष्टकेतूदये निकृष्टया सङ्गतिस्स्यात् । गुरुस्त्रियेति - अत्र [10]शुक्रर्क्षे तदंशे वा भौमदृष्टकेतूदये गुरुस्त्रिया[11] सङ्गमः। तत्र शुक्रक्षेत्रे तदंशके वा मन्त्रिणा युतस्य दृष्टस्य वा केतोरुदये भूषणलाभः । शुक्रक्षेत्रे तदंशके वा बुधगुरुशुक्रदृष्टकेतूदये स्त्रीविरहेण जागरणं विवादो वा स्यात् । जैव[12] इति - जीवक्षेत्रे तदंशके वा पापयुतकेतूदये चोरागमनं दूषणं पत्नीरोगो विदेशगमनं [13]चेति चत्वारि फलानि भवन्तीति वदेत् । 284-299 ।

॥ अथ राहुचारफलम् ॥

। कुजयुतराहूदयस्य मन्दयुक्तराहूदयस्य च फलम् ।

[A][14]सारेऽहिराशौ लग्नेऽर्थवियोगोऽप[15]चयो भवेत् । 300
मन्दयुक्ते पूर्वफलं गर्भनाशं च कीर्तयेत् ॥ 301

1. T °रगृह°
2. T आञ्जे °
3. T °चन्द्रान्यतरबुधकेतू°
4. T केता T2 केत्वा
5. T1 गुरुक्रा°
6. T तथा T1 ''पुत्रस्य वातरोग'' इत्यारभ्य ''पह्वतमिति च वदेत्'' इत्यन्तं पुनर्लिखितम् । ''शुक्रयुतकेतूदय''इति लेखनानन्तरम्।
7. T श्रि°
8. T1 केतुदेय
9. T ग्रहदाहा°
10. T1 पाठः शुक्र इति । T शुक्रपक्षे
11. T °वा
12. द्र.मू. T2 वैज इति T नैज इति
13. T1 चेति त्वारि
14. T1 अं सारे
15. T1 उपचयो वोभ° T2 उपचयो वा भ°

A. द्र.प्र. र. १८८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। जीवयुतराहूदयस्य बुधारयुतराहूदयस्य च फलम् ।

[A1]सजीवे धननाशः स्यात् पश्चादर्थाप्तिवृद्धयः । 302
[2]बुधाराभ्यां कलिर्विघ्नः पुंवियोगोत्सुका[3]मरुत् ॥ 303

। चन्द्रकुजयुतराहूदयस्य बुधगुरुयुतराहूदयस्य च फलम् ।

[4]कौजे सचन्द्रे मासेषु [5]त्रिषु सप्तसु रक्तभाक् । 304
[6]बुधेड्याभ्यां युते तत्र नार्यां वातरुजा भवेत् ॥ 305

। शनिदृष्टकुजक्षेत्रगतराहूदयस्य फलम् ।

कौजे मन्देक्षितेऽर्थार्तिर्विदिशगति[7]मोहनम् । 306

। बुधशुक्रशनिक्षेत्रान्यतमगृहे राहुराशौ लग्ने सति फलम् ।

बुधाच्छा[8]र्किगृहेऽनर्थ[9]स्त्रीनाशो तनयोऽर्थभाक् ॥ 307

। सूर्यक्षेत्रे राहुराशौ लग्ने सति फलम् ।

सिंहे स्त्रीवस्त्रकार्यार्तिर्दाहपूजापितुर्मृतिः । 308

। जीवक्षेत्रे कर्कटे वा राहुराशौ लग्ने सति फलम् ।

जीवर्क्षे स्थानमानार्थाश्चान्द्रेऽपूजा च [10]मातृरुक् ॥ 309

व्या - सार इति - राहौ राहु[11]भवने वा कुजयुत उद्यति धनवियोगादि स्यात् । राहुक्षेत्रे राहौ वा शनियुत उद्यति अर्थवियोगोऽपकर्षो गर्भनाशश्च स्युः । सजीव इति गुरुयुत[12]राहूदये धननाशोत्तरमर्थलाभो विवृद्धिश्च स्यात् । बुधाराभ्यां युतस्य राहोस्तत्क्षेत्रोदये कलहः कार्यविघ्नः पुरुषवियोग उत्सुकत्वं स्वाङ्गविशेषे वातरोगश्चेत्येतानि पञ्च फलानि स्युः । कौज इति -

1. T1 पाठः T न जीवे
2. द्र.व्या. T पत्रं खण्डितम् ।
3. T °मरुक् द्र.व्या
4. T कुज द्र.व्या.
5. T1 त्रिषु इति नास्ति
6. T बुधेड्याभयते
7. T1 °माहनम्
8. T °चा°
9. T2 °स्त्रीकाशो
10. T मातृ ऋत् T1 मातृ मुत् T2 मातृ भुक्
11. T भवनो
12. T तथा T1 रारुदये

A. द्र.प्र.र. १८९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुजक्षेत्रे राहुस्तत्क्षेत्रयोरिन्दुना सहोदये त्रिषु सप्तसु वा मासेषु प्रष्टुरङ्गेषु घातादिना[1] रुधिरोत्पत्तिः स्यात्। कदा? जन्मषष्ठाष्टमेषु पापयुतेषु। [2]बुध इति - राहौ तत्क्षेत्रे वा गुरुयुते बुधयुते वोद्यति नार्या वातरोगः स्यात्। गुरुसौरयुत उद्यति इति केचित्। कौजे मन्देक्षित इति - शनिदृष्टभौमक्षेत्रे राहुक्षेत्र उद्यति प्रश्नद्रेक्काण[3]क्रमेण धननाशो विदेशगमनं चित्तसंमोहश्चेति त्रीणि। बुधशुक्रशनिक्षेत्र उद्यन् राहुस्तत्क्षेत्रं वा क्रमादर्थनाशं स्त्रीनाशं बहुधनसुतार्थलाभं च [4]कुरुते। सिंह इति - सिंहलग्ने [5]राहौ तत्क्षेत्रं वोद्यति स्त्रीहानिर्वस्त्र[6]हानिः कार्य[7]हानिर्गृहदाहः नीचजनेभ्यः पूजा पितृमरणं च स्युः। जीवक्षेत्रलग्न[8]गो राहुस्तत्क्षेत्रे वा लग्नद्रेक्काणक्रमेण स्थानं मानं द्रव्यं च त्रीणि कुरुते। चन्द्रक्षेत्र[9]गे राहौ तत्क्षेत्रे [10]वोद्यति लोकानुपकारो [11]मातृरोगश्च स्याताम्। ३००-३०९।

॥ इति राहुफलम् ॥

॥ वेसिफलमाह ॥

। लग्नगतसूर्यात् द्वितीयस्थयोः शुक्रराह्वोः फलम्।

[A]भानूदयेऽर्थे [12]साच्छाहौ स्वर्णोत्पत्तिक्षयौ वदेत्। 310

। कुजराहुयुतलग्नात् द्वितीयस्थस्य शुक्रफलम्।

शुक्रे वेसौ साराहूदये ताम्रविनाशनम् ॥ 311

। शनिराहुयुतलग्नात् द्वितीयस्थस्य कुजफलम्।

[B]कुजवेसौ सार्किराहौ क्षेत्रे वोद्यति ताम्रहृत्। 312

। बुधराहुयुतलग्नात् द्वितीयस्थस्य शनेः फलम्।

मन्दवेसौ साहिबुधे क्षेत्रे चोद्यत्ययोहृतिः ॥ 313

1. T दनो
2. T चन्द्र द्र.मू.
3. T1 पाठः ''ण क्रमेण'' इति T पत्रं खण्डितम्।
4. T कुरुतः
5. T राहौ तौ क्षेत्रं
6. T2 वस्त्रहानिः इति ग्रन्थपातः
7. T1 पाठः T °हानिगृहदाहः
8. T1 पाठः ''गो'' इति। T तत्र पत्रं खण्डितम्।
9. T °गो
10. T पो°
11. T °मात्र°
12. T साजादौ स्वर्नो T1 साजा स्वर्नो द्र.व्या.

A. द्र.प्र.र. १९८
B. द्र.प्र.र. २००-२०५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। सूर्ययुतराहूदयफलम् ।

सार्कोऽहिरुद्यन् पशुहा कीटभीः पुत्रनाशदः । 314

। रविबुधयुतराहूदयस्य कुजयुतराहूदयस्य बुधयुतराहूदयस्य च फलम् ।

[1]सार्कज्ञः सकुजो मृत्युस्सबुधो बन्धुनाशनम् ॥ 315

। मीने शुक्रसहितराहूदयस्य फलम् ।

सन्तोषं पशु[2]लाभश्च मीने साहिभृगूदये । 316

। कर्के चन्द्रगुरुसहितराहूदयस्य फलम् ।

पक्षात्पश्वासि[3]सन्तोषौ चान्द्रे सेन्दुशुभावहौ ॥ 317

व्या - रवौ लग्नगते अर्थविसौ शुक्रयुतराहूदये [4]स्वर्णोत्पत्तिनाशौ । शुक्रे वेसौ कुजयुतराहूदये ताम्रविनाशः । [5]कुजवेसाविति - कुजवेसौ शनियुतराहूदये तत्क्षेत्रे उदये वा ताम्रनाशः। शनिवेसौ बुधयुते राहौ तत्क्षेत्रे [6]वोद्यत्ययोनाशः । सार्कोऽहिरिति - [7]रविणा सहोद्यन् राहुश्चतुष्पदनाशं करोति । रविबुधाभ्यां सहोद्यति कीटकभयं [8]सुतनाशं च करोति । कुजेन सहोद्यन् [9]मृत्युं करोति । बुधेन सहोद्यन् बन्धुक्षयं करोति । सन्तोषेति - मीने शुक्रसहितराहूदये सन्तोषश्चतुष्पाल्लाभश्च भवति । चान्द्रे - कर्कटके चन्द्रगुरुसहितराहूदये अर्धमासेन चतुष्पाल्लाभस्सन्तोषश्च स्याताम्। ३१०-३१७।

॥ अथान[10]फायोगफलमाह ॥

। चन्द्रात् शुभग्रहकृतस्य अनफायोगस्य फलम् ।

[A]पुष्पस्त्रीगन्धसहिता भक्ष्यासिः [B]स्वा[11]नफे चन्द्र उद्यति । 318

1. T सार्किज्ञः । द्र.व्या.
2. T लाभास्ते
3. T2 पाठः T °सन्तोषा
4. T स्वर्नो°
5. T1 कुजवेसाविति ग्रन्थपातः
6. T पो°
7. T विर°
8. T सुतानाशं
9. T1 मृत्यं
10. T °नभा°
11. T स्यानभे T2 भक्ष्यासिश्चन्द्र उद्यति

A. द्र. प्र. र. २०६

B. अत्र ''भक्ष्यासिश्चन्द्र उद्यति'' इति । T2 पाठः अनुष्टुप् वृत्तानुगुणो दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। पुंराशिलग्नगतचन्द्रात् पापग्रहकृतस्य अनफायोगस्य फलम् ।

[A]चन्द्रो वा [1]सानफे लग्ने पापक्षेत्रोदये कलिः ॥ 319

। स्त्रीराशिलग्नगतशुभाशुभग्रहजन्यं फलम् ।

[B]स्त्रीराशौ लग्नचन्द्रे वा शुक्रे वा स्त्रियमश्नुते । 320

[C]नीचलग्ने तयोर्नीचां स्त्रीविनाशं सपापयोः ॥ 321

व्या - पुष्पस्त्रीति - शुभग्रहानफा[2]युतचन्द्र उद्यति तमुदयं [3]चतुर्धा कृत्वा पुष्पलाभं, [4]स्त्रीलाभं, चन्दनादिगन्धलाभं ताम्बूलक्रमुकादि[5]भक्ष्यं च प्राप्नोति । पापग्रहानफा[6]यां पुरुषराशियोगे कलहो भवति । इममेवारूढं कृत्वा क्षुतगौळ्यादयो वाच्याः । स्त्रीराशाविति - स्त्रीलाभप्रश्ने स्त्रीराशौ लग्नभूते, चन्द्रे शुक्रे वा स्थिते स्त्रीलाभं मैथुनं वा प्राप्नोति । कन्यायां लग्नगः शुक्रो, वृश्चिके लग्नगः चन्द्र[7]श्च निकृष्टस्त्रीलब्ध्यै [8]भवतर्भोगाय वा भवतः । स्वनीचे सपापौ लग्नगौ चन्द्रशुक्रौ स्त्रीविनाशं कुरुतः । आयासश्च तयोश्चन्द्रशुक्रयोः । ३१८-३२१ ।

। नृराशिलग्नगतपुंग्रहफलम् ।

[D]मित्र[9]द्रोहस्य कर्तारो [10]नृराशौ लग्नगा नराः । 322

। लग्नगतबुधसहितस्य चन्द्रस्य शुक्रस्य वा फलम् ।

[E]सबुधो लग्नगश्चन्द्रश्शुक्रो वा स्त्रीधनप्रदः ॥ 323

। पञ्चमस्थशनिफलम् ।

[F]मन्दः पुत्रे पुत्ररोगं [11]मार्गे व्याधितदर्शनम् । 324

---

1. T पानभे
2. T °भा°
3. T चतुर्च्छा
4. T1 स्त्रीलाभम् इति ग्रन्थपातः
5. T भविष्यं for भक्ष्यं
6. T °भा°
7. T1 चन्द्र इति ग्रन्थपातः
8. T भवर्त भोगाय
9. T दो°
10. T2 न्यराशौ
11. T मार्गो

A. प्र. र. २०७
B. प्र. र. २०८
C. प्र. र. २०९
D. प्र. र. २१०
E. प्र. र. २११
F. प्र. र. २१२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। लग्नात् षष्ठे व्यये वा स्थितानां सूर्यचन्द्राङ्गारकशनीनां फलम् ।

रवीन्द्वारार्क[1]यो[A]ऽन्त्येऽरौ युद्धस्फोटासृगाय[2]मान् ॥ 325

व्या - मित्रेति - नरराशिषु लग्नभूतेषु रविकुजयमाः[3] युगपत् पृथग्वावस्थिता[4] मित्रद्रोहं कुर्वन्ति। केचित्तु नृराशावित्यत्र निजराशौ [5]रव्यादय इति वदन्ति। स[6]बुध इति बुधयुतदृष्टः स्त्रीधनलाभञ्च करोतीत्यर्थः । पञ्चमस्थो मन्दः पुत्ररोगं पथि रुग्णदर्शनं च कुर्यादिति। लग्नात् षष्ठे व्यये वा [7]रव्यादयः स्थिताः क्रमेण युद्ध-विस्पर्श-रक्तस्राव-बन्धनानि [8]कुर्युः। आयमः - संयमो वन्धनमिति यावत् । विस्पर्शो नाम इष्टार्थवियोगः स्फोटो वा। [B]यमारिमन्द इति वा । अरिमर्दो । महायुद्धं, षष्ठे द्वादशे वा चन्द्रे जनविरोध[9]नाशौ भवतः । ३२२-३२५ ।

। षष्ठे वा द्वादशे वा गतानां ग्रहाणामनिष्टफलं तत्परिहारश्च ।

तदुक्तं होरायाम् -

द्वादशे षष्ठे वा भवति बन्धनं रविजे । 326
भौमे रुधिरं सूर्ये युद्धं चन्द्रे तु विस्पर्शः ॥ इति । 327
यत्प्रोक्तमशुभं पापैः सौम्यदृष्टौ न तद्भवेत् ॥ इति । 328

व्या - सर्वशेषं सौम्यदृष्टौ शुभयोगेऽपि द्रष्टव्यम् ।

॥ लग्नगतचन्द्रेण ग्रहविशेषयोगात् फलविशेषमाह ॥

[C]चन्द्रे सजीवे भोगार्थस्त्रीभुक्तीष्टवचश्श्रुतिः॥ 329
[D]सशुक्रे भोजनं रम्यं वस्त्रं सत्सङ्गतिर्भवेत् । 330
सबुधे लग्नगे चन्द्रे विवादं विजयं वदेत् ॥ 331

1. T यान्त्येकौ
2. T2 'वान्
3. T यमौ
4. T स्थितौ
5. T1 पाठः T रव्यूदय
6. T1 बन्धो T द्र.मू.
7. T1 पाठः T रव्यूदयः
8. T तथा T1 कर्युः
9. T नाशो

A. अत्र व्याख्यानगतस्य षष्ठे व्यये वा इति पदानुसारेण ''अन्त्येऽरौ'' इति शोधितम् ।
B. अस्या व्याख्याया मूलं चिन्त्यम् ।
C. द्र.प्र.अ.प. १२.४० तथा प्र.र.२१४-२१४-२१६
D. द्र.प्र.अ.प. १२.४१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सार्केऽक्षिस्थानपश्वार्तिगुह्यस्पर्शमनो[1]रुजः । 332
जारोऽस्थिरः सार्कबुधे लुब्धो लोकापवादकः ॥ 333

व्या - चन्द्र इति - लग्नस्थे चन्द्रे गुरुयुते भोगलाभः, अर्थलाभः, स्त्रीलाभो, गोरसबहुळभुक्तिलाभः [2]इष्टवार्तादिकमपि[3]त्वया श्रुतमिति प्रष्टुः प्रत्ययार्थं वदेत्। गोरसबहुळं भवता भुक्तमिति वदेत् । सशुक्र इति स्पष्टः । सार्क इति - सार्के चन्द्रे [4]लग्नस्थे नयनविकारः, स्थाननाशः, चतुष्पदनाशः, स्त्रीगुह्यस्पर्शनं, हृदय[5]शूलोऽङ्ग[A]रोगो [6]भवतीति वदेत्। अर्कबुधसहिते चन्द्रे लग्नस्थे प्रष्टा [7]पारदारिकः, चलचित्तोऽर्थलुब्धो, लोकापवादनिरतश्च भवतीति। ३२९-३३३।

॥ कटकलग्नगतानां रव्यादीनां क्रमात्फलमाह ॥

[B]चान्द्रे लग्ने रविस्ता[8]पोद्वेगनिर्गमाया[9]सदः । 334
[C]कुजे चोरभयं रक्तं बन्धनं [10]स्वर्णनाशनम् ॥ 335
[D]उत्तमः पुरुषः प्रष्टा स्थानमानप्रदो गुरुः । 336
[E]मन्दे स्थानच्युती रोगो बन्धो [11]रोघोऽङ्ग[12]भेदनम् ॥ 337
हृदयानिर्वृतिः शुक्रे स्त्रीचिन्ता कटके भवेत् । 338

व्या - चान्द्रे - कटके लग्ने स्थितो रविः सन्तापोद्वेगनिर्गमा[13]यासान् ददातीति। कुजे कटके लग्नस्थे चतुर्धाकृते चत्वारि फलानि। [14]मन्दे कटके लग्नस्थे स्थानभ्रंशादीनि पञ्च फलानि। अङ्गभेदनम् - अङ्गच्छेदः । [15]शुक्रे कटकलग्नस्थे चतुर्धा कृते चत्वारि फलानि । शुक्रे कटकलग्नस्थे स्त्रीचिन्तेत्येकं फलम्। ३३४-३३८।

---

1. T रुजाः
2. T इति वार्ताधिकं पित्वाया द्र.मू.
3. T2 त्वयापि for पित्वया
4. T1 लग्नसेनयविचारः
5. T °शूल°
6. T2 भवन्तीति
7. T वा दारिक for पारदारिकः
8. T °स्तावा°
9. T °यत्तदः°
10. T स्वर्न°
11. T रोगोऽ°
12. T2 अङ्गजे धनम्
13. T2 पाठः T यासा
14. T2 चन्द्रे
15. T1 ''शुक्रे कटकलग्नस्थे'' इत्यस्मात् परं स्त्रीचिन्ते इत्यस्मात् पूर्वं ग्रन्थपातः ।

A. प्र. र. २१७ T मातृकायां ''अङ्गरोगो'' इत्यत्र त्रयाणां वर्णानां अधस्ताल्लिखिताः सूक्ष्मबिन्दवः वर्णनिष्कासनसूचनाभिप्रायेण इति मन्ये।
B. द्र. प्र. र. २१८ तथा द्र.प्र.अ.प. १२.४४ अत्र छन्दसः रक्षणार्थं ''निर्गमायासदः'' इत्यस्य स्थाने ''निर्गमयासदः'' इति कृतम् ।
C. प्र. र. २१९ D. द्र. प्र.अ.प. १२.४५ E. द्र.प्र.अ.प १२.४६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। चन्द्रोदये राशिविशेषात् फलविशेषमाह ।

[A]कौजे चन्द्रोदये रोगः शुक्रक्षेत्रेऽर्थनाशनम् । 339
[B]बन्ध्वर्थनाशो स्त्रीसम्पदृणं यत्नश्च [1]विद्गृहे ॥ 340
सिंहे [2]चोत्कण्ठनं [3]जैवे मैत्रीं चौर्यं स्वभे भवेत् । 341
मान्दे चन्द्रोदये रोगश्चिन्तितार्थक्षयो भवेत् ॥ 342

व्या - स्फुटः । ग्रहरहिते मेषादौ प्रश्न[4]गते 'मेषे नृपतिसेनेश' इत्यादि ।

॥ अथ चिन्ताज्ञानमाह ॥

। लग्नगतसूर्यादिफलम् ।

[C]लग्नस्थोऽर्को भयं कुर्यान्मृत्युवैकल्यदः शशी । 343
घातं भौमो रुजं मन्दः सौम्यो राशिफलं वदेत् ॥ 344
गुरुर्वस्त्रार्थभार्यासिं शुक्रोऽन्यस्त्री[5]पदप्रदः । 345

। दशमस्थानगतसूर्यादिफलम् ।

[D]स्थानार्थरोगभीश्चिन्तां [6]सूचयेत्कर्मगो रविः ॥ 346
चन्द्रः कर्मण्यर्थचिन्तामिष्टश्रवणसंश्रयाम् । 347
[E7]शत्रुवृद्धिधनच्छेदस्थानभ्रंशान् कुजो वदेत् ॥ 348
[8]भृगुर्वस्त्रार्थशय्याज्ञां स्थानार्थज्ञानदो गुरुः । 349
[F]स्थानभ्रंशं रुजं यात्रां कर्मगस्सूचयेच्छनिः ॥ 350

---

1. T विग्रहे
2. T चोत्कर्ननं
3. T चेवे
4. T °हते
5. T नटी° T१ वटी°, T२ वट°
6. T सूर्य चेत्
7. T शतृ
8. T भृगो

A. द्र.प्र.अ.प. १२.४७
B. द्र.प्र.अ.प. १२.४८
C. द्र.प्र.अ.प. १२.२२-२३, कृ.P. ११०
D. द्र.प्र.र. २२८ तथा प्र.अ.प. १२.२४
E. द्र.प्र.अ.प. १२.२५
F. द्र.प्र.अ.प. १२.२६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

। सप्तमस्थानगतसूर्यादिफलम् ।

[A]मरणं वा प्रवासं वा नष्टचिन्तां रविर्मदे । 351
भार्याकलहसम्प्राप्तिस्त्रीनाशान् [1]मदगः शशी ॥ 352
[B]स्वस्त्रीदुःशीलतां भौमो ह्वतिं [2]मेढ्ररुजं वदेत् । 353
[C]गुरुस्त्रीगर्भार्थचिन्ते भ्रष्टाचारवधूं सितः ॥ 354
[D]वृद्धां च [3]भ्रष्टशीलां वा [4]रुग्णां मन्दो मदे वदेत् । 355

। चतुर्थस्थानगतसूर्यादिफलं निरूप्य तत्समानं फलं पञ्चमे नवमेऽपीत्याह ।

[E]हृच्छूलदाहरुधिरराजभीतिं रविः सुखे । 356
[F]चन्द्रे रम्यवधूचिन्तामर्थचिन्तां गुरुर्वदेत् ॥ 357
[G]बन्धुवैरं मनोदुःखं भौमो भार्याकथां सितः । 358
[H] [5]त्रासं भीतिं च निर्वाणं मन्दः सुखगतो वदेत् ॥ 359
[I]चतुर्थगश्चन्द्रसुतो विवादं किल सूचयेत् । इति । 360
चतुर्थोक्तफलं ब्रूयात्पञ्चमे नवमेऽपि च ॥ 361

व्या - लग्नस्थ इत्यादि - [6]लग्नगतरव्यादिफलम् । लग्नस्थो रविर्भयं चिन्तितमिति वदेत् । घातं - युद्धं कुजः । राशेर्यत्फलं तदेव बुधः सूचयेदिति । स्थानार्थेत्यादिना कर्मगत[7]रव्यादिफलम् । मरणं वदेदित्यादिना सप्तमस्थरव्यादिफलम् । हृच्छूलेत्यादिना चतुर्थगतरव्यादिफलम् । [8]लग्नोपगताः प्रधानास्तद्दौर्बल्ये दशमगैः, तद्दौर्बल्ये सप्तमगैः, तद्दौर्बल्ये चतुर्थगैः, [9]केन्द्रे ग्रहरहिते केन्द्रेषु बलवद्राशिवशात् तत्स्वाम्युक्तफलं वाच्यमिति । केचित्तु चतुर्थगतरव्यादिफलं पञ्चमस्थार्कादीनामपि वाच्यं, दशमगत[10]फलं तदासन्ननवमस्थार्कादीनां वाच्यमिति वदन्ति । ३४३-३६१ ।

---

1. T मन्द°
2. T1 पाठः T मेध्ररुजं
3. T स्पष्ट°
4. T रुग्णार्मदो
5. T त्रास
6. T तथा T1 लग्नत T2 लग्नतः
7. T °व्याधि
8. T तद्रोगयुताः
9. T केन्द्रग्रह°
10. T बलं

A. द्र.प्र.अ.प. १२.२७
B. द्र.प्र.अ.प. १२.२८
C. द्र.प्र.र. २३४
D. द्र.प्र.र. २३५ तथा द्र.प्र.अ.प. १२.२९
E. द्र.प्र.अ.प. १२.३० तथा द्र.प्र.र. २३६
F. द्र.प्र.र. २३७
G. द्र.प्र.अ.प. १२.३१
H. द्र.प्र.र. २३८
I. द्र.प्र.र. २३९ तथा प्र.अ.प. १२.३२

Digitized by Madhuban Trust, Delhi
CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ [1]यस्तु सम्पदसम्पद्वोपरि पृच्छति तं प्रत्याह ॥

। दशमचतुर्थमेषादितुलादिराशिषट्कगतलग्नानुसारेण भूतभाविशुभाशुभचिन्ता।

शुभाः कर्मचतुर्थाभ्यां पूर्वार्धाः[2] स्युश्शुभप्रदाः । 362
[3]पापा हानिकरा मेषतुलादिभ्यां व्यवस्थितिः ॥ 363

व्या - लग्नस्य मेषादिषट्का[4]न्तर्गतत्वे, [5]दशमद्वितीयहोरालाभादिचतुर्थप्रथमहोरान्तरेषु [6]शुभाश्चेदतीतं शुभं, [7]अशुभाश्चेदतीतमशुभम् । लग्नस्य तुलादिषट्कान्तर्गतत्वे दशमप्रथमहोरानवमाष्टमसप्तमषष्ठपञ्चमचतुर्थद्वितीयहोरान्तेषु शुभाश्चे[8]दुपरि सम्पत्, [9]अशुभाश्चेदुपर्यसम्पदिति व्यवस्थाप्यः, तदुक्तम्- मेषतुलादिभ्यां व्यवस्थितिरिति। ३६२-३६३।

। पृच्छकस्येष्टधनलाभयोगः।

[A10]सौम्यानामन्यतमस्तस्मिन् काले समग्रबलवीर्यः । 364
[11]स्याद्यस्य नवमराशौ तस्य भवेदिष्टधनलाभः ॥ 365

॥ अथ चिन्ताविशेषज्ञानान्याह ॥

। जीवप्रश्नं चोरप्रश्नं चाह ।

लग्ने चन्द्रे गुरौ वापि जीवप्रश्न इति स्मृतः । 366
भौमोऽर्को [12]वोदये रन्ध्रे मन्दे वान्त्येष्टमे ह्वतिः ॥ 367

व्या - ह्वतिः - चोरह्वतिः, चोरप्रश्न इत्यर्थः ।

---

1. T वस्तुमसम्पदसम्पद्वोपरि ते पृच्छति
2. T °धाश्शु T1 °दश्शु
3. T महा° T1 हह°
4. T1 पाठः T ° न्तर्गतत्वेन
5. T1 "दशम" इत्यस्मात्परं "प्रथमहोरानवमाष्टम" इत्यस्मात्पूर्वं ग्रन्थपातः।
6. T शुभाच्छे°
7. T अशुभाच्छे°
8. T °न्दुपरि समवत्
9. T अशुभच्छे
10. T सौमा
11. T व्या°
12. T वेदयो

A. द्र.प्र.र. २४४-२४५ तथा द्र.प्र.अ.प. १२.१२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। कार्यप्रश्नमाह ।

कार्यचिन्ता बुधे खे वा शुक्रे [1]लाभेऽर्थगे गुरौ । 368
पुंराशौ बुधचन्द्रौ वा [2]जीवाढ्ये वा रवौ खगे ॥ 369

व्या - दशमे बुधे वा, लाभे शुक्रे वा, द्वितीये [3]गुरौ वा, स्थिते सति कार्यचिन्ता । पुंराशौ बुधचन्द्रयोर्जी[4]वाढ्ययोः स्थितयोः तद्दशमे रवौ [5]स्थिते सत्यपि कार्यचिन्ता ।

। लग्नचन्द्रारूढोपरि सूर्यादिदृष्टिफलम् ।

चन्द्रमारूढमङ्गं च सूर्याद्यैः पश्यति क्रमात् । 370
पुत्रोऽम्बिकात्मा सहजः स्त्री[6]कुटुम्बं रिपुः स्मृतः ॥ 371

व्या - अम्बिका - माता, आत्मा - देहः, स्त्री - भार्या, स्मृतश्चिन्तित इति । चन्द्रमारूढं लग्नं वा [7]सूर्ये पश्यति पुत्रः, [8]पिता वा, चिन्तित इति कैश्चित् व्याकृतम् । एवं लग्नादीनां रव्यादिदृष्टौ चोरादिरपि[9] पितृपुत्रमात्रादिरेव ।

। छादितराश्यनुसारेण प्रष्टुश्चिन्तानिर्णयः।

मेषादिच्छादितेऽजादा[10]वात्मार्था[11]दिगवादिके । 372

व्या - मेषे मेषेण छादिते आत्मचिन्ता । वृषे वृषेण छादिते [12]कुटुम्बार्थादिचिन्ता । अथवा यदा छत्रारूढयोरेकत्वं, यदा वा लग्नचन्द्रयोरेकत्वं तदा [13]ह्यात्मचिन्ता । आत्मा - देहः । यदारूढाच्छत्रस्य लग्नाच्चन्द्रस्य वा द्वितीयत्वं तदा धनचिन्ता । धनसहजादिराशौ शत्रुग्रहराश्या[14]दिना छादिते शत्रुतो धनसहजादिनाशः । भ्रातृपितृमातृ[15]पुत्रा[16]ङ्गनादिभावेषु शत्रुराश्यादिच्छादितेषु भ्रात्रादयो विरुध्यन्तीति ।

छत्रलक्षणं तु -

[A]आरूढादुदयं यावत्तावच्छत्रं तु वीथिभात्[17] ॥ 373

---

1. T लासोत्यर्थः T1 लाहोत्यर्भः
2. T चन्द्रेऽसौ द्र.व्या
3. T2 सुरौ
4. T तथा T °र्वे
5. T1 ते for स्थिते
6. T कुडुम्बं
7. T सूर्यो
8. T1 विता
9. T तथा T1 °रवि
10. T2 °जोदा°
11. T °र्धा°
12. T कुडुम्ब°
13. T1 प्यात्म°
14. T राज्या°
15. T मातृमातृ for मातृ
16. T अत्रा°
17. T °भाक्

A. द्र.प्र.अ.प. ३.२१ तृतीयपादगतस्य ''लग्ने'' इति पदस्य स्थाने सूर्ये इति दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृषसागरगे लग्ने मेषो[1] [2]वीथीहतूच्यते । 374
वीणाकीटाब्धिगे कन्या तुलामीनाजगे वृषः ॥ 375

व्या - [3]आरूढेत्यनेन बाह्यकार्यविषये प्रश्ने छत्रं वेद्यम् । शरीरसम्बन्ध्यायुरारोग्यादि प्रश्ने तु उदयलग्नं बलवत्केन्द्रं वारूढं छत्रं तूद्यन्नवांशकं केन्द्रे तत्समानसङ्ख्यो [4]नवांशको वेति ।

। भूतभविष्यद्वर्तमानफलविचारः।

व्ययार्थलग्नगैः[5] खेटैर्भूतभाविभवत्फलम् । 376
शुभाशुभं वदेत्सौम्यासौम्यै[6]र्भावान्तरेष्वपि ॥ 377

व्या - अस्योदाहरणं [7]प्रदर्श्यते - लग्नात् द्वादशगैः शुभाशुभैः शुभाशुभस्याती[8]तत्वं, द्वितीयगैर्भविष्यत्त्वं लग्नगैर्वर्तमानत्वं तथा षष्ठाष्टमसप्तमगैः कळत्रशुभाशुभयोरतीतत्वाद्यत्रेति। तृतीयपञ्चमचतुर्थ[9]गतैर्गृहादिशुभाशुभयोरतीतत्वाद्यु[10]च्यत इति ।

। अङ्गवैकल्ययोगस्तद्भङ्गश्च ।

क्रूरष्षष्ठे लग्नादि[11]स्वाङ्गविभागे[12] करोति वैकल्यम् । 378
केन्द्र[13]त्रिकोणराशिषु न स्युर्गुरुसौम्य[14]भृगुपुत्राः ॥ 379

व्या - [A]लग्नाच्चतुर्थेन गृहद्वारं वृक्षादि, तत्केन्द्रे गुळिकराह्वादिस्थित्या वृक्षभेदभङ्गादि सर्वं यथोपदेशं वाच्यमिति ।

॥ अथ नित्यजातकप्रक्रिया ॥

[B]अश्विन्याद्यैश्च मेषाद्यैरष्टोत्तरशतांशकैः । 380

1. T मेषा
2. T विधिहमुच्यते। T1 विधिममुच्यते
3. T आयित्यनेन T1 अयित्यनेन T2 आयत्यनेन
4. T2 नवांश नव इति
5. T1 °लग्नै for लग्नगैः
6. T भाग्वा°
7. T प्रदृश्यते
8. T1 ''तत्वं द्विती'' इति ग्रन्थपातः
9. T गते ग्रहादि
10. T °दु°
11. T °ति for दि
12. T °वे for भे
13. T °न्द्रे for न्द्र
14. T सौम्यः

A. द्र.प्र.र लग्नाच्चतुर्थगैः खेटैः गृहद्वारद्रुमादिभिः । २४६ केन्द्रस्थैर्मान्दिपापैस्तच्छेदभङ्गादिकं वदेत । २४७ अस्य श्लोकस्य केवलं व्याख्यैव ग्रन्थे दृश्यते ।
B. द्र.प्र.अ.प ६.१४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सृष्टिः स्थितिश्च संहारः कर्म भोगो विनाशनम् ॥ 381
धातुर्मूलं[1] च [2]जीवेति योजयेच्च [3]पुनः पुनः । 382

॥ नक्षत्रदशायां प्रसङ्गात् विशेषमाह ॥

वधभेशदशा कष्टा जन्मन्यर्के [4]तु संस्थिते ॥ 383

व्या - उदाहरणम् - यथा कृत्तिकास्थे[5] [6]रवौ आर्द्रास्वातिशतभिषजामन्यतमजातस्य वधभे रवौ स्थितत्वात् तद्वधभेशदशा[7] कष्टेत्यादि योज्यम्। प्रश्नकाले उदयलग्नचन्द्रमादिग्रहान् [8]सूक्ष्मानानीयायव्ययेषु कष्टफलानि वदेत्।

। फलपरिपाककालमाह ।

सूर्ये बलिन्युपचये तत्फलं तूत्तरायणे। 384
चन्द्रे केन्द्र[9]त्रिकोणस्थे सशुभे दक्षिणायने॥ 385

व्या - रवौ बलिन्युपचयस्थे शुभफलं भवति। तच्चोत्तरायणकाले भवतीति वदेत्। चन्द्रे शुभयुते केन्द्रत्रिकोणस्थे सति भाविशुभफलं दक्षिणायनकाले भवतीत्यर्थः।

॥ व्याधीनां कालमाह ॥

। तत्र सूर्यसम्बन्धिकालानाह ।

सिंहमासः सिंहगुरुः [10]सिंहर्क्षं कृत्तिकात्रयम् । 386
सिंहांशक ऋतुर्ग्रीष्मो [11]रविदायद्वयं रवेः । 387

। चन्द्रसम्बन्धिकालानाह ।

कर्के जीवः [12]कर्किमासः [13]कर्किभं रोहिणीत्रिकम् । 388
[14]वर्षर्तुः कटकांशः स्यादिन्दोः कालो दशाद्वयम् ॥ 389

। कुजसम्बन्धिकालानाह ।

कौजोऽजाळीड्यमासादिवसन्तः सौम्यभत्रिकम्[15] । 390

---

1. T °मूल
2. T जीवे इति
3. T1 पुनः for पुनः पुनः
4. T वसस्थिते
5. T °स्थो for स्थे
6. T1 वौ for रवौ
7. T तथा T1 °भेशरदशा
8. T सूक्ष्मे त आनीय
9. T केन्द्रं
10. T1 सिंहक्ष
11. T1 रविदायं
12. T1 किंमासः for कर्किमासः
13. T कर्किहं
14. T1 वर्षतुः। तथा T
15. T °कः for कम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। बुधसम्बन्धिकालानाह ।

कन्यायुग्मेड्चमासादिसार्प[1A]त्रिकशरद्विदः ॥ 391

। गुरुसम्बन्धिकालानाह ।

गुरोश्चापान्त्येड्यमासा [B]हेमन्तादितिभत्रिकम् । 392

। शुक्रसम्बन्धिकालानाह ।

तुलावृषेड्चमासादि ग्रीष्मयाम्यत्रिकं भृगोः ॥ 393

। शनिसम्बन्धिकालानाह ।

शनेर्मान्दर्क्षेड्चमासः [C2]शिशिरादीड्यभत्रिकम् । 394

। राहुकेतुसम्बन्धिकालानाह।

[D3]आर्द्रात्रिकमहेः कालः केतोराश्विनभत्रिकम् ॥ 395

व्या - सिंहेति - [4]सिंहर्क्षं - सिंहराशिः । कृत्तिकात्रयं - कृत्तिकोत्तरफल्गुन्युत्तराषाढम् । ग्रीष्मर्तू[5] रविमहादशा[6] अन्तर्दशा चेति द्वयं, एतत्सर्वं रवेः कालः[7] । एवमितरेषामित्यर्थो वेद्यः । ईड्यभत्रिकं - पुष्यमैत्राहिर्बुध्न्य[8]भत्रिकमिति । ३८६-३९५ ।

॥ प्रश्नारूढलग्नवशात् [9]सूरेः फलकथनप्रकारमाह ॥

आरूढाष्टमपस्थर्क्षे [10]रवौ चरति दोषभाक् । 396
[11]मान्दिस्थराशिगे सूर्ये महत्कष्टं भविष्यति ॥ 397

अष्टमेशस्थिते तारे मरणादि विशेषतः ॥ 398

---

1. T साव
2. T1 पाठः T शिशिरादित्यवित्रिकम्
3. T अधातिक्रमहेः
4. T1 सिंहर्कं
5. T ऋतुः
6. T दर्श
7. T1 काल इति ग्रन्थपातः
8. T तथा T1 °हिबुध्य
9. T1 तथा T1 सेरः
10. T1 रविवौ for रवौ
11. T मान्दिस्थि°

A. अत्र नक्षत्रत्रिकगणनाया अवशिष्टं त्रिकं तर्कयित्वा सार्प इति कृतम् ।
B. हेमन्तादिभ इत्यत्र पदसाम्यात् योग्यत्वाच्च ''हेमन्तादितिभ'' इति कृतम् ।
C. इदं व्याख्याना बलात् शोधितम् ।
D. इदं प्रश्नरत्ना बलात् शोधितम् । द्र.प्र.र. २८३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - आरूढराशेरष्टमेशो यस्मिन् राशौ प्रश्नकाले स्थितस्तस्मिन् राशौ चारवशाद्रवा[1]वागते महद्दुःखम्। गुळिकस्थितराशौ सूर्ये [2]चरत्यपि महत्कष्टम्। [3]एवमारूढाष्टमेशस्थितनक्षत्रेऽपि मरणादिकष्टफलं स्यादिति वदेत्। प्रतिदिवसं फलषट्कमस्ति [4]तदुत्पादयति।

। नित्यजातकस्वरूपं वर्णयति।

अयनस्य फलं पूर्वं द्वितीयमृतुजं फलम् । 399
मासांशक[5]दिनार्धानि दशाभुक्तिफलं च षट् ॥ 400

एतत्फलानां कथनं नित्यजातकमुच्यते । 401
द्वादशैश्वर्यकथन[6]सम्भवे[7] नित्यजातके ॥ 402

आरूढाच्छष्ठरन्ध्रान्त्ये केतुस्तिष्ठति चेत्तदा । 403
तद्राशावर्कसञ्चारः कष्टदुःखफलप्रदः ॥ 404

। अश्विन्यादिनक्षत्रेषु ग्रहविशेषेण सह चरतो रवेः फलम् ।

अश्विन्यर्के महत्कष्टं दुर्बल[8]श्चेच्छिखी तदा । 405
[A]केतुर्निकेरै या च धातुर्मूलं च जीवनम् ॥ 406
धरिच्चश्वतिजायत्तिल् व्याळवाळशै विशेषतः । 407
धनुर्मीनकर्धातण्डतोरमुन्नन्नु निश्चयाम् ॥ 408
जलराशियिलाकुन्नु व्याळमेन्नेन् कलो फलम् । 409
जीवद्रव्यङ्गळातिट्टेषु निश्चयं तानुमे अतु ॥ 410
स्थानलाभं च भूलाभं स्थिरराशियिलाकियो । 411
[9]भरण्यर्के फलं शुक्राद्रविणा कृत्तिकारवौ । 412
रोहिण्यर्के चन्द्रमसा मृगशीर्षे कुजेन च ॥ 413
[B10]आर्द्रर्कि बुधराहुभ्यां बुधेन्दुभ्यां [C]करे रवौ । 414

1. T द्रवौ वागते
2. T चरत्यवि
3. T1 ''एवं रुढाष्टम् एवां रुढाष्टमे'' इत्यधिकः पाठः
4. T तद्यु॰
5. T ॰दिकेनार्धाणि
6. T कथनं
7. T2 भवे for सम्भवे
8. T1 ॰श्चेखि for ॰श्चेच्छिखी
9. T भरण्यके
10. T आद्रोके

A. एताः षड्पङ्क्तयः मलयाळभाषया लिखिताः अस्फुटाश्च विद्यन्ते।
B. पुनर्वसुतः षट् नक्षत्राणि परित्यक्तानि ।
C. कवे for करे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

चित्रार्के बुधभौमाभ्यां [A]स्वात्यां शुक्रेण राहुणा ॥ 415
[1]ऐन्द्राग्ने गुरुशुक्राभ्यां मैत्रे [2]भौमेन वार्किणा । 416
ज्येष्ठे बुधेन चारेण गुरुणा शिखिनाऽसुरे ॥ 417

इत्थं फलं वदेन्नित्यं जलर्क्षे गुरुशुक्रतः । 418
वैश्वदेवेऽर्कमन्दाभ्यां श्रवणे शशिमन्दतः ॥ 419

धानिष्ठे शनिभौमाभ्यां मन्दाहिभ्यां च वारुणे । 420
पूर्वप्रोष्ठप[3]दर्क्षेऽर्के गुरुणा [4]शनिना तथा ॥ 421

तथोत्तरप्रोष्ठपदे शनिना गुरुणा तथा । 422
रेवत्यर्के फलं ब्रूयाद्बुधेन गुरुणा दृढम् ॥ 423

नित्यजातकनाथानां क्रम एवमुदाहृतः । 424

। नवांशकफलम् ।

अष्टोत्तरशतर्क्षांशैः फलं सम्यगिहोच्यते ॥ 425

[B]नवांशके नौकालात् पनृण्डोप्पतकम्पदि । 426
अतिलेकत्तिनु शोल्लेन् नूरुपलमोत्पकिणुं क्रमात् ॥ 427

[C]युद्धं भुक्तिर्व्याधिभोगौ जलद्रव्यं च वस्त्रकम् । 428
ससमं [5]सर्वधनहं विवादं त्वष्टमं पुनः ॥ 429

फलमेट्टुं कुट्टि[6]युण्डां नमोपदमंशकंतुम । 430
अष्टैश्वर्यमतीवण्णं नवांशकफलं क्रमात् ॥ 431

सत्रिपादत्रिनाडीभिर्यामेष्वष्टस्विदं फलम् । 432

---

1. T1 विन्द्रग्ने
2. T1 पाठः T भौमे रवार्किणा
3. T °व° for प
4. T2 शशिना
5. T2 सर्वधनमां
6. T उण्डन्मो अस्फुटश्च

A. स्वात्यां शुकेण राहुणा for मैत्रे भौमेन वार्किणा ।
B. एतत् पङ्क्तिद्वयं मलयाळभाषया लिखितमस्फुटश्च ।
C. द्र.प्र.र २९९-३०१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - इदं नवांशकफलमित्यर्थः । यामस्य विशेषः ।

। अष्टयामफलम् ।

[A]युद्धं भुक्तिर्यमक्लेशः कामं जलभयं पुनः ॥ 433

[B]षष्ठं वस्त्रक्षेमयात्रा[1] ससमं बहुलार्थकम् । 434

[C]अष्टमं कष्टफलदमिति यामफले भिदा ॥ 435

व्या - भिदा - भेदः । फलभेद इति यावत् ।

॥ अथ त्रिंशांशफलम् ॥

बुधेड्यशुक्रा भूगन्धमग्निदर्शनम[2]ब्रसम् । 436

व्या - क्रमेण सूचयन्तीति शेषः । अब्रसं - नीरसमित्यर्थः ।

॥ त्रिंशद्भिर्भागैस्त्रिंशत्फलं क्रमेणाह ॥

खवाय्वग्न्यम्बुवसुधाश्रुक्त्वक्दृग्रसनानसाः । 437

शब्दस्पर्शादयः पञ्च वाक्[3]पाणीपादपञ्चकम् ॥ 438

वचनादानगमनविसर्गानन्दपञ्चकम् । 439

अन्नप्राणमनोविज्ञानानन्दमयपञ्चकम् ॥ 440

व्या - एतानि त्रिंशद्भागफलानि शब्दस्पर्शादयः रूपरसगन्धाः । पाण्यादीत्यादिपदेन पायूपस्थे गृह्येते । अन्नमयः- प्राणमय इत्येवमुत्तरत्र योज्यम् ।

॥ अथ पञ्चैश्वर्यफलानि पञ्चचत्वारिंशत्सन्ति तान्युच्यन्ते ॥

[D]अश्विन्याद्याश्च [4]रागाद्या जनकांशाः क्रमात्स्मृताः । 441

। नवग्रहाणां धातुमूलजीवविभागः ।

[E]धात्वाद्याश्चन्द्रमन्दाराः [5]शुक्रार्कौ गुरुसोमजौ ॥ 442

1. T1 ''त्रा ससमं ब्रहुरर्थकम्'' इति पाठः ।
   T पत्रं खण्डितम् ।
2. T बृ.सम्. द्र.व्या.
3. T पाण्यादि for पाणीपाद
4. T रोगाद्या
5. T शुक्रार्का

A. द्र.प्र.र. ३०३

B. द्र.प्र.र ३०४ अत्र ''बहुपित्तकम्'' इति विशेषः

C. द्र.प्र.र. ३०५-३०८

D. द्र.प्र.र. ३०९ तथा द्र.प्र.अ.प. २३.१३

E. द्र.प्र.र. ३१०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अश्विनी धातुः, भरणी मूलं, कृत्तिका जीव इत्यादि पुनः पुनर्योज्यम् ।

। चरादिषु धातुमूलजीवविभागः ।

[A]चरो धातुः स्थिरो मूलं जीवस्तूभयराशयः । 443

व्या - जनकांशाः - अष्टोत्तरशतांशाः । [B1]तेष्वोजराशिनवांशकेषु क्रमेण धातुमूलजीवा इति गणनीयम्। युग्मेषु जीवामूलधातव इति । चन्द्र[2]मन्दारा धातुरित्यादि । वारससकेऽ[3]पीत्थमेव ।

[C]मनुष्यराशियिल् धातुवरुकिल् काळैकिट्टुमे ॥ 444

मणिकाल्लु[4]नणतुडरुमामन्नु शोल्लिन्नदेशिता । 445

जलराशिकळिल् धातुवरुकिल् पिन्नै यिङ्गने ॥ 446

अरिवैवात्र मामकिणियादिकळां तथा । 447

इत्यादि भेदमार्तापु शोल्लुवान् निश्चयिच्युवै ॥ 448

व्या - नित्यजातकफले वक्तव्ये प्रश्नराशिमारभ्य इत्थं विचार्य फलं कथयेत् । ग्रहैः फल[5]कथनं ग्रहबलादिकं विचार्य [6]ग्रहगोचरवशात्फलं वदेदिति ।

। द्रव्यलाभप्रश्नचिन्ता ।

[D]पापे[7]षूपचये द्रव्यलाभप्रश्नेऽर्थलाभ[8]भाक् । 449

अन्यथा द्रव्यहानिस्स्यात् देहक्लेशश्च निश्चयः ॥ 450

व्या - अन्यथानुपचयस्थेषु पापेषु द्रव्यनाशो मृतिर्वा स्यादिति ।

॥ अथार्कचारवशान्नित्यजातकफलमुच्यते ॥

। तत्र मेषे द्रेक्काणवशात्सूर्यफलम् ।

1. T तेष्वा° T1 अष्टो तेष्व for तेष्वो
2. T2 पाठः T मन्दोर
3. T1 पिट्टमेव
4. T1 मणतुडरुमामेग्गु°
5. T °क्थने
6. T गृह°
7. T पश्चय for षूपचय
8. T °भात्
9. T1 गाणे for दृगार्णे

A. द्र.प्र.र. ३११

B. द्र.प्र.अ.प २३.१४

C. अत्र मलयाळभाषया लिखिताः पश्चपङ्क्तयः अस्फुटाः अशुद्धाश्च दृश्यन्ते ।

D. द्र.प्र.र. ३१२

E. द्र.प्र.र. ३१३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[E]मेषस्याद्ये [°]दृगाणेऽर्के धातुद्रव्यायतिं वदेत् । 451

द्वितीये धान्यलाभश्च राजागमनमन्तिमे ॥ 452

व्या-द्रव्यलाभप्रश्ने रवावु[1]पचये आये वा स्थिते, मेषे स्थिते सति द्रेक्काणक्रमेणेदं फलम् ।

। गोचरवशात् द्रव्यलाभविचारः मलयाळभाषावचनेन निरूप्यते ।

[2]आयनिलयिल् द्रव्यं गोचरस्थे वरुन्नतु । 453

तस्मिन्नर्के मन्ददृष्टे मन्दवारे फलं वदेत् ॥ 454

व्या - वदेत् - प्रश्नकालीनार्के मन्ददृष्टे सति फलकाले पूर्वोक्त[3]द्रेक्काणस्थे रवौ जायमाने [4]मन्दवारे भवतीति वदेत् ।

। आयगृहद्रष्टुः ग्रहवशात् धात्वादिलाभनिर्णयः ।

[A]आय[5]गृहस्य यो [6]द्रष्टा तस्य धात्वादिकं फलम् । 455

व्या - आय[7]गृहद्रष्टुर्धातुलाभं मूलत्वे मूललाभमित्यादि वदेदिति ।

। आयगतार्कोपरि चन्द्रदृष्टेः फलम् ।

[B]चन्द्रेक्षितेऽर्के स्वजनं [8]मधुरद्रव्यभाग्भवेत् ॥ 456

व्या - तस्मिन्नर्के चन्द्रदृष्ट इत्यर्थः । स्वजनपदेनेष्टजनागमनं विवक्षितम् ।

। कृत्तिकास्थार्कोपरि जलराशिस्थचन्द्रदृष्टिफलम् ।

[C]जलर्क्षेन्दु[9]दृशा त्वाज्यं प्रतिकूले कुभोजनम् । 457

व्या - जल[10]राशिगतेन्दुदृष्टेऽर्के घृतलाभं वदेत् । प्रतिकूले तु शुष्कराशिगत[11] चन्द्र[12]दृष्टेऽर्के

---

1. T1 °पञ्चमे
2. T नार्य° T2 नायरनिलयल
3. T °द्रेक्काणस्त
4. T1 ''मन्दवारे'' इति ग्रन्थपातः
5. T °ग्रहस्य
6. T दृष्टा
7. T ग्रह°
8. T पुर for मधुर
9. T °वृशा, T1 °वृषा
10. T1 °रौरि for °राशि
11. T °गतं
12. T1 दृष्टेऽर्के दुर्भोजनं जल° इति ग्रन्थपातः

A. द्र.प्र.र. ३१६
B. द्र.प्र.र. ३१७
C. द्र.प्र.र. ३१८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दुर्भोजनं जलद्रव्यविनाशो बन्धुविरोधश्च स्यात् । एतत्फलं कृत्तिकार्के सोमवारे भवेदिति वदेत् ।

। कृत्तिकास्थार्कोपरि प्रबलकुजदृष्टिफलम् ।

[A]स्वर्क्षोच्चादि[1]स्थारदृष्टे स्ववारे युद्धतो जयः ॥ 458

व्या - [2]आदिपदेन मूलत्रिकोणादिपरिग्रहः । कृत्तिकार्के एतादृशा[3]रदृष्टे युद्धं भवति । [4]स्ववारे जयश्च भवति । धातुग्रहत्वात् धातुद्रव्यलाभश्च ।

। कृत्तिकार्के दुर्बलकुजदृष्टिफलम् ।

[B]प्रतिकूलारदृष्टेऽर्के पराजयमुपैति सः । 459

। युद्धयामे युद्धांशके वा स्थितस्य ग्रहस्य फलम् ।

यो [5]ग्रहो वा युद्धयामे युद्धांशे [6]समवस्थितः । 460

तस्य ग्रहस्य वारे तु निर्हेतुः कलहो भवेत् ॥ 461

। वायुयामे वाय्वंशके वा स्थितस्य ग्रहस्य फलम् ।

[7]वाय्वंशके वायुयामे स्थितखेटस्य वासरे । 462

राशौ वा गमनं [8]साध्यं बलहीनस्य दुःखदम् ॥ 463

व्या - बलवत्त्वे यात्रा सफला अन्यथा दुःखदेत्यर्थः ।

। अर्कोपरि धातुगतबुधदृष्टिफलम् ।

[9]धातुस्थबुधदृष्टेऽर्के पणाहरणवस्त्रभाक् । 464

। अर्कोपरि मूलस्थबुधदृष्टिफलम् ।

[C10]तद्दिने मूलस्थबुधदृष्टे ताम्बूलिकं फलम् ॥ 465

1. T2 पाठः, °स्तार
2. T आदेव° for आदिप°
3. T °शारं°
4. T सवारे द्र.म्.
5. T गृहो
6. T नं for स°
7. T वय्वांशके
8. T साद्यमध्यं for साध्यं
9. T धातुस्स°
10. T1 तद्दिने मूलस्थ° for ताद्दिने मूलस्य°

A. द्र.प्र.र ३२०
B. द्र.प्र.र ३२१
C. द्र.प्र.र ३२३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। अर्कोपरि जलर्क्षगतबुधदृष्टिफलम् ।

जलर्क्षस्थविदा दृष्टे तैललाभः स्ववासरे । 466

। अर्कोपरि जीवांशस्थबुधदृष्टिफलम् ।

[1]जीवांशस्थविदा दृष्टे [2]विद्वज्जनसमागमः ॥ 467

॥ पुनरपि कृत्तिकार्के गुरुवारे जायमानं फलमाह ॥

। कृत्तिकास्थार्कोपरि जीवगतगुरुदृष्टिफलम् ।

जीवनिष्ठेन गुरुणा दृष्टे [3]त्विष्टसमागमः । 468

। कृत्तिकास्थार्कोपरि धात्वंशगतगुरुदृष्टिफलम् ।

[A4]धात्वंशभूतगुरुणा [5]दृष्टे [6]रत्नसुवर्णभाक् ॥ 469

॥ [7]कृत्तिकार्के शुक्रवारफलम् ॥

। कृत्तिकार्के धात्वंशगतशुक्रदृष्टिफलम् ।

[B]धात्वंशशुक्रदृष्टेऽर्के ताम्रभाक् सुखभुक्तिभाक् । 470

व्या - वृषतुलांशस्थेऽपीदमेव फलम् ।

। कृत्तिकार्के मूलांशस्थशुक्रदृष्टिफलम् ।

स्ववारे मूलांशशुक्रदृष्टे कन्दं [8]च शर्कराः ॥ 471

व्या - कन्दं - सुवर्णादि । [9]लभ्यन्त इति शेषः ।

। कृत्तिकार्के जीवांशस्थशुक्रदृष्टिफलम् ।

[10]जीवांशस्थाच्छदृष्टेऽर्के चतुष्पात्स्त्रीसमागमः । 472

व्या - चतुष्पदां स्त्रीणां च लाभ इत्यर्थः ।

[C]मकर[11]कूरुपङ्गुनेकुम्बतुरुं उण्डुम् । 473

---

1. T1 जिजीवाश° for जीवांश°
2. T1 विश्वज्जन°
3. T त्वष्ट°
4. T यत्वंश°
5. T वरण for दृष्टे
6. T1 रत्नुवर्न भात् T वर्न for वर्ण
7. T कृत्तिकाले
8. T2 पाठः, T न शर्कराः
9. T2 पाठः T अभ्यन्त
10. T जीवांशस्थांश्च
11. T2 कुरुवराङ्गुनैकुम्भ, T1 माङ्गु for पुङ्गु

A. द्र.प्र.र ३२४ B. द्र.प्र.र ३२५

C. कुरुपुङ्गनै कुम्भतुरुवण्डुम् इति केरळपण्डितैः शोधितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

शनिव्याळशैलुण्डकुमशनिनोक्करैकेलकिलो ॥ 474
[1]मीनं कूरुं तानुं कूरुं व्याळवाळ[2]शैकु वूमा । 475
[3]कन्याळद्रेक्काण शोल्लुं बोळरियनुं किङ्ङने ॥ 476
इत्यादिमारुळ्ळतिनुमिव्वण्णं कनिशोलुक । 477

। रोहिण्यर्के चन्द्रदृष्टिफलम् ।

[4]रोहिण्यर्के तु चन्द्रेण दृष्टस्य तु शुभाशुभम् । 478
चन्द्रस्य बलहीनत्वे रोहिण्यां नागते [5]रवौ ॥ 479
ग्रहयोगं गळेल्लामु[6] स्वाशोल्लिवण्णमे 480
इन्नित्यजातं [7]दूतचेष्टाच्च [8]सुपरीक्ष्य च ॥ 481
रहस्यमेन्निं जुट्टु[9]शिष्यने परयावतु । 482

इति जम्बुनाथविरचिते सव्याख्ये प्रश्नसारसमुद्रे

प्रथमस्तरङ्गः ॥

---

1. T2 मीनङ्ङ for मीनं
2. T2 शैवूमाक for शैकु वूमा
3. T2 व्यङ्क्तेक्कोणाशोळ्ळुं पोळरियेनु
   T1 कत्वळत्तेक्काण for कन्याळद्रेक्काण
4. T रोहिण्यके
5. T रवा
6. T1 मुन्विशो for मुस्वाशो
7. T दुतवेष्ट्य°
8. T सुवरिक्ष्चे
9. T2 शिष्यव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ द्वितीयस्तरङ्गः ॥

अथ सञ्ज्ञादिकं शास्त्रान्तरादवगन्तव्यमिति मत्वा [1]होरादिषु चिन्त्यानर्थान् सङ्गृह्णाति।

। आत्मादिद्वादशभावसञ्ज्ञा आह ।

आत्मार्थस्सोदरो बन्धुः पुत्रोऽरिस्स्त्री मृतिः शुभः । 483

कर्मायो [2]निर्गमो भावाश्चिन्त्या होरादिषु ग्रहैः ॥ 484

व्या - निर्गमस्तु [3]व्यङ्ग्यार्थो व्ययनरकप्राप्तिलक्षणः ।

। प्रकारान्तरेण द्वादशभावानाह ।

अत्रैव -

[A]मूर्तिः कोशो धन्विनो वाहनानि मन्त्रः शत्रुर्मार्ग आयुर्मनश्च । 485

[4]व्यापारश्च प्राप्तिरप्राप्तिरेवं लग्नाद्भावा द्वादशैते विचिन्त्याः ॥ 486

[B]भुक्तिरमत्रं[5] भक्ष्यं भोज्यं भोजयितृभावमुपदंशम् । 487

सेचनमन्नं सहभुक् पूर्तिः कथा शयनमपि लग्नात् ॥ 488

। केन्द्राच्चिन्ताप्रकारमाह ।

पुनरपि -

हृदयं गृहं[6] च हिबुके [7]मध्याह्ने स्थानमानकोशाज्ञाः । 489

हृतनष्टपतितजाया [8]प्रवासपरिदेवनानि जामित्रे ॥ 490

मृतरोगगता चिन्ता कथा प्रवासाश्च विज्ञेयाः । 491

चङ्क्र[9]मणासनशय्यास्थितिरित्युदयास्तहिबुकदशमानाम् ॥ 492

---

1. T रोहादिषु T1 रोद्गिहादिषु
2. T1 निर्रनो
3. T व्यङ्ग्यार्थ
4. T व्यवहारश्च
5. T °मन्त्रं
6. T हृदयं for गृहं
7. T1 मध्याह्नो
8. T प्रसारि for प्रवासपरि
9. T चक्र

A. द्र.प्र.र ६८ तथा प्र.मा १४.१९

B. द्र.प्र.र ६६ तथा प्र.मा १४.१८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्रकारान्तरेण केन्द्रात् चिन्तनीयानाह ।

[A]च्युतिर्विल[1]ग्नाद्धिबुकाच्च वृद्धिर्मध्यात्प्रवासोऽस्तमयान्निवृत्तिः । 493

[B]हिबुके[2]नाथस्सलिलं नद्यागमनन्तु सप्तमेनैव । 494

दशमेन वृष्टिपतनं ब्रूयाल्लग्नेन त[3]त्रितयम् ॥ 495

। स्त्रीजातके प्रश्ने वा भावाद्विशेषचिन्तामाह ।

तासान्तु भर्तृमरणं [4]निधने [5]वपुस्तुलग्नेन्दुगं सुभगतास्तमये पतिश्च । 496

इत्याद्या अत्रैव विचिन्त्याः । अयमपि चिन्त्यो होरा[6]दिषु ग्रहैरित्यन्यविस्तरः । एतावदर्थजातसङ्ग्राहकश्लोकान् पठति ।

। लग्नादिद्वादशभावानाह ।

मूर्तिकुटुम्बसहोदरबन्धुसुतामित्रयुवतिमरणशुभम् । 497

कर्मायव्ययभावा भवन्ति [7]होरादिभिश्चिन्त्याः ॥ 498

। प्रथमभावाच्चिन्तनीयानाह ।

मूर्तिवयः[8] स्वशरीरस्वस्थानस्थितिसुखार्थकीर्ति[9]जयान् । 499

वृष्टिसरित्कूपादौ जलोद्गमं [10]चोत्तमाङ्गमपि[11] विद्यात् ॥ 500

। द्वितीयभावाच्चिन्तनीयानाह ।

[12]कौटुम्बाद् भर्तव्यं मुखं च वाग्दक्षिणाक्षिपू[13]र्वार्थान् । 501

विद्याद् भुक्तिविशेषान्विद्यामत्र प्रभेदांश्च ॥ 502

। तृतीयभावाच्चिन्तनीयानाह ।

सहजेन सहजविक्रमयोधसहायान् [14]गलोरःस्थानम् । 503

1. T °ग्राबुद्धिबुका°
2. T2 नाथ
3. T ततितयम्
4. T2 सिधने
5. T2 वप्रस्तु
6. T चिन्त्यारोहा° T2 विचिन्त्यारोहा°
7. T1 होरादि, ग्रन्थपातः
8. T1 °वर्दा
9. T1 °जभावयान्
10. T चोकत°
11. T °मव, T1 °मम
12. T कौडु°
13. T °र्वार्धा
14. T गलोरनौस्थानम्

A. द्र.ष.प १.२ अत्र षट्पञ्चाशिकायाः श्लोकस्य पूर्वभाग एव दृश्यते ।
B. द्र.प्र.मा १४.१६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विद्याद्दक्षिणकर्णभक्ष्यविशेषांश्च मूलादीन् ॥ 504

। चतुर्थभावाच्चिन्तनीयानाह ।

बन्धुभवनेन बन्धून् [1]गृह[2]मातृजलात्मवृद्धिभोज्यादीन् । 505
वाहनहृदयस्कन्धान् धनशयनसुखान्यधोजलं ब्रूयात् ॥ 506

। पञ्चमभावाच्चिन्तनीयानाह ।

सुतबुद्धिमन्त्रिणमपि मन्त्रभोजयितृभावान् । 507
हृदयोदरप्रदेशं [3]विवेकशक्तिं च निर्दिशेन्मतिमान् ॥ 508

। षष्ठभावाच्चिन्तनीयानाह ।

अरिभवनादरिचोरक्षतविघ्नक्लेश[4]नाभ्युदरदेशान् । 509
मधुरादिषड्उपदंशान् ग्रहराश्युदितान् वदेत् प्राज्ञः ॥ 510

। सप्तमभावाच्चिन्तनीयानाह ।

युवतिप[5]दाद्भार्यापतिसूपदधिगुडक्षीरम् । 511
आ[6]गमगमसरिदासिं ब्रूयान्मूत्राशयं च नष्टधनम् ॥ 512

। अष्टमभावाच्चिन्तनीयानाह ।

मरणाज्जीवनमरणं[7] गुह्यस्थानं च मरणहेतुं च । 513
अन्नसुखमरणदेशं परिभवमपि चिन्तयेत्प्राज्ञः ॥ 514

। नवमभावाच्चिन्तनीयानाह ।

शुभभवनाद्गुरुभाग्यं पितृपौ[8]त्रादीन्[9] तपःप्राप्तिम् । 515
ऊरुस्थानं स्वान्तं[10] सहभोक्तॄन् दानयोगमपि विद्यात् ॥ 516

। दशमभावाच्चिन्तनीयानाह ।

दशमात् प्रवृत्तिमाज्ञां कीर्तिं वृष्टिं[11] प्रवासपूर्त्यादीन् । 517

---

1. T °ग्रह° for गृह
2. T °मात्र°
3. T विवेशशक्तिं
4. T1 °काभ्युदर
5. T °वदा°
6. T अगम°
7 T जीवनं रणं
8. T °प्रौत्र°
9. T °दयो
10. T स्वन्त°
11. T दृष्टीन्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानं च[1] कर्माजीवं जानुस्थानं च निर्दिशेद्दासान् ॥ 518

। एकादशभावाच्चिन्तनीयानाह ।

आयेनार्थावासिं [A]पादावपि वामकर्णं[2] च । 519
जातानपि च तनूजान् च्येष्ठान् ब्रूयाद् धनस्याशाम् ॥ 520

। द्वादशभावाच्चिन्तनीयानाह ।

व्ययभवनाद् व्ययमखिलं पतनं [3]नरकेऽङ्गवैकल्यम् । 521
वामाक्षिचरणयुगलं शयनस्थानं वदेत्तादात्म्यं[4] च ॥ 522

। भावफलवृद्धिकारणान्याह ।

भावाधिपे[5] वा सत्त्वाढ्ये स्वामिसौम्ययुतेक्षिते । 523
तद्भावासित्वपुष्टित्वशो[6] भनत्वानि निर्दिशेत् ॥ 524

यो भावस्तदधिपो वा बली स्वामियुतदृष्टः । 525
शुभयुतदृष्टो वा तस्य भावस्य सद्भावः ॥ 526

व्या - सद्भावः पुष्टता शोभनत्वं वा निर्देष्टव्यमिति ।

। भावफलहानिकारणान्याह ।

विपरीतेन वैरित्वासमत्वालस्यमादिशेत् । 527

व्या - आलस्यमशोभनत्वमसत्त्वं[7] वा वदेदित्यर्थः ।

अत्रैव -

अरिनीचगते मूढे दुर्बले भावनायके । 528
भावस्य सम्पदं कर्तुं न शक्यं भावमाश्रितैः ॥ 529

। भावफलवृद्धिहान्योः कारणान्याह ।

भावात्त्रिकोणकेन्द्रे शुभदास्सौम्यास्समस्तभावेषु । 530

---

1. T न° for च
2. T र्न for र्णं
3. T नरके भ अंग°
4. T सं° for क्त्यम् अस्मात्
5. T °पो for पे
६. T१ ''शोभनत्वा'' इत्यस्मात्परं पञ्चमपङ्क्तिगतात् असत्त्वं ''वा'' इत्यस्मात्पदात् पूर्वं ग्रन्थपातः ।
7. T2 °असत्यं

A. अत्र जङ्घे इति पदं योग्यमिति भाति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पापास्त्रिलाभसंस्था [1]अरिमृत्युन्ययेऽखिला [2]नेष्टाः ॥ 531

व्या - 'शशाङ्कलग्नोपगतै'रित्याचार्यश्च । अत्र शशाङ्कलग्नपदं भावपतिभावपरमिति रहस्यम्। भावाश्च श्रीपत्याद्युक्तप्रकारेणानीय चिन्त्याः ।

। भावफलसिद्धिहान्योः कालमाह ।

जन्मलग्नाधिपती भावपतत्कारकौ च भावेषु । 532
चरतो यदा तदा ते भवन्ति भावास्त्रिकोणगेऽस्ते वा ॥ 533
भाव[3]पतिस्थितराशौ तत[4]स्त्रिकोणास्तभेऽपि वा चरतः । 534
भावा भवन्ति सफला विफला गुळिकेशनिधनखरप[5]युताः ॥ 535
[6]यद्भावेशोऽरि[7]नीचस्थो मूढो वा तं न[8] [9]वीक्ष्यते । 536
तद्भावासत्त्वमालस्यं वैरित्वं वा तदा[10]दिशेत् ॥ 537

व्या - तन्न वीक्ष्यते तं भावं न पश्यति यदि तदेत्यर्थः । मूढस्य भावेशस्य स्वभावगतत्वे भावस्य रुग्णत्वमतीतत्वं भविष्यत्वं वा वदेदिति ।

। वस्तुलाभार्थसिद्ध्योर्योगः ।

लाभार्थेशावर्थलाभगतौ लाभार्थसिद्धिदौ । 538

। लग्नगतभावेशात् फलचिन्ताविधिमाह ।

यद्भावेशो लग्नगोऽस्य तद्भावास्तित्वमादिशेत् ॥ 539

व्या - स्फुटः । अत्र सर्वत्र भावपदेन तत्तद्भावकारकोऽपि विवक्षितः । तस्यापि भावसाधकत्वेन भावेशतुल्यत्वात् । वक्ष्यते च विवाहप्रश्ने ।

। प्रश्नात् मातापित्रोः मृतिचिन्तामाह ।

यदि नीचारिगो लग्नमारूढं वा न पश्यति । 540
अर्कः स्त्रियः पिता नास्ति मातेन्दुश्चेत् तथाविधः ॥ इति ॥ 541

---

1. T °धा°
2. T °न्नेष्टाः°
3. T भन° T1 भव°
4. T °त्र
5. T °व°
6. T यदावेशो
7. T1 °विच स्थो
8. T नि° द्र.व्या
9. T1 निवेक्ष्यते
10. T °वा for दो°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। द्विपदादिनाशचिन्ताज्ञानमाह ।

द्व्यङ्घ्र्यादिलग्नगः पापो द्विपदादि[1]विनाशदः[2] । 542

व्या - द्विपाद्राशौ लग्नभूते पापग्रहे स्थिते सति द्विपदनाशः । चतुष्पाद्राशौ लग्नभूते पापग्रहे[3] स्थिते सति चतुष्पद[4]नाश इत्याद्यूह्यम् ।

। अचिराच्चिराद्वा पुत्रादिसिद्धिचिन्तामाह ।

यदि पुत्रेश्वरो लग्ने समीपे वा स्थितोऽचिरात् । 543

पुत्रोऽप्यस्तीत्य[5]न्यथा दूरे न्यायो भार्याविधावपि ॥ 544

व्या - समीपे - लग्नसमीपे । लग्नाद्दूरे चेदन्यथा । चिरकालादित्यर्थः । भार्याविधा[6]वपि भार्या सहजादिसिद्धिविधावप्ययं न्यायश्चिन्त्य इत्यर्थः । पुत्र[7]भावं यावन्तो ग्रहाः[8] पश्यन्ति, अधितिष्ठन्ति वा तावतः पुत्रादीन् वदेत् । नीचारिगैः ग्रहैः तावन्तो मरिष्यन्तीति ।

अत्र श्लोकः -

। विद्यमाननष्टसन्तत्यादिज्ञानोपायमाह ।

यावद्ग्रहैर्युतं दृष्टं पुत्रभन्ता[9]वतः सुतान् । 545

वदेन्नीचारिगे नष्टानेवं भ्रात्रादिकं वदेत्[10] ॥ इति ॥ 546

अथोदयारूढयोर्बलवता द्वादशसंवत्सरावधिकं फलमूह्यते ।

। भावफलोत्पत्तिकालविशेषज्ञानोपायमाह ।

[11]लग्नवदुदितो भावस्तथैव भवत्यारूढः । 547

व्या - अत्र लग्नारूढयो[12]र्बलवता द्वादशसंवत्सरावधिकं[13] प्रधानं भाविफलकथनमिति सम्प्रदायः । लग्नोदितभावतुल्यान्[14] द्वादशभावान् परिकल्प्य, उदितद्वादशांशादुत्क्रमेण यतमेंऽशे ग्रहःस्थितस्ततमे वर्षे स भावोऽभवदिति वदेत् । उदितांशे[15] ग्रहयुते तस्मिन् वत्सरे भवतीति वदेत् । [16]अनुदितद्वादशांशे ग्रहांशसंवत्सरे भविष्यतीति वदेत् । द्वादशवत्सरादतीते भावे

---

1. T द्विविवादि
2. T °विनाशः
3. T1 ग्रहे इति ग्रन्थपातः
4. T1 °ष्पाद°
5. T °स्तिर°
6. T भार्याप्रिया° द्र.मू.
7. T पुत्रा°
8. T ग्रहो न
9. T °त्ता°
10. T1 पाठः T वदेति
11. T लग्नवदुदितो भवत्या भवत्यारूढः श्र
12. T लग्नरूढमयो
13. T1 °सांवत्सरादधिकं
14. T भवत्तुल्यां T1 लग्नोदयभवतुल्यां
15. T उदितावशो
16. T1 अनुदिततद्वाद

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्भावपतिरुदितांशश्च यतमेंऽशे स्थितस्ततमे वर्षे वदेत्। दृश्यभागस्थि[1]तश्चेदेवंलक्षणः उदित[2]राशिः स्थित इत्यर्थः। अनुदितेषु स्थितश्चेत् भविष्यतीति वाच्यम्। [3]नवमांशाधिप- स्थितनवांशेन वा बलयुतेन वदेदिति।

। लग्नादिस्थानविशेषगतैर्ग्रहैर्भवद्भाविभूतशुभाशुभज्ञानोपायमाह।

[A]लग्ना[4]दापञ्चमगैरानवमस्थैश्च पञ्चमान्नवमात्। 548

आलग्नगैरपि[5] भवद्भावि च भूतं शुभाशुभं वाच्यम्॥ इति च॥ 549

। भौमात् पुत्रादिमरणचिन्तामाह।

पुत्रादिस्थानगो भौमः पुत्रादिमरणप्रदः। 550

एवं भ्रात्रादिभावाः स्युर्भ्रातृवत्सुत आचरेत्॥ 551

व्या - आदिपदेन कळत्रादीनां नाशं कुर्युः, पापः शत्रुश्चेद्विशेषादिति।

। षष्ठभावगतग्रहफलमाह।

पापोऽरिगः शत्रुवैरं शुभश्चेन्मरणं वदेत्। 552

व्या - स्पष्टः[6]। अङ्गविभागादि प्रपञ्चोऽस्मदु[7]क्तप्रश्नदीपिकायां द्रष्टव्यः।

। मतान्तरेण ग्रहाणामङ्गविभागमाह।

मूर्धास्यकण्ठवक्षोहृदूरुजान्वङ्घ्र्योऽजपात्॥ 553

व्या - अजपात् मेषकुजमारभ्येत्यर्थः। कुजसितबुधचन्द्र[8]रविगुरुशनिराहूणामङ्गानीत्यर्थः। व्रणभूषणादि परिज्ञानेऽस्य विनियोगः।

। राशीनां ह्रस्वदीर्घसमसञ्ज्ञामाह।

दीर्घाः सिंहात्तु[9] चत्वारो ह्रस्वाः[10] कुम्भात् परे समाः। 554

। सूर्यादिसप्तग्रहाणामाकृतिमाह।

चतुरश्रो मण्डलाङ्गश्चतुरश्रस्त्रिकोणकः। 555

दीर्घवृत्तोऽर्धवृत्ताङ्गश्चतुरश्रायतो[11] रवेः॥ 556

1. T स्ति
2. T1 राशिरित्यर्थः
3. T वमंशा
4. T ग्र
5. T2 पाठः T °रवि
6. T1 स्पष्ट इति ग्रन्थपातः
7. T अस्मिन्दुक्त°
8. T °चन्द्रौ
9. T °र्तु
10. T ह्रस्वात्कुम्भा°
11. T1 तो रवेः चतुरश्रायतः इति ग्रन्थपातः

A. द्र.प्र.अ.प. १८.११

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - चतुरश्रायत आयतचतुरश्राङ्गः शनिरित्यर्थः । शनिवद्राहुरपीति । रवेः रविमारभ्येत्यर्थः । ल्यब्लोपे पञ्चमी ।

। ग्रहाणां ह्रस्वदीर्घसमसञ्ज्ञामाह ।

मध्यौ[1] सितार्कौ[2] जीवेन्दू दीर्घौ[3] ह्रस्वाः परे स्वभैः । 557

व्या - [4]स्वभैः स्वक्षेत्रैस्सह [A]स्वक्षेत्राणामपि ह्रस्वदीर्घत्वादिकं स्वामिव[5]द्रष्टव्यमित्यर्थः ।

। दुरुधुराफलं चतुरश्रगतग्रहफलमाह ।

क्रूराः [B6]कुर्युर्दुरुधुराः चतुरश्रगता[7] मृतिम् । 558

शुभैः दृ[8]ष्टा रोगमात्रं बलिभिर्न गदानपि ॥ 559

व्या - यस्य जीविनो[9] जन्मचन्द्रस्य वाधिप[10]स्य वा दुरुधुरा[11]चतुरश्र[12]स्थिता द्रष्टारो वा क्रूरा मृतिं कुर्युः । तस्य पुंस्त्वे शीघ्रं मृतिं यच्छन्ति । ते क्रूराः शुभैः[13] दृष्टाश्चेद्रोगमात्रं कुर्वन्ति। बलिभिः शुभैः दृष्टा[14]श्चेद्गदानपि न कुर्युः । [15]शुभदुरु[16]धुराश्चेद्रोगो न सम्भाव्यते । उभयतः पापस्य चन्द्रस्य चतुर्थाष्टमयोश्च क्रूरस्थित्या बहुवचनोपपत्तिः । यच्चतुरश्रदुरुधुरा[C] सर्वभावसाधारणा उक्ता ।

॥ पापदुरु[17]धुरा चन्द्रमसः[18] सौरस्य चेत्तत्फलमाह ॥

यद्भावस्स शनिस्सौम्यादृष्ट[19]स्तद्भावनाशदः । 560

व्या - यस्य [20]जन्मिनो जन्मचन्द्रस्य जन्मादिस्थसौम्यादृष्टो मन्दोऽशुभदुरुधुरा[D]गतो भवति, तस्य देहादिभावस्य नाशं करोति । क्रूरदृष्टश्चेच्छीघ्रम् । जन्मस्थश्चेत्[1] शरीरनाशं,

---

1. T1 मद्यौ
2. T °तार्कजीव°
3. T दीर्घ
4. T1 स्वभैः इति ग्रन्थपातः
5. T1 द्रष्टव्यमर्थः
6. T1 कुर्याकुरधिरातुरा कुर्युर्दुरुधिरा
7. T °का
8. T °र्द्रं°
9. T जिजिनो
10. T वाधित°
11. T1 धुरधारा T धुरधुरा
12. T चतुश्रेष्ठ°
13. T शुभ्रै°
14. T दृष्ट्वा°
15. T1 शुभ्र धुस्वाराश्चेन्द्रोगा
16. T °धुरुस्वारा
17. T1 धुरु इति ग्रन्थपातः
18. T चन्द्रमी
19. T1 पाठः T सौमुयदृष्टः
20. T2 पाठः T जन्मनो

A. अत्र स्वग्रहाणामपि इति युक्तं मन्ये ।

B. अत्र दुरुधुरा शब्दस्य स्थाने धुरधुरा इति प्रयोगः लेखकप्रमादादिति मन्ये ।

C, D. अत्र दुरुधुराशब्दस्य स्थाने धुरुधुरा इति लेखकप्रमादादिति मन्ये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सहजबन्ध्वादिस्थश्चेत्सहजबन्ध्वादिनाशं, तदर्थराशौ मेषे[2] स्थिते मेषादिनाशं, वृषे वृषविनाशं इत्याद्यूह्यमिति[3]। सौरस्य शुभदुरुधुरा चेच्छुभमेव भवतीति, अनेन गोचरफलकथनेन प्रश्नजातकयोरपि गोचरफलस्यानुसर्तव्यत्वं सूचितमिति।

। कारकग्रहानाह ।

[A]इष्टभावादर्थ[4]स्थो वा लग्नगो मदगोऽपि वा । 561
[5]बली वा योगकर्ता वा कारकग्रह इष्यते ॥ 562

तत्तद्भावाधिपस्तत्तद्भावाध[6]स्तनभस्थितः । 563
तद्भावकेन्द्रे राशौ वा बली चेत् स तु कारकः ॥ 564

व्या - भावाधस्तनभात्[7] भावकेन्द्रभाद्वा अन्यत्र संस्थितस्य बलिनोऽपि न कारकत्वम्। अत्रावस्थितस्यापि दुर्बलस्य न कारकत्वमिति तत्त[B]द्भावाधिप [8]इत्यस्यार्थः। तद्भावाधिपः तद्भावादधस्तनराशौ तत्त[9]द्भावकेन्द्रे वा यदा बली तर्हि स एव तद्भावकारकः। योगकर्ता बली चेत् स एव कारकः। तत्तद्भावफलासाधारणग्रहश्चन्द्रो लग्नाधिपतिश्च भावाधिपतुल्यौ। 'ग्रहो विलग्नाद्यतमे' इत्यादिफलकालविशेषाश्चात्र चिन्त्याः।

। मातृमरणनिष्प्रसूयोगद्वयमाह ।

[10]चन्द्रे क्रूरहते मातुर्मृतिर्जीवति बालकः । 565
धनायकेन्द्रा विशुभा यदि सा[11] निष्प्रसूः पुनः ॥ 566

व्या - शुभदृष्टिरित्यपि विशेषणीयम्। निष्प्रसूः - पुनः [12]प्रसवरहिता सा माता।

। आत्मादिभावगतानां सूर्यादीनां फलान्याह ।

आत्मादिभावगेऽर्कादौ तत्तद्भावेष्विदं फलम् । 567
नाशः सौख्यं रुगारोग्यं दीर्घायुर्भोगमारणे ॥ 568

---

1. T °त्व°
2. T शेषे
3. T1 मिति सामिति सौरस्य। एवं समिति अधिकः पाठः
4. T °य°
5. T1 पाठः T बलिना
6. T1 °स्तनभे
7. T °भाक्
8. T1 इत्यर्थः
9. T1 °द्भायुव केन्द्रे
10. T1 चन्द्रो
11. T1 ह
12. T प्रस्व°

A. द्र. १२१६ व्या
B. इदं मूलात् परिशोधितम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - [1]भोगश्शुक्रगतभावस्य, मारणं मन्दगतभावस्येति ।

॥ शीर्षोदयादिविभागं तत्फलं चाह ॥

गोऽजाश्वकर्किमकराः पृष्ठगास्तिर्य[2]गन्त्यभम्[A] । 569

तेष्वनिष्टं फलं मिश्रं शुभं[3] शीर्षोदयेषु च ॥ 570

व्या - पृष्ठगाः - पृष्ठोदयाः । तिर्यक् - उभयोदयमित्यर्थः ।

शीर्षोदयास्सिंहयुग्मकन्यातौलिघटाळयः । 571

व्या - पृष्ठोदयादयस्सर्वेषु भावेषु चिन्त्याः । तेषु पृष्ठोदयेषु अनिष्टं वधवन्धदुरितरोगमरणहा[4]न्यादिकं[5] यत्पृष्टं तत्सिध्यतीत्यर्थः । फलन्तु निम्नत्वसमत्वोन्नतत्वाधोमध्योर्ध्वलोकत्वदूरमध्यासन्नत्वादि । चशब्देन ग्रहरहितेष्वेवं अनिष्टाद्युक्तफलसिद्धिः । ग्रहसहितेषु तु ग्रहवशात् फलसिद्धिरिति ज्ञापितम् । मेषवृषधनुरुदये भयमायुर्वास्ति न वेति पृच्छायां नास्तीत्येव ब्रूयात् । कन्यातुलाळिषु यात्रालाभो मरणमायुर्वा न वेति [6]प्रश्ने सर्वमस्त्येवेति वदेत् । अन्येषु यथास्वं सिध्यति । मिथुनकुम्भसिंहे[7]ष्विष्टं, मीने तूभयं सममिति सम्प्रदायः ।

॥ अथ मनुष्येषु देहात्रिधातुत्रिदोषशीलविद्यादिकं [8]ग्रहैर्वक्तुं ग्रहस्वरूपमाह ॥

। सूर्यस्वरूपमाह ।

[B]रक्तः श्यामः कृशो ह्रस्वो मध्वक्षः पैत्ति[9]कोऽस्थिमान् । 572

शूरोऽल्पकेशो [10]मूर्खश्च कौसुम्भवसनो रविः ॥ 573

व्या - उच्चगतो रक्तप्रधानः, नीचगत्या[11] श्यामप्रधानरक्तः । अस्थिमान्[12] - अस्थिसारः ।

। चन्द्रस्वरूपमाह ।

[C13]चपलः प्रियवाग्दी[14]र्घो व्रणी स्वक्षो मृदुश्शशी । 574

---

1. T1 पाठः T भोगशुक्रः
2. T1 °गन्त्यहम् T °गेत्यहम्
3. T °भ°
4. T °ह°
5. T2 °क° T °ष° T1 हस्यदिष for हान्यादिकं
6. T1 प्रश्ने सर्वमस्त्येवेति इति ग्रन्थपातः
7. T °ह्वे
8. T गृ°
9. T °त्रि° T2 पौत्रिणो
10. T मूकश्च कु कौसु°
11. T °त्य
12. T °त्
13. T वनल T1 ववलः द्र.व्या
14. T °दीर्धव्रणी

A. व्याख्यागतस्य तिर्यक् पदस्यार्थानुरोधेन ''एत्यहम्'' इत्यस्य स्थाने अन्त्यभं इति कृतम् ।

B. द्र.प्र.र २६४-२६५

A. द्र.प्र.र २६६-२६७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्निग्धो [1]गौरो रक्तसारः प्राज्ञो [2]वातकफात्मकः ॥ 575

व्या - चपलः - क्षिप्र[3]कर्मकारी ईषद्गौ[4]रः [5]पीतिमानुविद्ध[6]श्वेतनिभः ।

। कुजस्वरूपमाह ।

[A]पैत्तिकश्चपलो बालो मज्जासारो झषोदरः । 576

क्रूर[7]दृगथोग्रस्त्र्यश्रो[8] रक्तगौरः क्षमासुतः ॥ 577

व्या - बालो - बालाकारः[9] । क्रूरदृक् - क्रूराक्षः ।

। बुधस्वरूपमाह ।

[B]बुधो [10]हास्यरतिः श्यामो मध्याकारः स्थिराततः । 578

कामी च मिश्रप्रकृतिः श्लिष्टवाक्[C] [11]स्पष्टमानसः ॥ 579

व्या - श्लिष्टवाक् - संहतभाषी । मिश्रप्रकृतिः - त्रिदोषप्रकृतिः ।

। गुरुस्वरूपमाह ।

[D12]मध्वक्षः श्लैष्मिको गौरो मेद[13]स्सारो बृहस्पतिः । 580

वाग्मी विशालकुक्षिः स्यादीषत्पिङ्गळरोमकः ॥ 581

व्या - स्पष्टः ॥

। शुक्रस्वरूपमाह ।

वातश्लेष्मात्मकः कान्तोऽधस्ता[14]न्निर्मार्जितो भृगुः । 582

विकृष्टपर्वा कान्ताक्षः शुक्रसा[15]रस्सुवाक् प्रभुः ॥ 583

---

1. T गारो द्र.व्या
2. T वा तत्फलात्मकः
3. T क्षेम°
4. T °गौर
5. T1 पाठः T पीतिमानः T2 वीतिमानः
6. T °श्वेतरिभः
7. T °दिग्वथक्र°
8. T1 त्र्यशी
9. T °कराः
10. T ह्यरतिः for हास्यरतिः
11. T स्पृ°
12. T2 मध्वक्षि
13 T मन्द °
14. T2 °न्निन्मार्जितः
15. T °क्लस्सा°

A. द्र.प्र.र २६८-२६९
B. द्र.प्र.र २७०
C. द्र. व्याख्या
D. द्र.प्र.र २७१-२७२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अधस्तान्निर्मार्जितः - विरेच[1]नेन शोषितकायः । विकृष्टपर्वा - शिथिलसन्धिबन्धः ।

। शनिस्वरूपमाह ।

[A]खररोमा स्थूलवक्त्रः पिङ्गाक्षो[2] [3]वातिकश्शनिः । 584

[4]पिशुनः स्नायु[5]सारश्च कृष्णो दीर्घोऽलसः कृशः ।। 585

व्या - पिङ्गाक्षः मार्जार[6]सदृशाक्षः । स्थूलवक्त्रः स्थूलदन्तश्च । पिशुनः- कर्णे[7]जपः ।

अत्र कृष्णाचार्यः -

। ग्रहस्वरूपज्ञानफलमाह कृष्णाचार्यः।

एते ग्रहा बलिष्ठाश्चिन्ताकाले नृणां स्वमूर्तिसमान् । 586

कुर्युर्देहान्नियतं बहवश्च समागता मिश्रान् ।। 587

व्या - चिन्ताकाल इति जन्मकालस्याप्यु[8]पलक्षणम् ।

। स्थानविशेषगतग्रहात् शरीराकृतिनिर्धारणोपायमाह ।

ग्रहैः केन्द्रत्रिकोणस्थैः देहलक्षणमादिशेत् । 588

चन्द्रो बली यत्र तिष्ठेत्तत्क्षे[9]त्रस्वामिदेहभाक् ।। 589

व्या - जातः दृष्टो वेति शेषः । जातके लग्नगतेन ग्रहेण वदेदिति । जातिविभागबलादिकमन्यत्र प्रपञ्चितम् ।

। प्रश्नमात्रोपयोगिनो दिगीशान् ग्रहानाह ।

प्रागाद्या रविभौमेड्यबुधाच्छार्कीन्दुराहवः । 590

व्या - अयं प्रश्नैकविषयः ।

। जातकमात्रोपयोगिनो दिगीशान् ग्रहानाह ।

---

1. T °व°
2. T °को द्.व्या
3. T पा°
4. T2 विशुन
5. T2 न्मायु°
6. T1 माहिरि for मार्जार
7. T °नै°
8. T °भ्यु°
9. T तिष्ठोत्तमुक्षे T1 तिष्ठोत्तमर्क्षे

A. द्र.प्र.र २७३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रागाद्या रविशुक्रलोहिततमस्सौरेन्दुवित्सूरयः ॥ 591

व्या - इति जातकैकविषयः । उच्चादिबलयोगः प्रश्नेऽप्युपयोज्यः । अनेन भूयिष्ठं प्रश्नकर्म, प्रसवनिवृत्तिमरणादीनां नष्टमुष्ट्यादिद्रव्यस्य च दिक्परिज्ञाने विनियोगः । बलिनां ग्रहाणां केन्द्रस्थित्यभावे राशिदेशो ज्ञेयः ।

उक्तं च -

[A]दिग्वाच्या केन्द्रगतै[1]रसम्भवे वा वदेद्वि[2]लग्नर्क्षात् । 592

व्या - क्षणिकग्रहचारोऽप्यत एव स्थानादारभ्य पञ्चाशत् पञ्चाशत् पञ्चाशत्सु विनाडिष्वेकैकस्मिन् राशौ स्थित्वा प्रकृतरविवन्नित्यमुदयकाले मेष[3]वृषमध्यगः, भौमस्तु मिथुनमध्यग इत्यादि ज्ञेयम् ।

। ग्रहाणां विलोमानुलोमगतिमाह ।

तत्रापि -

विलोमगाः पतङ्गार्किजीवा अन्येऽनुलोमगाः[4] । 593

व्या - [5]प्रश्नोपयुक्तनित्यग्रहगतिज्ञानमप्येतदधीनम् । मेषमासप्रारम्भे मेषवृषसन्धौ [6]ध्वजात्मा रविः स्थितः, धूमात्मा कुज[7]स्तु मिथुने[8] पञ्चदशभागानतीत्य, एवं सिंहे शुक्रः[9] वृषखरगज ध्वाङ्क्षात्मकानां वारगुर्वादीनामपि कर्कटकान्त्यादिषु स्थितिर्ज्ञेया । पुनश्चार्कगतिं विमृश्यै[10] वैषां चारः, तथा हि - रविस्फुट एकं राशिं क्षिप्त्वार्कस्थितिः । द्वौ राशी पञ्चदशभागांश्च प्रक्षिप्य कुजस्थितिरित्याद्युन्नेयम् । तथा नित्यं प्रथमो यामो रवेर्द्वितीयो भौमस्य तृतीय ईड्यस्येत्येवमर्धाधिकसप्तनाडिका एकैकं भागं कृत्वा योज्यम् । पादोनचतस्रो नाडिका इत्यन्यमतम् । तथार्कादिवारेषु [11]होराधिपस्थानादारभ्याहिमृत्युसञ्चारः पञ्चाशत्सु विनाडीषु कल्प्यः । तत्र प्रदक्षिणगो मृत्युः, अहिः[12] सव्यतः तत्र मृत्युः रणकृदन्यो रोगामय[13]कृदिति ।

। द्वादशराशीनां प्रागाद्यष्टदिक्षु स्थितिमाह ।

---

1. T गैः
2. T लग्नात् for लग्नर्क्षात्
3. T निमेष्ट for मेष°
4. T1 पाठः T सलोमगाः
5. T1 प्रप्रोपयुक्तं
6. T1 जात्मा for ध्वजात्मा T2 ध्वजत्मा
7. T ञ्ज°
8. T1 मियुने इत्यस्मात्परं पञ्चमपङ्क्तिगतात् 'पञ्चदशभागांश्च प्रक्षिप्य' इत्यस्मात्पूर्वं ग्रन्थपातः।
9. T सिंह शुके
10. T °विमैशेंसे for °विमृश्यै
11. T पारा°
12. T1 अस्सवतः
13. T °गगय°
14. T दौ द्वौ

A. द्र.ष.प. ६.४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिक्षु प्राच्यादिषु [14]द्वौ द्वौ राशयः कोणगा यमाः ॥ 594

व्या - कोणगाः- आग्नेयादिकोणगाः[1]। यमाः[2] -यमळौ मिथुनाद्युभयराशय इति यावत्। अनेन भूचक्रसंस्थानमुक्तम्। यस्मिन् राशौ प्रष्ट्र[3]रोहणं, काकगौळ्यादिमनुष्यपशुभेरीमृदङ्गादिरवः क्षुतं वा तदारूढम्। तदपरिज्ञाने न्यस्तराशिश्च। आरूढराश्युपरिस्थित[4]तत्तदाकाशराशिः छत्रम्।

तत्परिज्ञानन्तु -

। छत्त्रराशिपरिज्ञानोपायमाह ।

आरूढादुदयं यावत्तावच्छत्त्रं [5]क्रियादितः । 595

वृषसागरगे सूर्ये मेष एव क्रिया मतः ॥ 596

वीणाकीटाब्धिगे कन्या तुलामी[6]नाजगे वृषः । 597

व्या - इत्यनेन उदयपरिज्ञानन्तु 'द्विगुणं रूपसंयुक्तं', 'छायोनन्तेन भाजितम्' इत्यादि तत्तद्देशघटिकानयनप्रकारेण। तत्र प्रथमप्रश्न उदयप्रधानः, द्वितीय आरूढप्रधानः, उभयमपि छत्त्रानुग्राहितयापेक्षितम्। आरूढप्रधान ईदृशं छत्रं, लग्ने प्रधाने तु वक्ष्यमाणप्रकारः। उद्यदंशकपरिज्ञाने तु नवांशक एवोदय उक्तः। तदानीं पूर्वोक्ता सूक्ष्मपञ्चाशत्सु पञ्चाशत्सु विनाडीष्वेकैकस्मिन् राशौ प्रवर्तमानग्रहगतिः।

अंशकापरिज्ञाने तु स्थूलोदयप्रधानः प्रश्नः। पञ्चाशत्सु[7] पञ्चाशत्सु नाडीष्वेकैकस्मिन् राशौ ग्रहगतिः। सैव आरूढप्रधाने तु पूर्वोक्ता स्थूला सूर्यस्फुटवशानुगा लोकसिद्धा [8]अस्तु। योनिभेदबलादिकमस्मदुक्तप्रश्नदीपिकायां प्रपञ्चितं तत्रैव द्रष्टव्यमिति।

। अजवृषभमृ[9]गाङ्गनेत्युच्चादिलक्षणं उक्तम् । तत्फलमाह ।

सुखी सुकर्मा राजन्यो राजा दिव्योऽत उच्चगैः । 598

एकादिभिस्तुङ्गगतै[10]रेतत्प्रश्ने फलं क्रमात् ॥ 599

व्या - एक[11]स्मिन्नुच्चगे केन्द्रगते सुखी भवति। सर्वत्र केन्द्रगै[12]रेव। राजन्यः - [13]राजतुल्यः। राजा - चक्रवर्ती। अतः परं पञ्चभिरुच्चगैर्दिव्यो भवतीति। एवं जातके[14]। प्रश्ने तु

1. T °णगां°
2. T1 यमा यमा for यमाः
3. T प्रष्ट्य°
4. T1 °तत्तकाश°
5. T2 क्रियो°
6. T °नजगे°
7. T पञ्चसु
8. T1 °मस्तु
9. T1 गाङ्गने इति ग्रन्थपातः
10. T °रेतत्फलं
11. T °एत°
12. T1 °रेमाजन्यः for °रेवराजन्यः
13. T2 पाठः T राजनु
14. T °तक

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उच्चगे पश्यति सुकर्मा। अत्युच्चगे पश्यति दिव्यकर्मा। नीचगे निकृष्टकर्मा। अतिनीचगे तु नारककर्मा चिन्तितः चोरादिर्वा। केचित्तु उच्चस्थस्य दृष्ट्या सर्वतस्सुखी भवति। उच्चगयोः दृष्ट्या सर्वकर्मभोक्ता। उच्चगानां दृष्ट्या राजा। [1]चतुर्णां दृष्ट्या चक्रवर्ती। पञ्चादीनां दृष्ट्या देवसमा भवन्तीति। नीचग्रहे अनायुर्वा नीचो वा भवति। नष्टे[2] नश्यति नरककर्म च क्लेशश्च। बहवो नीचस्था यदि स्युः चण्डालाः, स्वजातीयेभ्योऽधमा[3]श्च भवन्तीति।

॥ अथ रश्मिः ॥

। सूर्यादीनां रश्मिसङ्ख्या आह ।

५ २१ ७ ९ १० १६ ४

[A][4]मुनिः परः सन्नि धेनुः नित्यं तोयं वनं रवेः। 600

व्या - अनेन प्रश्नजातकयोरायुस्सङ्ख्या [5]द्रष्टव्यक्षेत्रकालादिसङ्ख्याप्यनेन ग्राह्याः।

। ऊर्ध्वाधस्तिर्यगास्यलग्नेषु शुभाशुभचिन्ता ।

[B]ऊर्ध्वाधस्तिर्यगास्योक्ता मुक्तयुक्ताभिकाङ्क्षिता। 601
सिद्धिरूर्ध्वास्यलग्ने[6] स्यात् लग्ने स्यादन्यथाशुभम्[7] ॥ 602

व्या - दृग्वशात् ऊर्ध्वमुखादिकेन्द्राणामप्यूर्ध्वमुखादिसञ्ज्ञाः स्युः। प्रश्नकाले ऊर्ध्वमुखराशेर्लग्न[8]त्वे यात्राविवाहादिसिद्धिः। अन्ययोरधस्तिर्यङ्मुखराश्योर्लग्नत्वे शुभदृष्टियोगवशात् यात्रासिद्धिरन्यथा नेति। रवेः प्राबल्ये तूर्ध्वमुखादिवशेन द्रव्यस्योर्ध्वादिभागपरिज्ञानं, [9]शीघ्रमध्यादिकालपरिज्ञानं चेति। बुधमन्दयोः प्राबल्ये व्यत्यासेन सम्बन्धेति।

। अष्टमङ्गलविधिः।

अथाष्टमङ्गलाभिधो विधिर्मयाभिधास्यते। 603

---

1. T चतुर्वर्नानां
2. T °नष्टं
3. T °धर्मा °
4. T रश्मिः
5. T1 द्रव्यक्षेत्र°
6. T1 °लग्ने स्यात् इति ग्रन्थपातः
7. T योऽशुभ
8. T1 लग्न इत्यस्मात्परं °लग्नत्वे शुभ° इत्यस्मात् पूर्वं गन्थपातः
9. T1 शीघ्रमध्यादिकालपरिज्ञानम् इति द्विवारं लिखितम्।

A. अत्र सूर्यस्य रश्मिसंख्यादर्शनात् पद्यारम्भे स्थितस्य रश्मिपदस्य स्थाने प्रश्नज्ञानप्रदीपग्रन्थदृष्ट्या मुनिरिति पदं प्रयुक्तम्। पंचैकविंशद्गिरयो नवाशाः षोडशाब्धयः। भास्करादिग्रहाणां तु किरणाः परिकीर्तिताः॥ द्र.प्र.ज्ञा.प्र. २.५९

B. द्र कृष्णीयम् ३.१५-१६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुविस्तरात् कृतादृते लघुप्रकारकीर्तितः ॥ 604

। वराटिकासंस्कारविधिः।

सुभगवराटिकजनकान् [1]पयसा सङ्क्षाल्य सुफलके । 605
विमलानभ्यर्च्य चन्दनाद्यैर्ग्रहान् महेशं च पूजयेत्तेषु ॥ 606

। वराटिकायां महेशग्रहादीनां पूजाविधानम् ।

कैलासमूर्तिकलधौतमये समस्त-
रत्नस्फुरत्स्फटिकमण्डलमध्यसंस्थम् । 607
सम्पूज्य सूर्यकुज[2]वाक्पतिवित्सितार्कि[3] -
चन्द्रोरगानपि यजेत्परिवारभूतान् ॥ 608
[4]चक्रव[5]त्प्रणवबीजैर्बि[6]न्द्वन्तैः नामसंयुतैर्विहगान् । 609
साक्षात्षडक्षरेण च भगवतः पूजयेत् तथा ध्यायेत् ॥ 610

। संस्कृतवराटिकानां बालादिना त्रिधा विभागविधानम् ।

[A7]संस्कृत्य संस्कृत्य[8] वराटिकास्ताः सङ्ख्यासमानं [9]प्रजपेन्मनूत्तमम् । 611
बालेन वा कन्यकया विभागस्त्रिधा निदद्याच्च तदुत्तराद्यम् ॥ 612

। वराटिकाभागात् सूर्याद्यष्टग्रहचिन्ताविधिः शुभाशुभग्रहचिन्ता च ।

[B]रविकुजगुरुसौम्यशुक्रमन्देन्द्व[10]हय इमे क्रमशोऽष्टभक्तशिष्टाः । 613
रविगुरुभृगुजेन्द[11]वो भवेयुश्शुभफलदास्त्वितरेऽन्यथा निरुक्ताः ॥ 614

। सूर्यफलम् ।

---

1. T2 पाठः T पयस्या
2. T२ पाठः T वाक्पति वि वित्सितार्कः
3. T सितार्कि इत्यस्मात् परं कुजवाक्प्तवित्सि इति पुनः लिखितम्
4. T अर्कवत् T2 अर्कवति
5. T °पमनं°
6. T °र्विन्द्वोन्त्रै° T1 °र्बिन्द्वोन्तै°
7. T1 संस्कृत्य इति एकवारं पठितम्
8. T पराकानिस्तान्
9. T2 पाठः T प्रजवेन्मनुत्तमम्
10. T °द्व° for °न्द्व°
11. T °दे° for °न्द्व°

A द्र.प्र.मा. ४.४०
B इत आरभ्य नवश्लोकाः, प्र. अ. प. ५-२१ आरभ्य ५-२९ द्रष्टव्याः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्को नृपप्रसादादभिमतधनकीर्तिविजयसकलसुखम् । 615
कुरुते [1]जनपदनगरग्रामसभासत्कृतिं परां लक्ष्मीम् ॥ 616

। कुजफलम् ।

ज्वरकलहपित्तवह्न्यसृगायुधनृपचोरभयशिरोरोगान् । 617
भैरवबालकुमारग्रहभयकु[2]ष्ठान् कुजः कुरुते ॥ 618

। बुधफलम् ।

शशि[3]तनयो विषम[4]रुजस्त्रिदोषकोपं गोऽश्वमृगादिभयम् । 619
पामाविचर्चिकार्दीस्त्वग्भवरोगान्बहुविधान् जनयेत् ॥ 620

। गुरुफलम् ।

जीवोऽभीष्टसुखार्थान् द्विजगुरुदेवप्रसादपुण्यकृतान् । 621
कुरुते सुताङ्गनादीनपि काञ्चन[5]पट्टवसनगजतुरगान् ॥ 622

। शुक्रफलम् ।

[A]शुक्रः कृषिफल[6]गृहगोमहिषीष्टपानयुवतिसुखम् । 623
शयनासनानुलेपनवस्त्राभरणादिकं फलं कुरुते ॥ 624

। शनिफलम् ।

[7]पित्तानिलभवशूलं दुर्जनरिपुचोरकलहमरणभयम् । 625
कश्मल[8]निस्तेजादिकदुर्ग्रहपीडां च रविसुतः कुरुते ॥ 626

। चन्द्रफलम्।

चन्द्रो [9]गृहसुखवासो जलभवसस्यान्नपानवनिताद्यम् । 627
स्वजनसुहृत्सम्प्राप्तिं मनःप्रसादं च बलवशात्कुरुते ॥ 628

1. T2 जनवद°
2. T °कुष्ठः
3. T शशितियो
4. T विषमजोंति°
5. T2 °वट्ट°
6. T °गृहगोमहिषीष्टपान° for °गृहगोमहिषीमृष्टान्नपान° T1 °गृहिपिमृष्टेपान°
7. T सक्तां° T1 पक्ता°
8. T °निस्तेजस्त्वेन्दुग्राश्चिडांश्च
9. T °ग्रहजिल

A द्र.प्र.अ.प. ५.२६-२९. °गोवृषमहिषीमृष्टान्न° ५.२६ विमतभयाक्षिपदाहतिविषमरुजामहिपतिः कुरुते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। राहुफलम् ।

नीचान्त्यजनविरोधं विषभवरोगांश्च [1]कुष्ठपामादीन् । 629

विषपीडाक्षिपदा[2]हतिविषमरुजामहिपतिः कुरुते ॥ 630

। त्रिधास्थापितवराटिकया कालस्थानावयवभेदेन फलं विभजति ।

भूते [3]काले वर्तमाने तथै[4]ष्ये वामस्थाने मध्यमे दक्षिणे च । 631

यद्यत्प्रोक्तं तत्फलं स्यान्नराणा

मास्ये मध्ये पादयोश्चैवमङ्गे ॥ 632

। त्रिधास्थितवराटिकायाः मध्यमराशिलब्धग्रहस्य सङ्ख्यायाश्च फलमाह ।

मध्य[A]स्थितस्य विहगस्य रिपु[5]ग्रहो वा

[6]योनेः स्वभक्षणकरो [7]यदि दक्षसंस्थः । 633

मृत्युप्रदो भवति मध्यफले शिवघ्ने

दानैः ह्रतेऽखिलह्रतिर्मरणाय वा स्यात् ॥ 634

[B8]शिष्टे चतुष्के स्वजनस्य नाशः षट्के तथा प्रष्टुरतीव रोगः । 635

द्वौ चेत्सुतानां मृतिदौ भवेतामोजे शुभं स्यादशुभं तु युग्मे ॥ 636

। अष्टदिगीशान्योनीश्चाह ।

[C]ध्वजधूमसिंहशुनका वृषखरगजवायसा दिशामीशाः । 637

---

1. T2 कुष्ठवः मर्दिन्
2. T पदादिजविषं रुजा
3. T1 काले इति ग्रन्थपातः
4. T तथेष्याम°
5. T °गृहो
6. T याने
7. T दयि
8. T शिष्टे चतुष्के स्वजनस्य गोरकर्कित्रिकोणेन्दुभवो यदि स्यात् । द्वौ चेत् सुतजायमृतिदौ भवेतामोजाश्शुभास्युर्मृगेन्द्रश्वाहयाखु द्विपशशाश्च योन्याख्याः । एवं मूलमातृकागता, श्लोकद्वयस्वेच्छा मिश्रणजन्या अशुद्धिः प्रश्नानुष्ठानपद्धतिगतात् सजातीय श्लोक द्वयात् दूरीकृता ।

A द्र.प्र.अ.प ५.३२

B द्र.प्र.अ.प ५.३३

C द्र.प्र.अ.प ५.३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गरुडबिडालमृगेन्द्रश्वाह्वाखुद्विपशशाश्च योन्याख्याः ॥ 638

। ध्वजादीनामष्टानां क्रमेण फलान्युक्त्वा भक्ष्यभक्षकयोनीराह ।

[A]इष्टार्थलाभकलहारिजयातिरोग-
[1]सर्वार्थदुःखसकलार्थसमस्तहानिम् । 639
कुर्वन्ति योनय इमाः क्रमशो ध्वजाद्या
भक्ष्या भव[2]न्त्यहिमुखा गरुडादिकानाम् ॥ 640

। त्रिधा विभक्तवराटिकाराशौ रुद्रादिकल्पनामाह ।

[B]वामस्थाने रुद्रो मध्ये विष्णुश्च दक्षिणे ब्रह्मा । 641
स्वोक्तफलदा भवेयुः काले देहे तु सर्वदा फलदाः ॥ 642

। निर्याणगुरुशन्योरानयनविधिमाह ।

[C]संस्थाप्य त्रि[3]रथाष्टभिश्च [4]विहृते शेषाणि संयोज्य त-
द्वामा द्वित्रिचतुर्गुणे यदि सिते पक्षे [5]चलाङ्गैर्युते । 643
कृष्णे दैवतसंयुतेऽब्धिवसुभिर्भक्ते फ[6]लर्क्षे गुरौ
शिष्टे द्वादशभिश्च गुणिते भक्ते शनौ स्यान्मृतिः ॥ 644
इत्युक्तं सङ्क्षेपात्फलमिह कथयेत्सदैव गुरुभक्तः । 645
ईशध्यानसमेतो यदि सर्वं सत्यमेव भवेत् ॥ 646

। त्रिस्थानस्थापितवराटिकासु ग्रहनिर्णयः ।

कर्माद्यस्तरणिः प्रियाङ्गि हिमगुः क्रूरोऽत्र भूनन्दनो
गोपे[7]न्द्रश्शशि[8]जो बलाङ्गि मघवन्मन्त्री गरीयो [9]भृगुः । 647

---

1. T सर्वार्थसि for सर्वार्थ
2. T न्त्यहि अमुगारुडादिकाशाम्
3. T त्ररदा°
4. T हृते for विहृते
5. T2 बलाङ्गैः
6. T1 पाठः T लर्क्ष इति अस्फुटम् ।
7. T2 गोवेन्द्र°
8. T1 °शशिभो
9. T1 भृगुपत्रो T भृगुः प्रदानि
10. T °यते for °य

A द्र.प्र.अ.प ५.३१
B द्र.प्र.अ.प ५.१४ ब्रह्मा वामे हरिर्मध्ये दक्षिणे च महेश्वरः इति विशेषः।
C द्र.प्र.अ.प ५.३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रादानी रविजः कुलेन्द्रफणभृद्रोगा[10]य केतुः क्रमात्
सुग्रीवाभिमतिस्त्रिभिश्च विभजेत्त्रिस्थानगैः स्युर्ग्रहाः ॥ 648

। सुग्रीवप्रश्नागतसूर्यफलम् ।

अर्कः करोति विजयं समरे विवादे
प्रोद्वाहसिद्धिमपि गर्भगतं कुमारम् । 649
साम्यं च [1]सर्वविभवर्द्धिषु नैव यात्रां
रोगेषु दीर्घतरतामपि चार्थसिद्धिम् ॥ 650

। सुग्रीवप्रश्नागतेन्दुफलम् ।

इन्दुर्मनोऽ[2]भिलषितार्थविवाह[3]वृष्टि-
सस्योन्नतिं च विजयं स्वपदे स्थितानाम् । 651
कुर्याद्व्र[4]दप्रशमनं जलसम्भवार्थान्
मृष्टान्न[5]पानशयनाम्बरगेहसौख्यम् ॥ 652

। सुग्रीवप्रश्नगतकुजफलम् ।

अङ्गारकस्सुतकळत्रसुहृद्विनाशं
चोराग्निशस्त्ररिपुभीतिमनेकरोगान् । 653
रोगे मृतिं च विदधाति सदैव युद्ध-
यात्राजयं [6]वरुषसस्यरिपुप्रणाशान् ॥ 654

। सुग्रीवप्रश्नागतबुधगुरुफलम् ।

चान्द्रिः करोति वनितासुतवृष्टिसस्य-
सस्योन्नतिं विजयमात्मसुखाभिवृद्धिम् । 655

---

1. T1 सर्वविद्धषुनेव T2 सर्वविभवर्द्दिषुनेव
2. T1 लक्षितार्था
3. T °सृष्टि
4. T °त°
5. T1 °पानश इत्यस्मात्परं° चोराग्नि इत्यस्मात्पूर्वं ग्रन्थपातः
6. T वर्षसस्य for वरुषसस्य रिपु इति छन्दोभङ्ग दूरीकरणाय कृतम् । T °सुरि° T1 सरि for रिपु
7. T1 °सुवृष्टि°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जीवस्तु पुत्रवनितार्थ[7]सुवृद्धिसस्य-
कीर्त्यर्थपुण्यगजरत्नतुरङ्गमादीन् ॥ 656

। सुग्रीवप्रश्नागतशुक्रशनिफलम् ।

शुक्रः करोति वनिताखिलसस्यवृष्टि-
कीर्त्यर्थभूषणकृषिप्रभवाखिलार्थान् । 657
मन्दस्समस्तविपद[1]स्सुखपुत्रवृष्टि-
सस्यार्थनाशपरिभूतिसुखासुनाशान् ॥ 658

। सुग्रीवप्रश्नागतराहुकेतुफलम् ।

राहुश्च नष्टधनलाभसुतार्थवृद्धि-
वृष्टिं च सर्वविभवात्मसुखं विदध्यात् । 659
केतुस्समस्तविविधारिभयं च रोगं
कुर्याच्च सस्यविहतिं मरणं नराणाम् ॥ 660
सुग्रीवप्रश्नमिदं बहुधान्यत्रापि कीर्तितम् । 661
श्रुत्वा सङ्क्षेपेण मयोक्तं दैवविदा सम्यगादेश्यम् ॥ 662

॥ अथ कारकादिफलं निरूप्यते ॥

६६३
पितृ[2]मातृस्वसाभ्रातृपुत्रभार्या[3]रयो रवेः

व्या - रवेः रविमारभ्येत्यर्थः । राहुरपि मन्दवदरिरेव ।

664
मात्रीयाः शुक्रजीवज्ञाः पित्र्यौ मन्दमहीसुतौ ॥

व्या - अयं पूर्वोक्तसुहृदां शुक्रादिदृष्टिवशेन पितृमातृसम्बन्धित्वम् अवगमयितुम् । अत्रापि महीसुतो ज्ञातिः । मन्दः पितृव्यः । बुधो मात्रीयः, यदि स्त्रीराश्यंशकगतो मातृष्वसा, प्रतीका वा भवति । गुरुर्मातुलः । शुक्रो मातृ[4]ष्वसा । पुंराशिदृष्टिवशेन सुहृदादयो विषम- सङ्ख्याकाः अन्यथा समसङ्ख्याकाः । भोजयितृकथक सहभोक्त्रादिविशेषपरिज्ञाने चास्य विनियोगः ।

। कारकग्रहवशात् भाववृद्धिहानिचिन्ता ।

---

1. T2 पाठः, T °दसुख°
2. T1 °र्मात्य
3. T °दयो for °रयो°
4. T मातृष्वर्षसा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पित्रादिकारकेऽर्कादौ मूढे नीचारिगेऽथवा । 665

केन्द्रत्रिकोणगे यद्वा पापदृष्टियुतेऽपि वा ॥ 666

मृतस्स भावोऽन्यथा तु भावसम्पदमादिशेत् । 667

व्या - सर्वत्र केन्द्रत्रिकोणगतत्व[1]मनुषञ्जनीयम्, अन्यथा यत्कारको ग्रहोऽतिबलस्तस्य सम्पदं वदेत् ।

। लग्नद्रष्टुर्भविशस्यैव भावस्वाम्यप्राप्तिकथनम् ।

यद्भावेशो नेक्षतेऽङ्गं स भावस्तस्य नो वदेत् ॥ 668

व्या - अत्र सम्मतिर्विवाहप्रश्नेऽभिहिता ।

। पितृमातृभावचिन्ता ।

यदि नीचारिगो लग्नमारूढं वा न पश्यति । 669

अर्कः स्त्रियः पिता नास्ति मातेन्दुश्चेत्तथाविधः ॥ इति । 670

। ग्रहाक्रान्तभाववशात् भावोत्पन्नशुभाशुभफलचिन्ता ।

[2]कर्मायार्थास्तबन्धु[3]स्थग्रहभावं शुभं वदेत् । 671

षष्ठाष्टमद्वादशस्थग्रहभावोऽरिवद्भवेत् ॥ 672

व्या - लग्नसप्तमे शुभम् ।

। बहिरन्तर्गतस्थितिनिर्णयः ।

दृश्यादृश्यगतैः खेटैः बहिरन्त[4]र्गतान्वदेत् । 673

व्या - लग्नादिषष्ठान्तस्थिता अन्तर्गतसूचकाः । सप्तमादिव्ययान्तस्था बहिर्गतसूचकाः । उदयेशस्थिति[5]वशेन प्रायेण तदवगतिः । चोरान्तर्गतत्वा[6]द्यवगमनगतिस्तु पापग्रहस्य दुष्ट[7]राशिस्थितिवशेन । काकगौळिक्षुतादीनां पूर्वार्धगतत्वे तत्फलस्यान्तर्गतविषयत्वमन्यथा बहिर्गतविषयत्वा[8]द्यूह्यमिति ।

। ग्रहाणामाधिपत्यम् ।

---

1. T1 मेनुषञ्ज°
2. T कर्मायातो
3. T1 सग्रह° for °स्थग्रह°
4. T °रया° for °र्गता°
5. T उशेन°
6. T °द्यवमन्तगति°
7. T °रव° for °राशि°
8. T °दू°
9. T नृपो
10. T °न्मरणे T2 न्मरणौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[9]नृपौ नेता कुमारोऽर्कान्म[10]न्त्रिणौ प्रेष्य इत्यपि ॥ 674

व्या - अस्य चोरा[1]दिपरिज्ञाने विनियोगः । रविर्नृपः । चन्द्रो महिषी । अत एव सिंहकर्क्योर्नैरन्तर्येण तयोरवस्थितिः । से[2]नापतित्वादेव स्वपुररक्षकस्य कुजस्य [3]गृहस्थाने वसतानन्दत्वम् । कुमारत्वादेव बुधस्य स्वसमीपे अवस्थापनम् । न[4]र्मसचिवत्वाच्छुक्रस्य, बुद्धिसचिवत्वात् गुरोः, प्रेष्यत्वाच्छ[5]नेः क्रमेण [6]दुस्थाने [7]बुद्धिस्थाने चोरादिचिन्तास्थाने वा पितृभ्या[8]मवस्थापनं दत्तम् । अत एव पुंसम्बन्धित्वात्सिंहादिषट्कस्य पुंरूपत्वं क्रूरत्वं दे[9]हात्मत्वं च । स्त्रीसम्बन्धित्वात् कर्क्यादिव्युत्क्रमषट्कस्य स्त्रीरूपत्वं सौम्यत्वं प्राणात्मकत्वं च । उदयारूढयोस्तदधिपयोश्च सिंहादिषट्कगतत्वे तस्यायुःप्रश्ने आयुर्नाशः पुत्रप्रश्ने पुंजन्म, अन्यथा विपरीतं, मिश्रबलवशेने[10]त्याद्यप्यनेनैव चिन्त्यमिति । कारकलक्षणं प्रागेव प्रपञ्चितम् ।

। कारकफलचिन्ता ।

रवेश्चतुष्पदाद्भीतिर्गदार्थकलहाः [11]क्रमात् । 675

आत्मादिकारकास्सर्वे बलिनस्तच्छुभप्रदाः ॥ 676

कारकाः पापयुक्ताश्चेदात्मादीनां बलक्षयः । 677

अनिष्टभावगोऽर्कादिः पित्राद्यैस्तु विरोधदः ॥ 678

मूढे नीचारिगेऽर्काद्ये प्रोक्तं वैरं नवं भवेत् । 679

व्या - पित्राद्यैरित्यादिपदेन मातृभ्रातृबन्धुसुतकलत्रभृत्यानां ग्रहणमिति ।

। शनेः सुखदुःखचिन्ता ।

मन्दे हीनबले नूनं तज्जन्मनि सुखं न हि । 680

[12]मन्दस्य पापयोगेन सुखलेशोऽपि नास्ति हि ॥ 681

आत्मादिकारकेऽर्कादौ तत्तद्भावेष्विदं फलम् । 682

। कालहोराजन्यफलचिन्ता ।

नाशसौख्यरुगारोग्यदीर्घायुर्भोगमारणे । 683

1. T °दपरि°
2. T °सेता°, T1 सेतावति
3. T ग्रह°
4. T °मि° T2 °यी° for °र्म°
5. T °नै:
6. T दुरस्था°
7. T1 बुद्धिस्थाने इति ग्रन्थपातः ।
8. T2 नवस्थापनं
9. T1 देवा° पाठः T अस्फुटम्
10. T1 °त्याद्यप्यने इति ग्रन्थपातः ।
11. T रवेः for क्रमात्
12. T मन्य for मन्दस्य T2 मस्य वावयोगेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सबले कालहोरेशे केन्द्रगे तत्फलं ददेत् ॥ 684

भूपस्त्रीशस्त्रपाणिः स्यादर्धविप्रो महाद्विजः । 685

[1]वेश्यास्त्रीभृत्यवैश्यादि होरेशफलमर्कतः ॥ 686

व्या - यथा कालहोरेशे रवौ बलिनि केन्द्रस्थे राजा आगच्छति । चन्द्रे स्त्री आगच्छति इत्यादि । शनौ भृत्यवैश्यो [2]नर आयातीति योज्यम् । मुहूर्तेऽपीदं चिन्त्यम् ।

॥ अथ ग्रह[3]भक्तिः प्रद[4]र्श्यते ॥

व्याळो[5]र्णकशैलेयसुवर्णशस्त्रविषदहनभेषजनृपाणाम् । 687

म्लेच्छासतीकारुकान्तारकाष्ठमन्त्रप्रभुः सूर्यः ॥ 688

रति[6]कुसुममणिरजतशङ्खलवणोदकेक्षुवस्त्राणाम् । 689

भूषणनारी[7]कृततैलरक्तनिद्राप्रभुश्चन्द्रः ॥ 690

रक्तोत्पलताम्र[8]सौवर्णाशनिपातमनश्शिलाद्यानाम् । 691

क्षितिनृपतिपित्तमूर्च्छाभिघातचोरप्र[9]भुर्भौमः ॥ 692

श्रुतिशिल्पचित्रनैपुणमन्त्रिगुरुतारहस्यगेयवचसाम् । 693

द्विजपक्षिद्रव्यवनस्पतिमान्द्यानां प्रभुश्चान्द्रिः ॥ 694

माङ्गल्यधर्मपौष्टिकमहत्त्वयज्ञादियोगराष्ट्राणाम् । 695

यानवनधान्यसुव[10]र्णरश्मिपुत्रप्रभुर्जीवः ॥ 696

वस्त्रमणिरजतभूषणविवाहवस्त्रेष्टगन्धयुवतीनाम् । 697

गोमय[11]निधिविद्यासुखित्वं दानवगुरुः प्रभुश्शुक्रः ॥ 698

त्रपुसीसलोहकानां[12]काकेभोष्ट्रमहिषकृष्णधान्यानाम् । 699

[13]भृतकौतुकनीचवर्धकजरादिदीक्षाप्रभुस्सौरः ॥ 700

---

1. T वैश्यस्त्री
2. T2 नक
3. T2 भुक्ति
4. T दृश्यं°
5. T2 °र्णकलेय°
6. T1 °कुसुमणिः
7. T1 ° कृतैल°
8. T ° सौवर्निनिरपत°
9. T °भू भौ°
10. T °र्न°
11. T1 पाठः T पत्रं खण्डितम् । अस्फुटा च पङ्क्तिः ।
12. T काळररिभोष्ट्र for काकेभोष्ट्र
13. T भृतौत्वक for भृतकौतु°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। अग्निशस्त्रभयचिन्ता ।

[A]सर्पाग्निशस्त्रवन्तं द्रेक्काणं वी[1]क्षते रविर्बलवान् । 701
भौमो वा मध्याह्ने विद्याद्भयमग्निशस्त्रसम्भूतम् ॥ 702

। अचिराद्बन्धनयोगः।

[B]क्रूरक्षेत्रेषु यमे त्रिकोणचतुरश्रसप्तमेषु गते । 703
क्रूरैर्निरीक्ष्यमाणे बन्धोऽस्तीत्यादिशेदचिरात् ॥ 704

। बन्धनयोगः।

[C]सौरस्य द्रेक्काणे वा भुजङ्गपरिवेष्टितेऽथवा लग्ने । 705
शशिसौराभ्यां दृष्टे बन्धनमिति वाच्यमादेशे ॥ 706

। बन्धनाद्यनिष्टयोगः।

होराद्वादशराशौ षष्ठे वा भवति बन्धनं रविजे । 707
भौमे रुधिरं सूर्ये युद्धं चन्द्रे तु विस्पर्शः ॥ 708

। आशुमरणयोगः।

पृष्ठोदयस्[2]स्याद्यदि धर्मसंस्थः [3]पापो भवेदात्मजसं[4]स्थितो वा । 709
ना[5]शस्तव क्षिप्रमिहास्ति नूनमितोऽ[6]पसर्पेति वदेत्तदाशु ॥ 710

। बन्धनाद्विमोचनकालज्ञानम् ।

[D]अचिरेण चरे मोक्षः स्थिरे विमोक्षस्तु दीर्घकालेन । 711
द्विशरीरगते सौरे मध्यमकालेन मोक्षः स्यात् ॥ 712

। सुतरोगयोगः।

सौ[7]रिस्त्रिकोणयुक्तस्सुतरोगं रोगिवीक्षां च । 713

॥ इति जम्बुनाथविरचिते प्रश्नसारसमुद्रे सव्याख्ये
द्वितीयस्तरङ्गः ॥

1. T1 वीतक्षये
2. T1 ° स्यादवि
3. T1 पापा
4. T1 °स्थिता
5. T1 नाशस्तप T नाकस्तप
6. T तेवसर्वे T2 तेवसर्पे
7. T °सौरे°

A द्र. कृ १३.१२ B द्र. कृ १३.१० C द्र. कृ १३.९ D द्र. कृ १३.११

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ तृतीयस्तरङ्गः ॥

। पूर्णायुर्निर्णयविधिः ।

उक्तै रोगि[1]श्वासतो दूतचेष्टा[2]पूर्वैरन्यैस्तत्र जातैर्निमित्तैः । 714

[3]पूर्णं ह्यायुः पुंस्त्रियोः कल्पनीयं [4]तत्प्रश्नुत्वे कल्पयेद्रूढलग्नात् ॥ 715

। दीर्घायुर्योगाः ।

[A]लग्नं मूर्धोदयं चेच्छुभ[5]पतिसहितं [6]वीक्षितं वाखिलानां

दीर्घायुष्यप्रदं स्यान्निधनमपि तथैव त्वन्यभावाच्च चिन्त्यम् । 716

रन्ध्रेशो लग्नपो वा यदि बलसहितश्चानयो[7]र्वाधिमैत्री

ह्यारूढश्चोर्ध्ववक्त्रस्सशुभजलसमृद्धस्सर्वमूर्धोदयाख्यः ॥ 717

। पूर्णायुःसुखजीवनयोगाः ।

[B]लग्नारूढनिशाकरा[8]स्त्रय इमेऽन्योन्यत्रिकोणाश्रिताः

प्रत्येकं यदि वा शुभग्रहयुता [9]दृष्टास्त्रिकोणास्तगैः । 718

केन्द्रस्थाः बलिनः शुभाशुभखगैः दृष्टाश्च दद्युस्तरा-

मायुष्यं च सुखं च रोगशमनं स्त्रीणां नराणामपि ॥ 719

। पूर्णसुखजीवनयोगाः ।

पूर्णेन्दुर्यदि लग्नगः [10]प्रशमयेद्रोगान् गुरुज्ञेक्षित-

श्चन्द्रस्तूपचये शुभाश्च बलिनः केन्द्रत्रिकोणाष्टमे । 720

लग्नेशो यदि केन्द्रगोऽ[11]स्य च सुहृत्केन्द्रस्थितो वा तदा

पापाः केन्द्रमृतिव्ययान्यभगतास्सौख्यं तदा निर्दिशेत् ॥ 721

---

1. T °श्वासादिक°
2. T1 पूर्वैरस्तैर्निमित्तैः
3. T प्राणायुः
4. T1 तप्रश्नुत्वे T अस्फुटम्
5. T2 °वति°
6. T वीक्षिति, T1 वीक्षिता
7. T व्याधि°
8. T °करादय इतीमे
9. T दृष्टा वास्ति कोणा°
10. T1 पाठः T2 प्रशमेये T प्रशमयाद्रोगात्
11. T2 पाठः T °न्य च

A द्र.प्र.मा ९.२४ (सारसङ्ग्रहः)

B द्र. प्र.अ.प. ७.७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। दुःस्थसुस्थग्रहनिर्णयः ।

[A1]षष्ठान्त्याष्टमदाम्बुलग्ननवमापत्येषु [2]ये दुर्बलाः
पापाष्षष्ठमृतिव्ययेष्वपि शुभा दुस्था भवन्ति [3]ग्रहाः । 722
लग्नेशाध्यरयोऽतिरोगमृतिदा [4]दुःस्थेषु सुस्थाश्च ते-
नुक्तस्थानगताश्शशाङ्कसहिताः स्वं स्वं फलं कुर्वते ॥ 723

। रोगप्रष्टुः स्थितिवशात् रोगिस्थितिचिन्ता ।

[B]यावन्तो मनुजा निमग्न[5]नयना रोगातुरे संस्थिता-
स्तावन्तोऽपि च तत्समा अपि नरा रोगोद्भवस्याश्रिते । 724
[C]दूतो यद्दिशि वर्तते दिगपि सा प्रागादितो यावति
[6]यामे तावति रोगभाक् [7]स हि नरो [8]यामो दिनाष्टांशकः ॥ 725

। व्याध्यारम्भकालं तच्छमकालं चाह ।

[D]लग्नर्क्षाद्यतिमे शशी हिमकरात्तावद्गते तारके
व्याधिः स्याद्गुळिकस्थितांशकदिने[9]शांशर्क्षगे वा विधौ । 726
व्याध्यारम्भ[10]दिनं तथा स्ववदनेनावेदयेत् पृच्छको
रोगी [11]वापि विलग्नभागदिनकृद्भागे विधौ स्याच्छमः ॥ 727

। द्रेक्काणान्मृतिचिन्ता ।

[E]द्रेक्काणाः फणिभूषणाः मृतिकराः कोलाहिगृध्राननाः
सक्रूरा यदि शीतगौ निधनगे रोगैर्विहीनस्य च । 728

---

1. T षष्ठ्या तूष्ट°
2. T येन्दुर्बलाः
3. T ग्रहात्
4. T दुष्टेषु
5. T °निधना
6. T याने
7. T1 पाठः T नहि
8. T यामा
9. T °दिमेशर्क्षाशिर्क्ष°
10. T दिशं तदान्ववदनेन चेदयेत्
11. T वाधि लग्नभागि

A द्र.प्र.मा १२.५
B द्र.प्र.मा १३.६
C द्र.प्र.मा १३.५
D द्र.प्र.प्र. ९.७
E द्र.प्र.अ.प्र. १३.५७.३१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। मरणयोगाः ।

[A]रन्ध्रे शीतकरो भवेन्मृतिकरः पृष्ठो[1]दयो लग्नगः
पापाः केन्द्रमृति[2]स्थिताश्च मृतिदा [3]रोगातुराणां नृणाम् ॥ 729

[4]अन्त्योपान्त्यौ यदि हि नवमां[5]शौ तदा पापखेटै-
[6]र्युक्तौ दृष्टावपि मरणदौ [7]प्रष्टृकष्टाद्विशेषात् । 730

जन्मर्क्षाणां [8]युतिरपि तयोः कष्टदारूढराशेः
रन्ध्रत्वं वा मृतिमपि [9]तयोर्जन्मकालाष्टमत्वम् ॥ 731

। मोहमृत्युयोगाः ।

लग्नारूढनवांशयोरपि भवे[10]न्मान्दिस्थराश्यात्मता
मोहो मृत्युरिति क्रमेण हि भवेदंशात्मता [11]चेन्मृतिः । 732

मान्दिस्थांशकराशिरेव हि भवेद्रूढोऽपि वा लग्नभं
[12]आधिव्याधिहतं नवांशदिनकृद्भागा[13]श्च ते कष्टदाः ॥ 733

सूर्याधिष्ठितभात्त्रिकोणचरभादारभ्य नाड्यह्निणा
जीवो राशिषु सञ्चरेद्रवि[14]मुखाश्चासाश्च देहो विदुः । 734

[15]पञ्चांशद्विघटीभिरह्नि निशि ता द्विग्वारमायुष्यदो
योगाः प्राणशरीरयोर्मृतिकरो मृत्युं [16]तथोग्रैर्युतः ॥ 735

। पापाक्रान्तलग्नारूढनवांशादेर्मरणयोगः ।

लग्नारूढनवांशयोस्सह यदा मान्द्यारराहूदय-
श्चारूढाष्टमतापि वा मृतिकरं सूत्रं तयोर्वागतम् । 736

1. T °दया
2. T1 स्थिताश्च मृति'' इति ग्रन्थपातः
3. T रोग्तु for रोगातु
4. T अन्यो
5. T °मांशा
6. T र्युक्ता
7. T1 प्रष्टुनष्टद्वितशे°
8. T युतिरतिवि for युतिरपि T2 युतिरतिपि
9. T तज्ञन्म°
10. T °मान्दिस्थि°
11. T °पिन्मृतिः T1 °पेन्मृतिः
12. T व्याधिस्यादि हृतं
13. T वाश्व तैः for गाश्च ते
14. T मधा° °विधुः
15. T1 पञ्चाशत्विषुघटी
16. T तथाग्रै°

A द्र.प्र.अ.प. ७.३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। पापाक्रान्तगण्डान्तांशकान्मरणयोगः ।

[1]प्राज्ञस्तत्र मृतिं वदेद्यदि [2]भवेद्गण्डान्तसञ्ज्ञांशकः
[3]पापैर्यद्यवलोकितो यदि युतो मृत्युं तदा निर्दिशेत् ॥ 737

। सूत्रनिरूपणम् ।

[A]चरभेषु चरादयोंऽशकाः स्थिरभे द्वन्द्वचरस्थिरांशकाः । 738
उभये स्थिरपूर्वकास्सदा क्रमशो जीवनरोगमृत्युदाः ॥ 739

। चन्द्रान्मृतियोगस्तदपवादश्च ।

[B]चतुरश्रे यदि चन्द्रो मृतिदः [4]स्यात्पापमध्यगः क्षीणः । 740
सौम्यैर्बलिभिः [5]दृष्टो [6]न च मृतिदो नैव भूरिरोगकरः ॥ 741

। चन्द्रान्मरणचिन्ता ।

[C]लग्नास्तव्ययरन्ध्रत्रिको[7]णभे पापसंयुतश्चन्द्रः । 742
बलिभिश्शुभैर्न दृष्टो [8]मृतिदः पापान्तगः क्षीणः ॥ 743

। पापग्रहान्मरणचिन्ता ।

[D]व्ययरिपुगैर्वा पापैर्धनमृतिगैर्वाथ पापमध्यगते । 744
लग्ने वा द्यूने वा मरणं तत्रापि [9]निर्दिशेत्प्राज्ञः ॥ 745

। आयात्पञ्चभूतचिन्ता ।

[E]ध्वजसिंहयोर्मही स्याद्वृषगजयोर्वारि धूमदिशि वह्निः । 746
खरदिशि वायुः [10]परयोः श्वकाकयो[11]र्व्योम निर्देश्यम् ॥ 747

---

1. T1 प्राज्ञा°
2. T भवे गण्डा°
3. T2 प्रास्तै°
4. T स्यापाप°
5. T °दृष्टा
6. T1 च न
7. T °कोणभो
8. T ° बलिभिः पापदथ
9. T विनिर्दिश्रे प्राज्ञः
10. T परयोश्चरोरयो
11. T1 °र्घौम

A द्र.प्र.अ.प. ४.२
B द्र.प्र.अ.प. ७.२८
C द्र.प्र.अ.प. ७.२९
D द्र.प्र.अ.प. ७.२४
E द्र.प्र.अ.प. ७.५-६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्रष्टुः प्रश्नाद्यवर्णाच्चिन्ता ।

यः पञ्चस्वरवर्णेष्वाद्यः प्रष्टुर्मुखोद्गतो [1]वर्णः । 748

यत्तस्य भवति भूतं प्रष्टुः स्थिति[2]दिग्वशेन तद्योज्यम् ।। 749

भूमौ मृत्युप्रदं [3]शिखिमरुदपि सलिले वह्निरग्नौ च वायु-

र्वायौ वा खे [4]खमम्भोमरुदपि यदि भूः पञ्चमाब्दावसाने । 750

वायौ वायुर्वा नृपापो शरदि च सलिले मोहं खं तदाहु-

र्वाच्यं मृत्युप्रदाया दिवसहतिदशा चेत्स्त्रीति या वा नराणाम् ।। 751

। गुळिकस्फुटानयनम् ।

२६ - २२ - १४ - १० - ६ - २

[A]चन्द्र-रुद्र-[5]जय-वैद्य-नयो-न्तेना-खुनां विनिहताद्दिनमानात् । 752

३०

नाग-लब्धघटिकादि[6]साधितं लग्नमेव गुळिकस्फुटमाहुः ।। 753

[B]अर्कारजीवबुधशुक्रशनैश्चरेन्दु-

वारोदयेष्वनुदिनं क्रमशो[7]ऽथ दिग्भ्यः । 754

उद्गत्य गच्छति हि मृत्युरिह क्रमेण

कालोऽन्यथाह्नि निशि राशिषु च त्रिवारम् ।। 755

[C8]प्राप्ता नाड्यष्षट्कृतिघ्ना विभाज्य

मानेनाह्नः प्राप्त[9]राश्यादिलब्धम् । 756

[10]स्वर्णं कुर्यात्त[11]त्स्फुटेऽ[12]र्कोदयोने

स्पष्टौ स्यातां मृत्युकालौ तदानीम् ।। 757

रव्यादयो [13]दिगधिपाः स्वदिशः क्रमेण

---

1. T वर्नः
2. T दिग्गवेन
3. T सुखि°
4. T खेखमम्भरूदपि
5. T रजय for जय
6. T सादितं
7. T क्रमशोधि
8. T प्राप्या
9. T °राज्यादि°
10. स्वर्नं
11. T1 पाठः T तस्फुटे
12. T अर्कोदये for अर्कोदयोने
13. T धिगधिवास्य

A द्र.प्र.अ.प. ३.९-१०

B द्र.प्र.मा १६.१०६ तथा द्र.प्र.अ.प ३.१७

C द्र.प्र.अ.प. ३.१६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गच्छन्ति राशिषु शुभास्त्वपरे च वामम् । 758

रात्रौ दिने त्रिपरिवर्तनकालभुक्ति-

स्तत्तत्प्रमाण[1]रसवह्निविभाग एव ॥ 759

रव्या[2]दयो दिगधिपाः स्वदिशः प्रदेशा-

दारभ्य राशिषु दिने निशि च त्रिवारम् । 760

चन्द्रज्ञवाक्पतिसिताः क्रमशोऽन्यथान्ये

रव्याररahुरविजा द्वि[3]घटी तदर्धात् ॥ 761

जीवेद्रोगी जीवसूत्रे कर्मारूढौ यदैन्दवौ । 762

भानौ तौ यदि चेन्मृत्युः कथञ्चिद् व्यत्ययेऽवनम् ॥ 763

व्या - सिंहादिक्रमषट्कं भानुराशयः । [4]कर्क्यादिव्युत्क्रमषट्कं चान्द्रराशयः । आरूढस्तद्दशमराशिश्च यदा चान्द्रस्तदा रोगी जीवेज्जीवसूत्रत्वादस्य । तौ कर्मारूढौ यदि भानुराशिस्तदास्य रोगसूत्रत्वा[5]द्रोगादस्य मृतिः । व्यत्यये [6]रविराशौ रूढे, चान्द्रे दशमे सति, रोगसूत्रत्वेऽपि कथञ्चिदवनं - [7]जीवनं भवेत् । चान्द्रे रूढे दशमे सौरे च सति, लग्ने चन्द्रे वसति, षष्ठाष्टमव्ययेष्वन्यतमे [8]पापस्थितिश्चेद्रोगिमृत्युः । तत्र शुभदृष्टौ रोगी जीवति ।

। चन्द्रान्मरणज्ञानम् ।

764

क्षीणे सपापे तच्चन्द्रे [9]षष्ठे रन्ध्रेऽपि वा मृतिः ।

व्या - कृष्णपक्षे चन्द्रे [10]पापसहिते षष्ठेऽष्टमे वा सति मरणं दृढम् । तच्चन्द्रे चन्द्रराशिगत इत्यर्थः ।

। अर्कादेर्मरणज्ञानम् ।

765

नीचे नीचांशकेऽर्कादौ लग्नस्थे स्वस्ववासरे ॥

766

आरूढो वा यदि प्रश्नस्तदा मृत्युरदूरतः ।

---

1. T1 पाठः T °रनवह्नि
2. T °दयादिगदिवा
3. T °धटीष तदर्धात् T1 °घटीश तदर्धात्
4. T1 पाठः T कर्क्यादीन्यु°
5. T °द्रोगस्य मृतिः
6. T रपि
7. T1 जीवनम् इति ग्रन्थपातः
8. T वाव°
9. T1 षष्ठे रन्ध्रे इति ग्रन्थपातः
10. T1 पाठः। T पापे सहिते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अस्योदाहरणम् - तुलार्के रविवारे तु तुलायां प्राभृतस्थापनं [1]चेददूरतो मृतिः । तुलायाः प्रश्नलग्नत्वेऽपि तुलांशस्थे रवौ, रविवारे प्रश्नेऽपि मृतिः । यथा वा वृश्चिकेन्दौ लग्नस्थे सोमवारे वृश्चिकांशस्थे चन्द्रे वा यदि प्रश्नस्तदापि मृतिः । एवमितरेषामप्युदाहरणीयम् । गुरोर्नायं दोष इत्युपदेशः ।

। एवम् [2]उच्चे उच्चांशे वा लग्नारूढयोरन्यतरत्र स्थितेष्वेषु न मृत्युरित्याह।

विपरीते न मृत्युस्स्याद्दीर्घजीवी सरुग्भवेत् ॥ 767

व्या - सरुक् रुग्णोऽपि दीर्घजीवी इत्यर्थः ।

। मरणयोगाः ।

केन्द्रे शुभग्रहैर्मुक्ते रन्ध्रे पापे मृतिर्ध्रुवा । 768

पापाः केन्द्रत्रिकोणस्थाः [3]शुभा उपचये मृतिः ॥ 769

षष्ठेऽष्टमे वा पापश्चेत् पाप[4]दृष्ट्या विधोर्मृतिः । 770

। चिरकालान्मरणयोगः ।

[5]केन्द्रे शुभग्रहयुते चिरकाला[6]न्मृतिर्भवेत् ॥ 771

। मासाभ्यन्तरे मरणयोगः ।

पापेऽस्ते वा मृत्युसूत्रे मासाभ्यन्तरतो मृतिः । 772

। मरणयोगाः ।

[7]सपापे लग्नपे [A8]लग्ने क्षीणेन्दौ च मृतिर्ध्रुवा ॥ 773

क्षीणेन्दौ धनगे वापि रन्ध्रे पापेऽपि चेन्मृतिः । 774

व्या - धनगे - द्वितीयस्थे ।

[B]सपापे [9]चतुरश्रेऽङ्गात् पापे दुरुधरे मृतिः ॥ 775

---

1. T चेद्दूरतो
2. T °मुच्चैः° T1 एवमुच्चैः इति ग्रन्थपातः
3. T1 पाठः T शभा
4. T दृष्ट्याद्विधो
5. T केन्द्र°
6. मातृकात्रयेऽपि ग्रन्थपातः
7. T1 सापपे लग्नस्ते for सपापे लग्नपे लग्ने
8. T लग्नस्थे for लग्ने
9. T चतुरश्रङ्गात्पापेधु लग्नरन्ध्रेऽपि
   T1 चतुरश्रं गात्वावेधु लग्नं ध्रेपि ।

A. T मातृकायां लग्नस्थे इति स्थाने लग्ने इति कृते, छन्दसः अर्थस्य च सिद्धिर्भवति ।

B. व्याख्यानानुसारेण शोधितः पूरितश्च। T मातृकायां द्वितीयपादगतस्य ''धु'' इत्यक्षरस्योपरि ''रुध'' इति पूरयित्वा श्लोकसमाप्त्यन्ते 'रे मृतिः' इति पदद्वयं संयोजितं चेत् श्लोकद्वितीयपादः पूर्णताम् एतीति लिखितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लग्नरन्ध्रेऽपि वा चन्द्रे समान्दौ च [1]ततो मृतिः । 776

व्या - लग्नाच्चतुरश्रे सपापे मृतिः । चन्द्रादुभयव्यापित्वेऽपि मृतिरित्यर्थः ।

। रुग्णश्चेन्मरणयोगानाह ।

होरा [2]षष्ठान्त्यायुर्गता योगा रुग्णमृतिप्रदाः ॥ 777

व्या - योगा अरिष्टयोगा इत्यर्थः । बलवच्छुभे दृष्टे रोगशान्तिरिति सर्वापवादः । छायाजलयन्त्राद्यैर्लग्नं ग्रहांश्च स्पष्टमानीय छत्त्रारूढगुळिकाहिकाला[3]दिनापि फलं वदेत् । लग्नलिङ्गश्रवणेक्षादिकं दूतमारुतयोन्यस्त[4]दिगवस्थानं वक्ष्य[5]माणं च प्राधान्येन चिन्त्यमिति ।

॥ अथ योगवशादायुः ॥

[6]केन्द्ररन्ध्रगतैः पापैर्लग्ने पृष्ठोदयेऽथवा । 778

लग्ने पृष्ठोदये रन्ध्रे सेन्दौ च सरुजो मृतिः ॥ 779

केन्द्ररन्ध्रगतैः पापैर्निधने विधुसंयुते । 780

व्या - एते व्याधितस्य प्रधानाः किल ।

। सर्पगृध्रास्यकोलास्यद्रेक्काणज्ञानम् ।

[A7]कौर्प्याद्याः कर्किमीनान्त्या ससर्पा कुम्भसिंहयोः । 781

आद्या वणिङ्मध्यमा स्याद्गृध्रास्या मृगकर्किणोः ॥ 782

आदिमौ सूकरमुखौ द्रेक्काण[8]स्थितिरीदृशी । 783

व्या - अत्र वृश्चिकान्तः सूकरमुख इति केचित् ।

। सर्पादिद्रेक्काणफलम् ।

सर्प[9]गृध्रास्यकोलास्यद्रेक्काणाः क्रूरसंयुताः । 784

लग्नगा [10]रन्ध्रगे चन्द्रे सद्यो मरणसूचकाः ॥ 785

1. T तथा T1 मातृकायां च ततो मृतिः इत्यनन्तरं रे मृतिः इति दृश्यते ।
2. T षष्ठात्यायगता
3. T °दिनानि T1 °दिनादि
4. T °दिखवस्थानं T1 °व्यस्तदिग्ववसानं
5. T वक्ष्यमाणममपधान्येन
6. T क्लिप्ते for केन्द्र
7. T कौर्पादौ कर्किनान्त्या ससर्पा कुंभसिंहयोः । आद्या वणिं मध्यमशच ग्रन्द्या स्यान्मृगकर्किणोः ।
8. T1 पाठः T °स्थिति दृशी
9. T °गृध्र° for °गृध्रास्य°
10. T1 °गे चन्द्रे इति ग्रन्थपातः ।

A. द्र.प्रश्नायनम् ३.१२-१३. सर्पावृतो वृश्चिकाद्यः कर्किमीनान्तिमावपि । गृध्रास्यस्तौलिमध्यश्च कुम्भसिंहादिमौ तथा । ३.१२ ॥ कोलास्यो वृश्चिकान्त्यश्च मृगकर्क्यादिमावपि । ३.१३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अयं साधारणविषयप्रश्नः प्रष्टुर्वा कदाचिद्भवति । अन्यकार्यार्थमन्य[1]त्पृच्छतः प्रष्टुरपि मरणं कुर्युरित्यर्थः ।

। चन्द्रान्मृतिज्ञानम् ।

लग्नाष्टमे [2]सत्यारूढे क्षीणे लग्नात्त्रिकोणगे । 786

चन्द्रे मृतिं विजानीयात् पृच्छतामविलम्बितम् ॥ 787

। पापाच्चन्द्राच्च मृतिज्ञानम् ।

रूढे लग्नाष्टमे [3]पापास्ससगा मरणप्रदाः । 788

उदयादथवा रूढाच्चन्द्रेऽष्टारिगते मृतिः ॥ 789

व्या - एते योगा व्याधितविषया एव । अष्टमषष्ठगते चन्द्रे पापदृष्टे सति मृतिरित्यर्थः ।

। ससमदिनमरणयोगौ ।

[4]लग्नाष्टमे सत्यारूढे सरवौ [5]सोत्थगे गुरौ । 790

ससमे दिवसे मृत्युः ब्रूयाल्लग्नात्तथैव च ॥ 791

उदयादथवारुढात्तृतीये सूर्यवाक्पती । 792

तिष्ठतः पश्यतो वापि मरणं ससमे दिने ॥ 793

। द्वितीयदिने मरणयोगः ।

उदयारूढयोर्गेहे रन्ध्रे वा मन्दभूमिजौ । 794

यदि स्थितौ तदा ब्रूयाद् द्वितीये दिवसे मृतिम् ॥ 795

। चन्द्रकृतो दशमदिनमरणयोगः सद्योमरणयोगश्च ।

लग्नादस्ते दुर्बलः सन् दशमेऽह्नि मृतिप्रदः । 796

[A]षष्ठेऽष्टमे वा चन्द्रस्सद्यो मरणाय पापसंदृष्टः ॥ 797

। चतुर्थवत्सरेऽष्टमवत्सरे च मरणयोगः ।

अष्टाभिः शुभदृष्टो वर्षैर्मिश्रैस्तदर्धेन । 798

1. T पृच्छतु ।
2. T सत्यारुढेऽथ
3. T पापापास्स° T1 पापा वा स°
4. T लग्नष्टात्स सत्या°
5. T सार्थगे T1 सरवे सोर्थगे

A. द्र. सारावली १०.२१-२२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। मासकाले जीवनयोगः ।

[1]शशिवत्सौम्याः पापैर्व[2]क्रिभिरवलोकिता न शुभदृष्टाः । 799

मासेन मरणदाः स्युः पापजितो लग्नपश्चास्ते ॥ 800

व्या - 'सुतमदेति' श्लोकोऽप्यत्र वेद्यः । लग्नाष्टम इत्याद्याः कालसंवादार्थं ग्राह्याः किल । प्रागन्यकार्यार्थमिति [3]मौहूर्तिकविचारकर्तुरपि स्यादित्युक्तं भवति । [4]प्रष्टुः स्पृष्टाङ्गराशेर्लग्नं चेत् तस्य स्यात् ।

। व्याधिशान्तिचिन्ता ।

स्थित्या दृशा वा नो शान्तिः क्रूराणां रिपुरन्ध्रयोः । 801

शुभानां [5]स्थितिदृष्टिभ्यां व्याधिशान्तिस्तयोर्भवेत् ॥ 802

व्या - दृशा वा [6]सम्पूर्णदृष्ट्या वेत्यर्थः । तयोः - रिपुरन्ध्रयोः ।

। पापग्रहकृतमरणयोगः ।

[7]रिपुव्ययगतैः पापैर्यदि वा धनमृत्युगैः । 803

लग्ने [8]वा पापमध्यस्थे द्यूने वा मृत्युमाप्नुयात् ॥ 804

व्या - एतदंशकोऽर्कक्षणिकग्रहैरपि चिन्त्यम् । अन्यत्र [9]तैरंशकैर्गणितसिद्धैश्च एवं वक्ष्यमाण[10]श्लोकैश्च विचिन्त्यम् ।

। शीघ्रमरणयोगः ।

चतुर्थे वाष्टमे वापि पापमध्यगतेऽथवा । 805

पापान्तरस्थे क्षीणेन्दावपि मृत्युरदूरतः ॥ 806

। त्रिरात्रजीवनयोगः ।

रोगोदयर्क्षं नरजन्मलग्ने ज्ञात्वात्र चिन्त्यं यदनिष्टमिष्टम् । 807

[11]मीनर्क्षजन्मेन्दु[12]रपि तृतीये व्याध्युद्भवे जीवति स त्रिरात्रम् ॥ 808

---

1. T शिशिवत्
2. T2 पाठः T र्वक्रहि°
3. T मुहूर्तिक°
4. T प्रष्टोस्पृष्ट°
5. T1 स्थिभ्यां for स्थितिदृष्टिभ्यां
6. T सम्पूर्न °
7. T रिपुव्ययवतैः
8. T वा पापमधस्थे T1 शा पापमधस्ते
9. T तैरंशके गणित°
10. T °श्लोके च
11. T मीनर्क्षे जन्येन्दु
12. T रवि°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। सप्तदिनायुर्योगः ।

[1]तृतीयतारे रविणैकरात्रं चन्द्रेणयुक्ते दशमस्थिते वा । 809

जामित्रगौ [2]भौमरवौ शशाङ्कात्द्रोगोदये सप्तदिनं [3]स जीवेत् ॥ 810

। विंशतिदिनायुर्योगः ।

रवौ स्थिते चन्द्रमसस्त्रिकोणे व्याधिं गतो विंशतिवासरान्तः । 811

होराष्टमस्थे कुजमन्ददृष्टे सूर्ये सरोगस्तु विपद्यते च ॥ 812

व्या - तृतीयतारे रविणेति । जन्मनक्षत्रात्तृतीयनक्षत्रे रविणा युक्त इत्युक्तं भवति । रुग्णस्य जन्मनक्षत्रादारभ्य रोगोदयर्क्षपर्यन्तं गणिते या सङ्ख्या तां सङ्ख्यां त्रिगुणीकृत्य वेद[4]भक्ते शिष्टमेकं चेन्मृतिः । द्विशेषे त्रिशेषे च कृच्छ्रजीवनम् । चतुश्शेषे अचिरान्नीरोगत्वम् । एतद्द्वादशवर्षादध[5]स्तनबालस्य नियतमन्येषां प्रायिकमिति च ।

। मरणसूचकनिमित्तानि ।

॥ व्याधिप्रश्ने प्रधानलक्षणानि कानिचिल्लिख्यन्ते ॥

अशक्तचिन्तावचने नग्ने [6]छिन्दति भिन्दति । 813

[A]जिह्वाने पावके पिण्डान् पितृभ्यो निर्वपत्यपि ॥ 814

सुप्ते मुक्तकचेऽभ्यक्ते तुद्यत्यप्रयतेऽथवा । 815

देव आगते दूतादिष्टान्तासम्मतिसूचकाः ॥ 816

व्या - दिष्टान्ते [7]आमरणपर्यन्तः । [8]शुद्धास्त्रीसङ्गतिरशुद्धिरिति केचित् । एतल्लक्षणं प्रधानत्वेन ग्राह्यम् ।

[B]स्वाङ्गेष्वन्यत्र वा द्रव्ये गाढं सन्ताडनं क्षणात् । 817

मृत्युदं [9]लयलिङ्गानां [10]चिन्तेक्षाश्रवणा[11]दिकम् ॥ 818

---

1. T त्रितीय°
2. T भौमः वरौ शशाङ्कौ द्रोगोदये
   T1 एका शशाकन्द्रोगोदये
3. न for स
4. T वेदभक्तिशिष्ट°
5. T अधस्तय°
6. T1 पाठः T छिन्दन्ति भिन्दन्ति
7. T मामरण प्रयन्तो
8. T शुद्धः स्त्री°
9. T लग्न द्र.व्या
10. T1 चिन्ते for चिन्तेक्षा
11. T °दिवत्

A. द्र.प्र.मा. २.१२१
B. द्र.प्र.मा २.१२०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - लयलिङ्गाः- नाशसूचकाः ।

। प्रश्नायोग्यस्थानानि ।

महावने शुष्कतरोः समीपे श्मशानदेशे [1]शिखिसन्निधौ च । 819

निम्नोन्नते शून्य[2]गृहे जलान्ते दृगाद्यनिष्टे न शुभो[3]विचारः ॥ 820

व्या - यद्गृहं नित्यं जनवर्जितं तच्छून्यगृहम् । जलान्तो जलसमीपः ।

। प्रश्नकालेऽनिष्टनिमित्तानि ।

प्रदीप[4]पूर्णकुम्भादेर्बहिर्वा दूरतोऽपि वा । 821

नयनं शुष्ककाष्ठाद्यैश्चक्रलेखश्च निन्दितः ॥ 822

व्या - अन्तस्थस्य बहिर्नयनमनिष्टम् । बहिष्ठस्य दूरतो नयनं चेत्यर्थः ।

। रोगिप्रश्ने निमित्तैः पुंस्त्रीरोगिणोः चिरकालजीवनज्ञानम् ।

[A]देवे दक्षिण[5]भागगेऽथ [6]पुरुषो रोगातुरो दक्षिणे

स्थित्वा पृच्छति पृच्छकोऽथ पुरुषो [7]जीवत्यरोगश्चिरम् । 823

वामायां तु रुजाकुळीकृततनौ वामाश्रिते [8]चेश्वरे

वामा [9]पृच्छति चेत् [10]स्थिता गतगदा वामा चिरं जीवति ॥ 824

व्या - पुरुषस्य पुरुषः पृच्छकः शस्तः । [11]वामायास्तु वामा शस्तेत्युक्तं भवति । जातिश्च स्वजातिरेव शस्यते ।

तथा च बाहडः -

[12]पाषण्डाश्रम[13]वर्णानां स्व[14]वर्णाः कर्मसिद्धये 825

त एव विपरीतास्स्यु[15]र्वर्णाः कर्मविपत्तये ॥ इति ॥ 826

---

1. T1 खि° for शिखि°
2. T ग्रहे
3. T शुभोऽपि चारः
4. T °पूर्त°
5. T1 पाठः T °भागेद्र for भागगेऽथ
6. T पुरुषे रोगातुरे
7. T1 पाठः T त्यगश्चिरम्
8. T1 पाठः T चेग्वरे
9. T वृश्चति
10. T स्मिता T1 स्तिता
11. T1 पाठः T नामायास्तु
12. T1 पाषण्डाश्चमवर्ना कर्मसिद्धये
13. T °वर्ना
14. T °वर्ना
15. T ° वर्ना

A. द्र.प्र.मा २.४२ तथा द्र.प्र.अ.प १.२५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - तत्प्रधानमत्रापि दिक्स्पर्शसंवादश्चिन्त्यः । तत्कालावस्था च [1]प्रधानदिक्स्पर्शसंवादो नाम ।

। पृच्छकस्थितदिक्स्पर्शादिना पुंस्त्रीरोगिण आयुर्निर्णयः ।

पुंस्यातुरे दिक्स्थितिस्तु दक्षस्पर्शश्च योषिति । 827

वाम[2]स्पर्शो विदिक्स्थाने दद्यादायुः समासतः ॥ इति ॥ 828

व्या - विदिक्स्थाने स्थितिरिति योज्यम् ।

। रोगप्रश्नकालीननिमित्तात् कृच्छ्रसाध्यचिन्ता ।

देवे [A]गते पृच्छति वामभागे [3]स्थितो नरो दक्षिणतो यदि स्यात् । 829

व्यत्यासतोऽस्मा[4]दपि कृच्छ्रसाध्यं वदन्ति सन्तः खलु रोगजातम् ॥ 830

व्या - अत्रैतच्च [5]चिन्त्यम् । विचारकाले यदा [6]दूतेशयोः स्थितिः शुभा भवति । [7]विचारान्तरे तयोरशुभा स्थितिश्चेदूर्ध्वकाले अशुभं भवति । एवमादि सर्वत्र चिन्त्यम् ।

। रोगप्रश्नकाले प्राणिनां गमनागमननिमित्तात् रोगिशुभाशुभम् ।

[B]अन्तर्गति पृच्छति पृच्छक[8]श्चेद्देवे नरो जीवति वीतरोगः । 831

तेनैव रोगेण बहिर्गत[9]श्चेत्प[10]रेतराजस्य पुरीं प्रयाति ॥ 832

व्या - अत्र प्राणवाचकेन देवशब्देनाशेषप्राणिनोऽप्युपलक्ष्यन्ते । अन्तश्शब्देन देहस्थानि भूगृहतत्प्रकारतरुकोटरमूषिकापिपीलिकादीनां सान्तरप्रदेशा उपलक्षिताः । अत्र प्रश्नोत्तरकाले यस्य कस्यापि [11]जन्तोर्गृहादेर्बहिर्गमनमनिष्टमन्तर्गमनमिष्टञ्चेति ज्ञेयमिति उपदेशः । वाच्यार्थस्तु दैवज्ञस्य श्वासप्रवेशसमये दूतेन रोगविषयः प्रश्नो यदि क्रियते तदा रोगशान्तिः । श्वासनिर्गमनकाले चेत्तेनैव रोगेण मरणमिति । प्रश्नः प्रतिश्रुतस्य वचनं [12]प्राभृतस्थापनं वा [13]यत्प्रथमं भवति [14]तत्समये तच्चिन्त्यम् । प्राभृतस्थापनकाल इत्येके । अनयोरप्येकः पक्षो दैवज्ञेन प्रधानबुध्या नित्यत्वेन ग्राह्यः ।

1. T °प्रधाना
2. T स्पर्शोऽपि दिक्
3. T स्थित्वा
4. T °दवि
5. T चिन्त्यम°
6. T2 पाठः T दूतेशियो:
7. T2 पाठः T विचारान्तयो for विचारान्तरे तयो:
   T1 विचारन्तरयौ
8. T ° द्दैवेनरे
9. T ° र्गतश्च
10. T1 रेत° for ° परेत°
11. T पिपिश्चादिनामा
12. T ° र्ग्रहा°
13. T प्राणभृत°
14. T यत्प्राधिमम
15. T1 पाठः T ° त्सनुये

A. द्र.प्र.मा २.४३ B. द्र.प्र.मा २.४४ तृतीयपादे ''रोगेण'' इत्यस्य स्थाने मार्गेण इति विशेषः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्रश्नकाले अन्यत्रापि शुभाशुभनिमित्तानि ।

गोधाडुण्डुभ[A1]सरटाद्यनिष्टदृष्टिश्शिवाद्यनिष्टरुतम् । 833
वामे रुतन्तु गोळ्याः क्षुतं च वामेतरे विनाशाय ॥ 834
अग्रे दक्षिणभागे वायसशब्देन चाशु निधनं स्यात् । 835

व्या - एतानि लक्षणानि प्राधान्येन चिन्त्यानि ।

त्र्यादे[2]स्संवादतः स्पष्टमा[3]देश्ये [4]मृतिजीविते ।
द्विसंवादे कृच्छ्रतस्तु [5]निर्दिश्येते उभे अपि ॥

त्रयाणां चतुरादीनां वाशुभलक्षणानां संवादे स्पष्टं मृतिश्च वाच्या । द्वयोर्लक्षणयोः संवादे [6]मृतिजीविते कृच्छ्रतो वाच्ये । अदृष्टे सति जीवितमिति शुभयोः संवादे । अदृष्टाभावे मृति-रित्युभयोः संवाद इति वास्यार्थः । मिश्रलक्षणे आधिक्यवशात् कल्प्यम् । किञ्च शुभाशुभ-लक्षणयोर्बलाबलं चिन्त्यम् । एकः प्रधानो बलहीन[7]द्वयमपि [8]बाधते । यतः बलाबलचिन्ता तूपदेशात् सिध्यति ।

। शूलचक्रगतनक्षत्रफलम् ।

मृति[9]रर्किणि भे [10]तस्मान्मकयोर्वा [11]धयो[B]रपि । 836
[C12]त्रिके तु वृक्षपरके शमश्शिष्टे [13]गदार्तता ॥ 837

व्या - शूलचक्रवशात् फलमेतत् । शूलचक्रं [14]विलिख्य [15]प्रदर्श्यते । पूर्व[16]शूलाग्रेऽर्कस्तिष्ठति [17]अर्कस्थितं नक्षत्रं तत्र भवतीत्यर्थः । तस्मिन् रोगारम्भश्चेन्मृतिः । [18]तस्मान्मकयोश्च मृतिः । अर्कस्थितनक्षत्रात् क्रमेण गणिते मके- पञ्चदशसङ्ख्ये नक्षत्रे [A1]धयोर्वापि अर्कस्थितर्क्षात् च मृतिः । उत्क्रमेण गणिते च पश्चिमशूलाग्रे च मृतिरित्यर्थः ।

1. T2 °सण्ट° for °सरटा°
2. T1 संवादत इति ग्रन्थपातः
3. T °देश्य
4. T मृतिर्जीविते
5. T निर्देश्यते
6. T मृतिर्जीविते
7. T °द्वयमि°
8. T1 वाध for बाधते
9. T2 पाठः T रिर्किणि
10. T तसमात्म° for तस्मान्म T2 ततसमात्म°
11. T ययो° for धयो
12. T त्र्यहे
13. T2 पाठः T गदातता
14. T चलिखा
15. T प्रदर्शते
16. T °ग्रेऽक°
17. T अर्के
18. T1 °मयो for °मकयो°

A. तेलुगुलिप्यां रेफानुस्वारयोरीषद्भेदात् रेफः अनुस्वारत्वेन गृहीत इति मन्ये । T2 मातृकालेखकेन ।
B. व्याख्यायां रपि इत्यस्य स्थाने र्वापि इति पदं दृश्यते ।
C. व्याख्यानानुसारेण त्रिके इति पदं कृतम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रमेण नवमे उत्क्रमेण नवमे च मृतिः । दक्षिणोत्तरशूला[2]ग्रयोर्मृतिरित्यर्थः । [3]त्रिके तु [B4]वृक्षपरके शमः । अर्कस्थितर्क्षात् क्रमेणोत्क्रमेण च पञ्चमादित्रिके, एकादशादित्रिके च शमः । क्षकारोऽत्र दशसङ्ख्यावाचकः । शूलबाह्यगतके [5]चतुष्केऽपि शम इत्यर्थः । शिष्टे [6]गदार्तता, पूर्वदिग्गत शूलाग्रपार्श्वगत खड्गषट्के, दक्षिणोत्तर-पश्चिमशूलाग्राणां पार्श्वगतखड्गद्वये च रोगाधिक्य मित्यर्थः । एतानि द्वादशात्राभिजिद्युक्तानि गृह्यन्ते । एतत्प्रश्ने च चिन्त्यम् । तत्र यस्या रेखाया अग्रे [7]फणादि विन्यस्तं तत्र [8]दस्रभं विन्यस्य क्रमेण गणिते जन्मभं शूलाग्रगतं चेन्मृतिः । खड्गेषु रोगाधिक्यम् । शिष्टेषु शम इति । [9]अर्कस्थितभात् प्रश्नलग्नगत[10]भात् च गणनाकार्ये[11]त्यन्ये केचिद्वदन्ति । [12]दस्रभान्मुख्यमित्याचार्यवचनम् । केचित्तु आग्नेयरेखात्रयं हित्वा रेखाद्वयमेव विलिख्य प्रश्ने अभिजिन्नक्षत्रं विनैव गणयन्ति ।

। रोगारम्भनक्षत्राद्रोगशान्तिकाल उच्यते ।

[C]पूर्वाहीन्द्रमरुच्छिवे [13]तु मरणं मैत्रा[14]न्त्ययोर्दीर्घरुक्
मासा[15]द्विश्वेन्दुभेऽर्कशूर्पवसुभे पक्षा[16]न्मघायां नखैः । 838
चित्राम्भोधियमाच्युते शिवदिनैर्दस्राग्निमूले ग्रहै-
रादित्योत्तरबु[17]ध्न्यतिष्यविधिभे रोगी [18]सुखी सप्तभिः ॥ 839
क्रूरवारेण संयुक्ते विपत्प्रत्यरनैधने । 840
चन्द्राष्टमेषु संयुक्ते तूत्कटं त्वशुभं भवेत् ॥ इति । 841

व्या- रोगोदयनक्षत्रफलम् । उत्तरात्र- भाग्यम् । नक्षत्राणां दिनसङ्ख्या बहुभिर्बहुधोक्ता च ।

---

1. T दयो for धयो
2. T °ग्नै°
3. T त्र्यहे
4. T वृक्षे परवक्रे
5. T1 चतुष्टके
6. T तदा for गदा°
7. T पणादि व्यन्यस्तं
8. T दसृभं
9. T अर्कि°
10. T °भाक्
11. T °त्वन्ये
12. T दसृ°
13. T मरणभां for तु मरणं
14. T °त्ययो
15. T °द्वीशकेषु
16. T °न्नखा° for °न्मघा°
17. T °बुध्यतिष्यवसुभे
18. T1 सुखी इति ग्रन्थपातः

A दवर्णात् ८ संख्या स्वीक्रियते सर्वत्र । अत्र शूलचक्रे ९ संख्या दक्षिणोत्तरशूलाग्रगतत्वात् ध इति नवसंख्याबोधको वर्णो योग्यो भवति । धयोरितिस्थाने मूलश्लोके दयोरिति तद्व्याख्यायां दयोरिति च पदं लिखितम् ।

B. वृक्षपरके इत्यत्र वृ-४, क्ष-१० संख्या इति ज्ञेयम् । तयोः परे- उत्तरसंख्ये, पञ्चमसंख्या, एकादशसंख्या चेत्यर्थः । सूर्याक्रान्तनक्षत्रात् पञ्चमादिनक्षत्रत्रिके एकादशादिनक्षत्रत्रिके च रोगशम इति फलितोऽर्थः ।

C. पुटगतं शूलचक्रमवलोकनीयम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। व्याध्यारम्भकालमाह ।

व्याध्यारम्भो दुःस्थानात् [1]सुस्थानाच्छशाङ्कयो[2]गवशात् । 842

[3]प्रवदेत् दिवाकरे[4]न्द्वोर्योगवशाच्च तथा निजाष्टमर्क्षान्ते ॥ 843

व्या - दुःस्थसुस्थाभ्यां शशाङ्क योगवशादित्यर्थः । तथा निजाष्टमर्क्षान्ते [5]दिवाकरेन्द्वोर्योगवशाच्च वाच्य इत्यादि व्याख्यातम् ।

[A6]षष्ठाधिपे जलराशौ [7]स्थिरराशौ वा स्थिते तत्समीपे । 844

रोगस्य सद्भावः [8]चरेऽन्तरतो रोगोत्पत्तिः । 845

व्या - तत्समीपे जलस्थाने, समीपे [9]चेति वा जलस्थानसमीपे ।

। चिरकालादुत्पन्नादिरोगज्ञानम् ।

[10]गृहादागतस्य प्रष्टुः प्रश्नविलम्बे चिरो[11]त्थितो रोगः । 846

रोगस्थानेश्वरे [12]दृश्यभागस्थे दृश्य आमयः ॥ 847

व्या - अदृश्योऽदृश्यभागस्थ इति । रोगस्थानेश्वरेऽदृश्यभागस्थविषये प्रकाशकग्रहदृष्टौ दृश्यो व्याधिः, अन्यथा अदृश्यः । प्रकाशकग्रहौ रविचन्द्रौ तद्दृष्टिः षष्ठभस्य वा [13]तदीशस्य वेत्येतच्चिन्त्यम् । [14]लग्नादयोऽस्तादयश्च षट् क्रमेण [15]अदृश्या दृश्या भवन्ति ।

। व्याधिसमुद्भवकारणचिन्ता ।

लग्नादिषड्ग्रहाः षष्ठे तेषु प्रेतग्रहो यदि । 848

प्रेतदर्शनतो व्याधेरारम्भः [16]षष्ठसंस्थितैः ॥ 849

कुजस्य क्रूरदेवस्य [B17]दृष्ट्या व्याधेस्समुद्भवः । 850

1. T1 सस्थानाश्शा° for सुस्थानाच्छ°,
   T2 दुस्थानात् for सुस्थानात्
2. T2 पाठः T °यो वशात्, T1 एशात्
3. T प्रपदे
4. T °रेद्वो
5. T2 दिवाकरेग्गतेन्द्वो T दिवाग्गतेन्द्वो द्र.मूलम्
6. T षष्ठादिपे
7. T1 पाठः T °राशा
8. T1 चरेत्तरतो
9. T1 चिति वा
10. T ग्रहा°
11. T चिरोद्धित
12. T1 दृश्यभागस्थे इति द्विवारं लिखितम् ।
13. T1 तदीशस्य इति ग्रन्थपातः
14. T लग्नादस्तादि T1 लग्नावस्तादि
15. T दृश्यो for अदृश्यो
16. T1 षष्ठि स्थिता for षष्ठसंस्थितैः
17. T दृष्टा

A अस्फुटः श्लोकः व्याख्याप्यस्फुटा । B दृष्ट्या

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुक्रस्य चन्द्रयुक्तस्य षष्ठे[1] स्याद्यदि संस्थितिः । 851
रजस्वलादिसं[2]स्पर्शा[3]द्वाच्यो व्याधिसमुद्भवः ॥ 852

व्या - क्रूरदेवस्य [4]दृष्ट्येति अत्र देवताया दर्शनकर्तृत्वं पुरुषस्य वा । उभयथा ग्राह्यं किल । रजस्वलादिस्त्रीविषयाद्या अशुद्धता विवक्षिता ।

। प्रकारान्तरेण व्याध्युद्भवकारणचिन्ता ।

षष्ठाधिपो [5]द्वन्द्वराशौ जलभे च यदि स्थितः । 853
तदागमनवेलायां [6]जलान्तरगतस्य च ॥ 854
व्याध्युद्भवस्तत्र राहुः शनिर्वा यदि [7]संस्थितः । 855
तदा पथि तटाकादौ पिशाचादिदृशा गदः ॥ 856
[A]प्रेतग्रहौ राहुकेतू ------ - एवं द्रभतत् । 857
------------- द्वाभ्यां हेत्वंशकं वदेत् ॥ 858

। व्याध्यारम्भदिगादिज्ञानम् ।

व्याध्यारम्भदिशं ब्रूयाद् व्याधिताभिमुखीं दिशम् । 859
निमग्न[8]दृष्टयो मर्त्या [9]यावन्तो व्याधिते नरि ॥ 860
व्याध्यारम्भेऽपि तावन्तः सन्ति [10]तत्सदृशा नराः । 861

व्या- [11]प्रष्ट्रवस्थानदिग्भिः प्रागादिभिरहोरात्रस्य प्रातराद्या अष्टौ यामा आरम्भतः कल्प्याः ।

। आहारे विषमिश्रणादिचिन्ता ।

चतुरश्रस्थे [12]मान्दावाहारे क्रूरदृष्टिजं [13]गरळम् ॥ 862

---

1. T षष्ठे द्या स्याद्यदि T1 षष्ठे स्याधिदि
2. T2 °सन्दर्शा°
3. T2 पाठः T °द्वाव्यो
4. दृष्टेति
5. T1 °द्वराशौ
6. T2 पाठः T जलतर°
7. T सत for संस्थितः
8. T °दिष्टयो
9. T °यावन्तो व्याधितो
10. T शत्सदृशा
11. T2 पाठः T प्रष्टावस्था°
12. T मान्दवाहारे
13. T1 गळम् for गरळम्

A मातृकात्रयेऽपि एतावदेव दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विद्याद्गुळिके दुःस्थे स्पन्दनतोदं वदेत्स दैवज्ञः । 863
खे पक्षिग्रह[1]दृग्योगे पक्षिभे पक्षिबाधया ॥ 864

व्या - व्याधिरिति शेषः । [2]पक्षिभे वेति योगभेदः । राशिषु मीने भृगौ,विहग[3]गृहेषु मन्दविधु[4]पुत्रौ । [5]षष्ठाधिपेत्यादिनैतदुक्तम् । षष्ठाधिपस्थितराशिवशा[6]त्तत्र ग्रहयोगवशाच्च व्याधिविशेषाश्चिन्त्या इति । राशि[7]ग्रहणात्तदाश्रितांशकादि च ग्राह्यम् । षष्ठाष्टमव्ययेषु क्रूरक्षेत्र[8]ग्रहोभयत्वे अभिचार[9]कृतोऽपस्मारः [10]क्रूराद्यसाध्यभूत[11]कृतो वा व्याधिः । व्याधितस्तु पुमानत्रो[12]त्पन्नरोगमूर्च्छनयैव [13]म्रियत इति । एतन्निश्चितमित्युक्तं भवति ।

। योगिन्युदयचारज्ञानम् ।

[A]योगिन्यत्र सहोदिता मृतियमस्थाने [14]दिनाष्टांशकं
स्थित्वा गच्छति वारदिश्यनुदिनं त्वीशानदिश्यष्टमे । 865
प्राच्यां चेत्स्थितिरेव मेषवृषयोः दृष्टिस्तुलाकीटयो-
र्याम्यादौ [15]च [16]तथैव यामदळयोः कोणेषु [17]यामावधि ॥ 866

। रव्यादिवारेषु योगिन्युदयदिग्ज्ञानम् ।

[18]इन्द्रेन्द्वग्न्यसुरान्त[19]काम्बुपमरु[20]द्दिक्ष्वर्क चन्द्रारवि-
द्वागी[21]शास्फुजिदर्कपुत्रदिवसे[22]षूद्याति सा योगिनी । 867
यामैस्सप्तभिरेव सप्तसु [23]दिशास्वेकैकयामं क्रमा-
[24]दास्थायान्तिमयामयोर्दिननिशोरीशानदि[25]क्स्था भवेत् ॥ 868

---

1. T दृश्यो
2. T1 पक्षिभेदि for पक्षिभे वेति
3. T1 °गृहेष्टु
4. T1 पाठः T °पुत्राः
5. T1 षष्ठाधिपेत्यादिनैतदुक्तम् इति ग्रन्थपातः
6. T °त्तस्य
7. T °ग्रहाणां त°
8. T °ग्रहभयस्त्वे
9. T °क्रतो
10. T1 °क्रूरद्य for °क्रूराद्यसाध्य°
11. T °क्रतो
12. T1 °त्पल°
13. T मृयत T1 मृय for म्रियत
14. T1 पाठः T दिवा°
15. T1 पाठः T न for च
16. T तदैव
17. T यामा विधिः
18. T1 पाठः T इन्द्रेद्वश्य°
19. T1 °म्बुवमर°
20. T द्दिक्ष्वेऽर्कि°
21. T °शाप्याजि
22. T °वसेद्यादि सो
23. T दिशास्त्वे°
24. T दास्वा°
25. T1 दिक्सा

A द्र.प्र.मा. १६.१०७-११६ (सारसङ्ग्रहः)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टानां च तिथीनां [1]दलद्वये तद्वदष्टयामेषु । 869
योगिन्याश्चारदिशो वक्ष्यन्ते श्लोकपादेन ।। 870

। तिथियोगिनीचारमाह ।

कंसारि[2]भोगमतिदा सोमदाराः कला[3]वती । 871
रजोगुणवती सेयं भाद्रमासि तदापगा ।। 872
लोकवर्तीशसंहारी शार्ङ्गी तद्दासपुत्रवान् । 873
स्तम्भे सकृदरोगेण हतः कालोऽत्र भौम सः ।। 874
दळद्वये प्रतिपदः कंसारीत्युदिता दिशः । 875
यामेष्वष्टसु विज्ञेया द्वितीया दळयोर्द्वयोः ।। 876
सोमदारादिकास्तद्वत्तृतीया दळयोः पुनः । 877
[4]रजोगुणवतीत्यादि चतुर्थी दळयोरथ ।। 878
भाद्रमासीति गदिताः पञ्चम्या दळयोस्ततः । 879
लोकवर्त्यादिकाः षष्ठ्याः शार्ङ्गीत्याद्या दिशः स्मृताः।। 880
स्तम्भेत्याद्यास्तु सप्तम्या अष्टम्याश्च हतादिकाः । 881
नवम्यादिषु तद्वत्स्याद्यथा प्रतिपदादिषु । 882
दलद्वये [5]योगिनी स्यादित्युक्ता [6]तिथियोगिनी ।। 883

। योगिनीदृष्टलग्नारूढादिफलम् ।

योगिन्या यदि दृष्टे लग्ना[7]रूढौ च जन्मलग्ने वा । 884
मृतिदौ [8]भवतो [9]जीवौ योगिन्या मुखगतश्चापि ।। 885

---

1. T द्वल° 2. T1 °भाग° 3. T कलावकति

4. T रजोगुणवतीत्यादि चतुर्धा लयोरपि ।
भाद्रमादि सिति गन्दितां पञ्चत्या दलयोरपि ।
लोकवत्यामिका: षष्ठ्या शार्ङ्गीत्याद्यदि तत्स्मृताः। स्तभेत्याद्याश्चतादिकाः ।।

एवं रजोगुणवती सेयम् ''इत्यारभ्य तदग्रिमदशमपङ्क्तिगतं ''अष्टम्याश्च हतादिकाः इति पद्यं यावत् प्रश्नमार्गानुसारेण दश पङ्क्तयो भवन्ति । प्रश्नसारसमुद्रमातृकात्रयेऽपि ग्रन्थपातात् अशुद्धा उपरि लिखिताः चतस्र एव पङ्क्तयो दृश्यन्ते । अतः शिष्टाः पङ्क्तयः प्रश्नमार्गात्पूरिताः ।

5. T योगित्यादीत्युक्ता 6. T1 तिदि° for तिथि° 7. T °रूढे
8. T1 भवत्रो 9. T जीवयो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। चन्द्रादिगतनवांशादेः मृत्युनिर्णयः ।

[1]मृत्यौ चेदिह निश्चिते शशिगतर्क्षांशै[2]ष्यनाडीसमे
मृत्युः [3]स्याद्दिवसे शुभोऽत्र यदि चेद्भूयोंऽश[4]सङ्ख्यान्विते । 886
चन्द्रे मान्दिगतत्रिकोणभगते रूढत्रिकोणे रवौ
जीवे लग्ननवांशकोणभगते मान्द्यंशकर्क्षे शनौ ॥ 887

। राशीशतदंशपादिना मृत्युज्ञानम् ।

[5]राशीशस्य तदंशपो यदि रिपुर्मध्यः सुहृद्वा भवे-
[6]दंशस्यैष्यविनाडिकासमदिने [7]मासे क्रमाद्वत्सरे । 888
[8]मृत्युः स्याद्घुळिकस्फुटेऽर्कहिमकृज्जीवोदये[9]शस्फुटान्
[10]संयोज्यैषु रवीन्दुजीवरविजा मृत्युप्रदाः स्युर्नृणाम् ॥ 889

। प्रश्नारम्भराशौ सूर्यचन्द्रादेः प्रवेशकाले मरणज्ञानम् ।

प्रश्नारम्भे यत्र राशौ स्थितोऽस्माद्गच्छेद्राशौ यत्र वान्यस्य नाशः । 890
तस्मिन् राशौ प्रश्नकाले त्वनिष्ट[11]स्यार्केन्द्वादेर्मृत्युदः स्यात्प्रवेशः ॥ 891

। दुर्बलादिग्रहवशात् मरणकालज्ञानम् ।

अत्यनिष्टग्रहभस्य दशायां दुर्बलस्य रिपुनीचगतस्य । 892
सूर्यरश्मिनिहतस्य वा वदेन्नान्यथा बलवतानुगुणस्य ॥ 893

। लग्नारूढादेः शुभाशुभज्ञानम् ।

उदयारूढक्षाभ्यां शुभाशुभं प्रष्टुरादिशेद्यद्वत् । 894
दैव[12]विदो व्ययभाभ्यां [13]तदायभाभ्यां च पृच्छकस्य वदेत् ॥ 895

---

1. T1 पाठः। T मृत्या
2. T °ष्व°
3. T °स्यादिदिवसे
4. T1 संख्यान्यते
5. T राशिश्य तदंशावो
6. T अंशस्येष्यति° T1 अंशस्येष्यपि°
7. T1 पाठः T माने
8. T1 मृसात्
9. T °षिस्फुटात्
10. T संयु°
11. T स्यार्कर्नस्य T2 स्यार्कर्णनस्य T1 त्वनिष्टकर्णस्ये
12. T °विधो
13. T तदावभा°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्राभृतादिना वातादिरोगचिन्ता ।

[A]यद्यद् व्याधिकरं च [1]यच्छमनदं दत्तं भवेत्प्राभृतम्
तत्तद् व्याधिसमुद्भवं प्रशमनं प्रष्टुश्च तेनादिशेत् । 896
वातस्य प्रचयप्रकोपशमनं [2]पित्तस्य च श्लेष्मणो
ग्रीष्माख्या[3]द्वरिषाभिधाच्च शरदो मासत्रये च स्मृतम् ॥ 897

। देहे कालविशेषात् त्रिदोषपरिणामचिन्ता तत्परिहारचिन्ता च ।

[4]त्र्यंशेऽह्नः कफपित्तवातवशगा [5]देहाश्च रात्रौ च यत्
[B]त्र्यंशेषु क्रमशस्तु भुक्तिसमया[6]त्त्वाक्रान्तमेवं वदेत् । 898
वातघ्ना लवणाम्लमाधुररसाः काषाय[7]तिक्तौषणाः
श्लेष्मघ्नाश्च [8]कषायतिक्तमधुराः पित्तं निहन्युः क्रमात् ॥ 899

। चन्द्रांशान्मृतिचिन्ता ।

यस्मिन्नंशे [9]शीतगुस्तत्त्रिकोणे चन्द्रे [10]हिमात्ससमे मृत्युरुक्तः । 900
[11]अंशोऽर्धार्धे तत्र चन्द्रे मृतिः स्यात्स्वस्थाः शेषास्तारका
राशयश्च ॥ 901

। पृच्छकानीतपत्रपूगादिपरीक्षणेन प्रष्टुः शुभाशुभचिन्ता ।

प्रश्नार्थे[12]पत्रपूगादावीष[13]त्पामादिभक्षिते । 902
प्रष्टु[14]ष्टमे मृतिर्वा स्यात्सद्यो [15]जीवेक्षिते न तु ॥ 903

। मान्दिवशात् व्रणादिचिन्ता ।

---

1. T यच्चमनर्दन्तं
2. T वित्तस्य
3. T द्वर्षाभिधाच्च
4. T त्र्यंशेऽन्यः
5. T1 देहश्च रात्रौ T देहाश्च रात्रा
6. T1 त्वाकान्त
7. T °तिकतोष्णाः
8. T क्षाया° for कषाय°
9. T शीतगुणं
10. T हिमास्स°
11. T2 अह्लो°
12. T पत्रे पूगादीशत् पामादिस्थ भक्षिपेत् ।
13. T1 त्वामादि° for त्पामादि°
14. T2 प्रष्टुरष्टमे
15. T जीवेत् क्षिते

A. द्र.प्र.अ.प ९.३
B. द्र.प्र.अ.प.९.४ द्वितीयपादे ''स्वभुक्तसमयात्पाकान्त'' इति विशेषः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लग्नादिद्वादशे मान्दिर्मूर्धाद्यङ्गे व्रणार्तिदः । 904
यदि राहुणा समेतो विषपिण्डसम्भवो भवेद्रोगः ॥ 905
[1]शीर्षमुखादौ गुळिको रोगप्रदस्तथा पापः । 906

। रोगोत्पत्तिहेतुः ।

[A]रोगार्तानामिह तु बहुधा कल्प्यते रोगहेतु-
र्भूतावेशाद्ग्रहगतिवशाद्वातपित्तादि[2]कोपात् । 907
एतत्तथ्यं त्रिविधमुदितं प्रायशः स्वीयपा[3]प्मा
रोगोत्पत्तेर्भवति जगतां [4]हेतुरेकस्त्रिधा स्यात् ॥ 908

। देवयोनिविशेषाः कीदृशं पुरुषं पीडयन्तीत्याह ।

[B5]लुब्धं क्रूरं भयार्तं हृषितमतिशठं पूर्ववैरानुबद्धं
नष्टद्रव्यं वियुक्तं प्रतिहतमशुद्धं [6]प्राप्तकालं सरोगम् । 909
[7]हासान्धं कान्तदेहं निधिविलयकरं कातरं भूषिताङ्गं
रात्रावेकाकिनं च [8]स्मरमथनगणास्तं पुमांसं ग्रसन्ति ॥ 910

। देवयोनिविशेषाः कीदृशीं स्त्रियं वशीकुर्वन्तीत्याह ।

[9]तैलाभ्यक्तां प्रसूतामभिमतसुरतां मद्यपानानुरक्तां
नग्नामुत्पन्नसत्त्वां स्मरशरविवशां मुह्यमानां विहारैः । 911
रथ्याशृङ्गाटकस्थामृतुसमययुतां पुंश्चलीकां रुदन्ती-

1. T शिष मुखादिशे for शीर्षमुखादौ
2. T °गोभवत् T1 °केथवात्
3. T °पापं
4. T1 पाठः। T अस्फुटं खण्डितश्च T2 हेतुरेको यदि स्थात्
5. T मातृकायां श्लोकपादत्रयभागः कृमिदष्टः खण्डितश्च । तस्मात् T1 मातृका उद्धृतः।
6. T प्रोक्तं
7. T नासां काण्डदेहं
8. T2 पाठः T स्मरमटनगणा T1 स्मरमभयसग्णा
9. T तैलाभ्यक्तां पुंश्चलिकां रुदन्तीमेकान्तां कान्तदेहाम् । त्रियमपि विषमां गुह्यकास्ते स्पृशन्ति ।

A द्र.प्र.अ.प. ९.२
B द्र.प्र.अ.प. १०.२९-३० अत्र यो ग्रन्थपातः तस्य प्रश्नानुष्ठानपद्धत्यनुसारेण पूरणं कृतम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मेकान्तां कान्तदेहां स्त्रियमपि विषमां गुह्यकास्संस्पृशन्ति ॥ 912

। अनिष्टस्थानगतसूर्यादिः रोगोत्पत्तिकारणीभूतदेवताचिन्ता ।

[A]अर्को रुद्रगणोग्रभूतभुजगाधीशो विधोः किन्नराः
यक्षाद्या ग्रहपन्नगाः क्षितिसुतस्योग्राहिरक्षोग्रहाः । 913
भूता भैरवदेवताश्च शशिजस्या[1]ट्टालकाः किन्नरा
वागीशस्य सुरग्रहाः शुभकरा नागास्त्रिमूर्त्यादयः ॥ 914
[B]यक्षीमातृभुजङ्गमा भृगुसुतस्यार्कात्मजस्याशुभा-
पस्मारोग्रपिशाचकश्मलमुखा निस्तेजसः स्युर्ग्रहाः । 915
राहोः सर्पपिशाचपन्नगभृतः प्रेतग्रहाद्युद्भवाः
केतोस्तेऽखिलदेहिनां विदधते रोगाननिष्टर्क्षगाः ॥ 916

। सूर्यादिः त्रिदोषचिन्ता ।

[C]पित्तं [2]वातयुतं करोति दिनकृ[3]द्वातं कफं शीतगुः
पित्तं भूमिसुतस्तथा शशिसुतो वातं च पित्तं कफम् । 917
जीवो वातकफौ सितोऽनिलकफौ [4]वातं च पित्तं शनिः
क्षीणेन्दुस्थितराशिनाथकथितं [5]पूर्णः कफं तोयभे ॥ 918

। षष्ठाष्टमभावाद्रोगमरणचिन्ता ।

रोगाख्यः [6]षष्ठराशिः स्यादष्टमो मृत्युसञ्ज्ञितः । 919
ताभ्यां रोगं च मरणमारूढाभ्यां वदेद्बुधः ॥ 920

व्या - आरूढाभ्यां षष्ठाष्टमाख्याभ्यां आरूढाभ्यामित्यर्थः ।

1. T अट्टालकागा for अट्टालकाः T1 अट्टालकौगा
2. T पात°
3. T °त्पातं कफलं for वातं कफं
4. T पातं
5. T पूर्नकथं
6. T षाष्ट्र° T1 ष्ट्रष्ट्र°

A द्र.प्र.मा १५.१०४ (सारसङ्ग्रहः)
B द्र.प्र.मा १५.१०५ (सारसङ्ग्रहः)
C द्र.प्र.अ.प. ९.५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। रोगासाध्यरोगयोः ज्ञानम् ।

[1]आरूढषष्ठे लग्ने तु रोगं प्रष्टुर्विनिर्दिशेत् । 921
क्रूरनीचारिभिः दृष्टे त्वसाध्यं तद्विनिर्दिशेत् ॥ 922

। आरूढाद्विषवह्न्यादिभयचिन्ता ।

आरूढराशौ धूमो वा राहुर्वा यदि संस्थितः । 923
अतिवृद्धिं विषं वह्नि[2]सर्पद्विपभयं वदेत् ॥ 924

। असाध्यव्याधिचिन्ता ।

पृष्ठोदये लग्नषष्ठे रूढे पृष्ठोदयेऽपि वा । 925
पापैः दृष्टे युते वापि नैव शाम्यति सा रुजा ॥ 926

व्या - बहुवचनं लग्नस्याप्यङ्गीकरणाद्वा ।

। मृत्युफणिनोः साधनविधिः ।

[3]अर्कारसूरिसोमजशुक्रार्किशशाङ्कवासरेषु फणी । 927
प्रागादिसव्यगामी मृत्युस्तस्माच्चरेन्प्रदक्षिणतः ॥ 928
मृत्युफणिनौ भवेतां क्षगुणा द्युगतनाडिका भक्ता । 929
दिनमानोऽर्कराहुग्रहत्रिकोणचरभे फलं क्षिपेत्प्राणः ॥ 930

। ग्रहादीनां स्पष्टगणितेन दृक्तुल्यतानयनविधानम् ।

[A]अर्के[4]न्द्वारूढोदयभांशेशाः स्पष्टगणितशास्त्रेण । 931
दृक्तुल्येनानेया ग्रहाश्च सर्वे [5]तथैवान्ये ॥ 932

व्या - वीथि[6]छत्त्रादिकं च विचार्यम् ।

1. T आरुढलग्ने षष्ठे लग्ने
2. T1 सर्पाद्विप° T सर्पाद्विव°
3. T1 पाठः ''रसूरिसो'' इति । T तत्र पत्रं खण्डितम् ।
4. T1 °द्वारूढोदयाभांशेशा T °प्यारूडोदयभांशेष इत्यस्फुटम्
5. T तथान्ये
6. T विधि for वीथि । T1 विधवत्रादिकं

A द्र.प्र.मा ५.२९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। मृत्योः चिन्तास्थानानि ।

आरूढतदीशाभ्यां लग्नांशतदीश[1]चन्द्रराश्यंशैः । 933
[2A]कालाहिकेतुशनिप्रभृतिसमेतैस्तु चिन्त्यते मृत्युः ।। 934
केतुर्लाभमध्यगतश्चेत्प्राणस्तदापि मृत्युः ।। 935

। चन्द्रार्कराहुचक्रम् ।

[B]मृगमुखमृगनाथर्क्षेन्दुभाजालिजूके-
ष्वथ विधु[3]गृहकुम्भैणाख्यजूकोक्षभेषु । 936
सवितुरुदयमारभ्याथ सार्धद्विनाडी-
रहिसुत[4]गतिरंशे व्युत्क्रमान्मेषगोऽन्ये ।। 937
[C]चापादिव्युत्क्र[5]मतो भानुस्सार्धद्विनाडिकाचारः । 938
अंशेषु क्रमचार[6]स्सहस्रगुर्वक्षरोक्तिकालेन ।। 939
अर्कस्य सप्तमगतश्चन्द्रश्चन्द्रार्कराहुचक्रमिदम् ।। 940

। चन्द्रार्कराहुचक्रफलम् ।

अर्कयुते फणितनये मृत्युश्चन्द्रान्विते तनुक्षयकृत् । 941
लग्नगतो [7]रिपुचोरप्रपीडनं सूचयत्यलं क्षणिकः ।। 942
लग्नारूढांशतन्नाथप्राणानां गुळिकादिभिः । 943
आरूढाष्टम[8]जन्मर्क्षयोगो मृत्युप्रदो भवेत् ।। 944

। सूर्यजन्यव्याधिस्वरूपम् ।

[D]पित्तोष्णज्वरतापकासपतनापस्मारहृत्क्रोडज-

---

1. T °चन्द्रे
2. T1 कालातिकेतुशमित° T कालादिकेतुशमित°
3. T °ग्रहकंभणास्य°
4. T °गिति°
5. T °वते°
6. T °स्सहसृ°
7. T °चार°
8. T °जन्मर्क्षे

A द्र.प्र.अ.प. ६-३. °कालादिकेतुशनि° for कालाहिकेतुगुळिक°
B द्र.प्र.र. १०६-१०९ तथा प्र.अ.प ३.११
C द्र.प्र.र ११०-११२ तथा प्र.अ.प ३.१२-१३
D द्र.प्र.मा १२.६७ तथा द्र.प्र.अ.प ९.२१ तृतीयपादे ''कुष्ठाग्न्यस्त्र'' for काष्ठाद्यस्त्री इति, चतुर्थपादे ''फणभृद्यक्षाच्च पीडां वदेत्'' इति च विशेषः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्याधीन्वक्ति [1]रविः दृगार्त्यरिभयं त्वग्दोषमक्षिस्रुतिम् । 945
काष्ठाग्न्यस्त्रविषार्तिदारतनयव्यापच्चतुष्पाद्भयम्
[2]चोरक्ष्मापतिधर्मदैव[3]फणभृद्भूतेशभूताद्भयम् ॥ 946

। चन्द्रजन्यव्याधिस्वरूपम् ।

[A]निद्रालस्यकफातिसारपिटकाश्शीतज्वरं चन्द्रमाः
[4]शृङ्ग्यब्जाहतिमग्निमान्द्यकृशतायोषिद् व्यथाकामलाः । 947
[5]चेतःशान्तिमसृग्विकारमुदकाद्भीतिं च बालग्रहात्
[6]दुर्गाकिन्नरधर्मदैव[7]गुणभृद्यक्ष्माखुभीतिं वदेत् ॥ 948

। कुजजन्यव्याधिस्वरूपम् ।

[B8]तृष्णासृक्कोपपित्तज्वर[9]मनलविषास्त्रार्ति[10]कुष्ठाक्षिरोगान्
गुल्मापस्मारमज्जाविहतिप[11]रुषतापामिकादेहभङ्गान् । 949
भूवारिस्तेनपीडां सहजसुतसुहृद्वैरयुद्धं विधत्ते
रक्षोगन्धर्व[12]घोरग्रहभय[13]मवनीसूनुरूर्ध्वाङ्गरोगान् ॥ 950

। बुधजन्यव्याधिस्वरूपम् ।

[C]भ्रान्तिं दुर्वचनं दृगा[14]मय[15]गळ[16]घ्राणोत्थरोगज्वरं
पित्तश्लेष्मसमीरजं विषमपि त्वग्दोषपाण्ड्वा[17]मयान् । 951

---

1. T रपि
2. T चोय°
3. T °फणिभृद्भूताग्नि° for °फणभृद्भूतेश°
4. T1 श्रृग्य° T श्रृग्यं चाजहनि°
5. T द्वेतः° for चेतः°
6. T दुग्वा° T1 दुग्वाकिस्मर°
7. T1 °गुणाभृद्यक्षमाधु° T खण्डितमस्फुटञ्च
8. T1 त्येष्णासृ°
9. T °मपि विषास्त्रादि° T1 °मल° for °मपि
10. T1 °माष्टा° for कुष्ठा°
11. T °पुरुष
12. T °चोर°
13. T1 पाठः T °मपिनिसानु
14. T1 पाठः T °यम°
15. T °गश° T1 °ग° for °गळ°
16. T °घ्राणोर्ध° T1 °घ्रूणोत्थ°
17. T1 °मयौ T °मयो

A द्र.प्र.मा १२.६८ तथा द्र.प्र.अ.प ९.२२
B द्र.प्र.मा १२.६९ तथा द्र.प्र.अ.प ९.२३
C द्र.प्र.मा १२.७० तथा द्र.प्र.अ.प. ९.२४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दुःस्वप्नं च विचर्चिकां निपतनं पारुष्यबन्धश्रमान्
गन्धर्वक्षितिविन्ध्यवासि[1]मयुभिर्ज्ञो वक्ति पीडां खगैः ॥ 952

। गुरुजन्यव्याधिस्वरूपम् ।

[A]उन्मादज्वरशोकमोह[2]कफजश्रोत्रार्तिमोहामयान्
देवस्थाननिधिप्रपीडनमही[3]देवेशशापाद्भयम् । 953
रोगं किन्नरयक्षदेवफणभृद्विद्याधराद्युद्भवं
जीवः सूचयति स्वयं बुधगुरू श्रीकृष्ण[4]शापोद्भवम् ॥ 954

। शुक्रजन्यव्याधिस्वरूपम् ।

[B]पाण्डुश्लेष्ममरुत्प्रकोप[5]नयव्यापत्प्रमेहामयान्
गुह्याधर्मियमूत्रकृच्छ्रमदन[6]व्यापत्तिशुक्ल[7]स्रुतीः । 955
वासःस्त्रीकृषिदेहकान्तिविहतिं [8]शोफामयं योगिनी-
यक्षीमातृगणाद्भयं [9]प्रियसुहृद्भङ्गं सितस्सूचयेत् ॥ 956

। शनिजन्यव्याधिस्वरूपम् ।

[C]वातश्लेष्मविकारपादविहती[10]रापत्तितन्द्रीश्रमान्
भ्रान्तिं कुक्षिरुगन्तरुष्ण[11]भृतकध्वंसं च [12]पश्वाहतिम् । 957
भार्यापुत्रविपत्तिमङ्गविहतिं हृत्तापमर्कात्मजो
[13]वृक्षाश्मक्षतिमाह [14]कश्मलगणैः पीडां पिशाचादिभिः ॥ 958

---

1. T °नियुभि° । T1 ° वियुभि°
2. T1 °कफ° for °कफज°
3. T °देव°
4. T °शापचोद्भवम्
5. T1 °नयनव्यापनव्यापत्प्रमोहामयान्
6. T2 पाठः T तथा T1 °व्यापत्ति°
7. T °स्मृति
8. T शोभा°
9. T1 पाठः T पियाप्रिय° for प्रिय°
10. T °रावर्तितन्त्र°
11. T °भूतकृ°
12. T पश्वागतिम्
13. T वृक्ष°त्म°
14. T1 कश्मल°

A द्र.प्र.मा १२.७१ चतुर्थेपादे कृष्णापचारोद्भवम्'' इति विशेषः। तथा द्र.प्र.अ.प ९.२५
B द्र.प्र.मा १२.७२ प्रथमपादान्ते ''व्यापत्तितन्द्रीश्रमान्'' इति विशेषः । तथा द्र.प्र.अ.प. ९.२६
C द्र.प्र.मा १२.७३ तथा द्र.प्र.अ.प ९.२७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। स्थानविशेषगतग्रहजन्यबाधाज्ञानम् ।

A[1]बाधां वक्ति पिशाचजां दशमगो मन्दोऽथ [2]सर्पेक्षितो
वीक्षाघ्राण[3]भवं विषं च गुळिको [4]देहाष्टमस्थानगः । 959
[5]पापाष्षष्ठगतास्तथोदररुजं रन्ध्रास्तगारो ज्वरं
[6]लग्नास्तोपगतोऽप्यजीर्णजरुजं चन्द्रोऽरिपीडां रिपौ ॥ 960

। राहुकेतुगुळिकजन्यव्याधिस्वरूपम् ।

B[]स्वर्भानुस्तनुतापकुष्ठविषमव्याधी[7]न्विषं कृत्रिमं
पादार्तिं च पिशाचपन्नगभयं भार्यातनूजापदम् । 961
ब्रह्मक्षत्रविरोधशत्रुजभयं केतुस्तु संसूचयेत्
[8]प्रेतोत्थं च गदं विषं च गुळिकस्सर्पार्तिमाशौचकम् ॥ 962

। रोगसन्देहे निमित्तादिसंवादबाहुल्याद्रोगनिश्चयविधानम् ।

C[9]द्वित्र्यादीक्षणवशाद्विचिन्त्य संवाद[10]मूह्यतां रोगः । 963
राशिग्रहभूतोदयपृच्छकचेष्टा[11]वचोऽन्तिकद्रव्यैः ॥ 964

। करचरणयोर्दाहोत्पत्तियोगः ।

[12]प्रश्नजातकयोस्तौल्याद् व्याधियोगान्वदाम्यहम् । 965
लग्नारिरन्ध्रेऽर्ककुजौ [13]पाण्यङ्घ्र्योरुष्णरोगदौ ॥ 966

। कुष्ठरोगयोगः ।

[14]तत्रार्कराशौ राहुश्चेत् [15]कुष्ठरोगोद्भवः स्मृतः । 967

---

1. T भादां
2. T सर्पेक्षणं
3. T °भयं
4. T गेहा°
5. T °स्सप्तमगा°
6. T प्रशास्तोपगतास्य जूर्ति°
7. T °त्विषं कृत्तिमं
8. T प्रेतोर्थं
9. T द्वित्र्यातेक्ष° T1 द्वित्र्यालेक्ष°
10. T संवाद ऊह्यतां
11. T °वचोऽन्तं T1 °वचोन्तिं द्रव्यैः
12. T प्रश्नदूतकयो° T1 प्रश्ने जालकयोस्तुल्या°
13. T2 पाठः T पाण्यंध्रै°
14. T तत्राकाशौ सराहूचे°
15. T कुष्ठा° T1 कुष्ठो°

A द्र.प्र.मा १२.७५ तथा द्र.प्र.अ.प ९.२९
B द्र.प्र.मा. १२.७४ तथा द्र.प्र.अ.प ९.२८
C द्र.प्र.अ.प. ९.३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - उष्णरोगः - [A]एरिप्पु । तत्र लग्नारिरन्ध्रे ।

। भाविरोगचिन्ता ।

सप्तमे वाष्टमे पापा भावि[1]रोगस्य सूचकाः । 968

सप्तमे बहवः पापा जठरे विषभीतिदाः ॥ 969

व्या - एतज्जातके प्रश्नेऽपि वक्ष्यमाणं च फलं समानमिति ।

। पापग्रहयुतषष्ठराशिफलम् ।

चन्द्रे षष्ठे कुजयुते रिपुचोरभयं वदेत् । 970

राजाग्निचोरभीतिस्स्यात्कुजेन्द्वोरहियोगिनोः ॥ 971

व्या - व्यस्तयोः समस्तयोर्वा षष्ठस्थयोः कुजचन्द्रयोरह्वियोगे राजाग्निचोरभीतिः स्यादिति ।

। भ्रान्त्यादियोगः ।

लग्ने चन्द्रे बुधयुते भ्रान्तिपाण्ड्वादिवह्निभीः । 972

व्या - आदिपदेन [2]अर्शःकामलादिपरिग्रहः । एते रोगा भार्यायाः स्वस्य च भवन्ति ।

। क्षयभ्रान्त्यादियोगाः ।

हीनार्थसत्त्वो रन्ध्रे[3]ऽब्जो पिशाचक्षयरोगभाक् ॥ 973

लग्नेऽष्टमे त्रिकोणे वा पापक्षीणेन्दुयोगतः । 974

भ्रान्तिनेत्रामयक्रूरव्याधिभि[4]स्तन्मृतिर्भवेत् ॥ 975

व्या - स्पष्टः ।

। विविधव्याधियोगाः ।

सार्थार्यष्टान्त्यगे सौम्ये [5]कामलापाण्डुपैत्यभाक् । 976

श्लेष्मत्रिदोषाक्षिरोगबन्धुद्वेषमतिभ्रमाः ॥ 977

---

1. T °द्रोग°
2. T अमैकामिला°
3. T °ऽब्जे°
4. T °स्तस्मृति°
5. T कामिला°

A अत्र एरिप्पु इति तमिळभाषापदम् । एरिप्पु - दाहः इत्यर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - भवन्तीति शेषः ।

एषु जीवे भ्रातृगुरुद्रोहानर्थप्रमेहभाक् । 978

शूलगुल्मगुरुब्रह्मदेवताशापभाक् पुनः ॥ 979

ब्रह्मस्वं देवता[1]स्वं च निधिमुद्धर्तुमिच्छति । 980

एषु शुक्रेऽक्षिरु[2]क्कासप्रमेहक्षयरोगभाक् । 981

सप्तमे वाष्टमे शुक्रे मूलातिसारसर्परुक् ॥ 982

[3]विषूची च स्त्रीवशार्थश्चातिस्रावश्च वद्कठम् ॥ 983

व्या - सर्परुक् - सर्पबाधा ।

॥ मन्दराहुकेतवस्तृतीयलाभव्यतिरिक्तलग्नादिभावेषु व्यस्ताः समस्ता वा स्थिताश्चेत् तेषां दोषमाह ॥

[4]सोत्थलाभान्यभावेषु स्थिता मन्दाहिकेतवः । 984

कुर्युः क्रमाच्छिरोबाधामक्षि[5]कर्णमुखोद्भवाम् ॥ 985

सुखे विचर्चिकाक्लेशसन्धितोदमरु[6]द्द्रदाः । 986

गृहच्छिद्रोदरव्याधिविरेकाभाव[7]वामरुक् ॥ 987

व्या - [A]विचर्चिका - उडम्बिले शोरि । सन्धितोदः - वशमिल्लादे उरुकै । मरुद्द्रदः - वातव्याधिः । गृहच्छिद्रं - दारिद्र्यकलहादि । विरेकाभावः - विरेचनाभावः । वामरुक् - वामभागे [8]वशमिल्लादे इरुकै ।

। कुष्ठभगन्दरयोगौ ।

रन्ध्रे [9]भगन्दरं कुष्ठं राहुश्चेत्कृष्ण[10]कुष्ठदः । 988

भग[11]न्दरं च कुर्वीत केतावपि समं फलम् ॥ 989

। अपस्मारयोगः ।

1. T °तासुं
2. T2 पाठः T °क्तान° for क्कास
3. T विषूची च स्त्रीवश्येऽर्थं तिस्रापश्चवट्करम् ।
4. T सार्थ°
5. T °कर्न°
6. T °द्भताः
7. T °वामशुक्
8. T वशमल्लात्
9. T भगन्धरं
10. T °कुष्ठतः
11. T °न्धरं°

A अत्र विचर्चिका - सन्धितोदः वामरुक् इत्यादेः पदस्य विवरणं तमिल्भाषागतपदैः कृतम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लग्नत्रिकोणे बलवान् पापो मान्दियुतो यदि । 990

अपस्मारप्रदोऽस्तस्थस्स चे[1]द्भ्रान्तिभयप्रदः ॥ 991

व्या - अस्तस्थस्स चेद्बली पाप[2]स्समान्दिस्ससमस्थश्चेत् भ्रान्तिप्रद इत्यर्थः । द्वादशेऽपि लग्नतुल्यं फलमिति ।

। गुल्मादिरोगचिन्ता ।

चन्द्रार्कसंयुतौ पाप[3]दृष्टियुक्तौ शुभैर्यदि । 992

न [4]दृष्टौ यदि तौ नूनं गुल्मशूलादिरोगदौ ॥ 993

। अक्षिरोगयोगः ।

रवीन्द्वोरा[5]राक्योरष्टार्थषष्ठा[6]न्त्येष्वक्षिरोगदाः । 994

। बाधिर्यदन्तरोगयोगौ ।

तृतीयस्य त्रिकोणस्थाः पापाश्शुभविवर्जिताः ॥ 995

बाधिर्यदास्ससमस्था दन्तरोगप्रदाः किल । 996

व्या - शुभविवर्जिताः शुभदृष्टिरहिता इत्यर्थः ।

। उन्मादयोगः ।

नीचे लग्ने त्रिकोणस्थे भौमे सोन्मादरुग्भवेत् ॥ 997

व्या - उन्मादाभावे [7]पातित्यं वा स्यादिति ।

। क्षयादियोगाः ।

लग्ने मन्दे त्रिकोणस्थे भौमेऽन्त्ये चन्द्रभास्करौ । 998

शुभादृष्टा यदि ह्येते भ्रान्तिक्षयभयप्रदाः ॥ 999

व्या - केचिदस्मिन् योगे सति शुभदृष्टावप्युन्मादक्षयौ भवत एवेति वदन्ति ।

। कुष्ठयोगाः ।

---

1. T2 °भीति° for °भ्रान्ति°
2. T ° समान्दिः इति ग्रन्थपातः
3. T °दृष्टे
4. T2 पाठः T दृष्टा
5. T °रार्कयोष्टा°
6. T °न्त्येन्वक्षि° T1 °न्त्येस्वक्षि°
7. T पापतित्यं

A अस्य श्लोकस्य उत्तरार्धं न दृश्यते । द्र.बृ.जा. २१-९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[A]चन्द्रेऽश्विमध्यझषकर्किमृगाजभागे
कुष्ठी समन्दरुधिरे तदवेक्षिते वा । 1000

व्या - [1]अत्र योगे कुष्ठाभावे [A]किटिपविचर्चिकादि वाच्यमिति शेषः ।

लग्ने जीवे सपापेन्दौ मदे कुष्ठं विचर्चिका । 1001
लग्नेऽस्ते वा सपापेऽर्के किटपं कुष्ठमादिशेत् ॥ 1002

व्या - किटपं कुष्ठं विचर्चिका वेति त्रिक[2]मुभयत्र योगे भवतीत्यर्थः ।

। गुह्यव्याधियोगः ।

चन्द्रे कर्कटवृश्चिकांशकगते पापैर्युते [3]गुह्यरुक् । 1003

व्या - कुष्ठं वा स्यादित्यर्थः ।

। सूर्यजन्यव्याधयः ।

अनिष्टस्थ[4]लगस्सूर्यः [5]कासं पित्तं क्रमाद्वदेत् । 1004
ज्वरं कुष्ठं प्लिहानं च धमं दैवकृतं गदम् ॥ 1005

। चन्द्रजन्यव्याधयः ।

दृग्रोगं [6]चापि हृद्रोगमपस्मारं च सूचयेत् । 1006
[7]गदं शीतज्वरं वह्निमान्द्यं चन्द्रोऽति[8]सारकः ॥ 1007

। कुजजन्यव्याधयः ।

गृहदेवा[9]पचारोत्थां पीडां [10]चापि स सूचयेत् । 1008
कुजस्तु रौद्र[11]देवोत्थां पीडां [12]जूर्तिं च हृद्रुजम् ॥ 1009

। बुधजन्यव्याधयः ।

अर्कसम्बन्धतस्त्वेषः [13]पीडां शस्त्रोद्भवां वदेत् । 1010

---

1. T न्यत्र
2. T °मभय°
3. T2 गुह्यराट्
4. T °लग्न°
5. T कासपित्तक्रमां
6. T चहि
7. T कथं
8. T सूरक T1 पाठः
9. T °पचरार्थां पिण्डां
10. T1 वापि
11. T °देवोर्धां पिण्डां
12. T2 जार्ति
13. T पिण्डा

A अस्मिन् ग्रन्थे किटिप, किटप इति पदद्वयं कुष्ठविशेषार्थे प्रयुक्तमिवोपलभ्यते, किन्तु Monier Williams कोषे किटिप इत्येव पदं दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

राहुसम्बन्धतो मारीं ज्ञो विमानस्थदेवताम् ॥ 1011

। गुरुजन्यव्याधयः ।

विषं च कृत्रिमं मोहं [A]गुरु[1]स्त्वीशापचारजम् । 1012

[2]शापजं निधिजं वापि रोगं मोहं च सूचयेत् ॥ 1013

। शुक्रजन्यव्याधयः ।

शुक्रः शोफं मूत्रकृच्छ्रं डाकि[3]न्याद्यांश्च पाण्डु च । 1014

। शनिजन्यव्याधयः ।

शनिस्तु धीभ्रमं शूलं पर्वतस्थपिशाचिकाम् ॥ 1015

। राहुजन्यव्याधयः ।

राहु[4]र्विषोद्भवं शूलमपस्मारं च सूचयेत् । 1016

। केतुमान्दिजन्यव्याधयः ।

केतुश्च गुळिकश्चापि [5]प्रेतोत्थगदसूचकौ ॥ 1017

व्या - क्रूरेषु लग्नसप्तमाष्टमगतेषु देवताभिर्महापीडां वदेत् । लग्नगते प्रतिबिम्बं [6]देयम् । सप्तमगते नृत्तं देयम् । अष्टमगते बलिर्देयः । चतुर्थगते [7]गृहारामादि देयमि[8]त्युक्तत्वात् चतुर्थगतेष्वपि पीडा वाच्या । प्रतिरूपं दारुणा [9]मृदा वा कृतं देवताकारधारिभिर्बलिकारकनरैः । अपचारजं पूजाव्यतिक्रमादिकोपजम् । मोहं प्रमेहम् । यत्र शत्रुग्रह इत्युच्यते तत्र स्वशत्रुराशौ स्थितः शत्रुग्रहः । स्वमित्रराशौ स्थितो मित्रग्रहः । स्वनीचस्थितो नीचग्रहः । पापाश्च नीचशब्देनोच्यन्ते क्वचित् ।

। अङ्गचेष्टादिनापच्चिन्ता ।

स्फोटने भूमिपीडा स्याद्भेदे[10] सर्पादिजं भयम् । 1018

शिरःकण्डूा कार्यनाशो ब्रह्मपीडाङ्गमर्दने ॥ 1019

1. T1 °स्त्वीशाप° T °स्त्रीशापवाचारजम्
2. T1 पापजं
3. T डाकिन्ना°
4. T °र्विभोद्ग°
5. T प्रेतोर्ध°
6. T2 पाठः, T देवम्
7. T ग्रहा°
8. T °त्युक्त्वा चतु° T1 °मित्युक्त्वार्वाच्चतु°
9. T °न्मृदा°
10. T °दो

A छन्दःसंरक्षणदृष्ट्या '' गुरुस्त्रीशापचारजम्'' इत्येव योग्यं भाति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - ब्रह्मपीडा ब्राह्मणपीडा ।

अङ्गावधोमुखामर्शेऽतिसारछर्दिरन्यथा । 1020

उदरं [1]वामसंस्पर्शे दक्षाङ्गस्पर्शने ज्वरः ॥ 1021

व्या- अधोमुखामर्शे - अधोमुखसंमार्जने, अन्यथा ऊर्ध्वमुखसंमार्जने छर्दिः - उद्गारः ।

। लग्नात्तत्तद्भावगतमान्देः शरीरावयवविशेषगतव्रणादिज्ञानम् ।

मूर्धास्य [2]कण्ठवक्षोहृन्नाभिशिश्नाण्डकोरुषु । 1022

जानुजङ्घाङ्घ्रिषु तनोः क्रमान्मान्दिर्व्रणार्तिदः ॥ 1023

व्या - अण्डमेवाण्डकम् । तनोर्लग्नात् ।

॥ राहुगुळिकयोरन्यतरस्य द्वयोर्वा लग्नादिस्थितिवशात् रोगविशेषस्थानमाह ॥

[3]पातः स्याद्विषभीत्यु[4]त्थोमुखोरः[5]कर्णजारुजा । 1024

[6]सोत्थे [7]कण्ठोरसोर्ग्रन्थिः हृद्रोगः कुक्षिजा रुजा ॥ 1025

नाभिजा लिङ्ग[8]मुष्कोत्था[9]पानोर्वोश्च जानुनोः । 1026

गुल्फे पादे क्रमाल्लग्नाद्राहौ [10]मान्दौ द्वयोस्तु वा ॥ 1027

व्या - लग्नमारभ्य द्वादशराशिषूक्तापि क्रमाद्वेद्या । द्वितीये मुखेति । [11]चतुर्थे हृद्रोगः । पञ्चमे कुक्षिरुक् । षष्ठे सप्तमे लिङ्गवृषणरुजा [12]विषजा भूतबाधा च । अष्टमेऽपानद्वारे रोगः । आये गुल्फे व्यये पादे । उभयत्र गुल्फ एव रुजेति केचित् ।

। तत्तद्भावस्थपापवशादनिष्टफलचिन्ता ।

लग्ने पापे देहपीडा सुखे पापे सुखक्षयः । 1028

बन्धुनाशः स्थानहानिर्धर्महानिर्गुरोर्विपत् ॥ 1029

---

1. T1 वाममसं° for वामसं°
2. T °कर्ण°
3. T वातास्या°
4. T °भीतोर्धा°
5. T °कर्त°
6. T1 सोर्धे T सार्धे
7. T कर्नो°
8. T2 °मुष्कोर्धा° T °मुष्कार्धा°
9. T °पाया° द्र.व्याख्या
10. T मन्दौ
11. T चतुर्थो
12. T2 पाठः, T विषभूतवाधा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ रव्यादिक्षेत्रेषु लग्नभूतेषु [1]लग्ने रव्याद्यंशकेषूदितेषु लग्नगतेषु वा फलं पादक्रमादाह ॥

[A]लग्नेऽर्काद्येऽर्कादिवर्गे [2]वृद्धद्विजधनक्षयौ । 1030
गरगर्भिण्यागमने दारिद्र्यान्यायपैशुनम् ॥ 1031
दासादिगणिकायानं शुभद्रव्यद्विजागमौ । 1032
[B]योगिदेवद्विजा रुग्ण[3]मलि [4]दारिद्र्यदीक्षिताः ॥ 1033

व्या - [5]लग्नेऽर्के तद्वर्गे वा वृद्धद्विजागमो दारिद्र्यं वा स्यात् । लग्ने चन्द्रादिसम्बन्धे गरजौषध प्रयोगः । गर्भिण्यागमनं च स्यात् । पैशून्यमेव पैशुनम् । आयानम् -आगमनम् । योगिदेवद्विजा आगच्छन्तीति शेषः । रुग्णेत्यत्रापि आगमिष्यन्तीति शेषः । मलिः - मलिमः । गरादिव्याधिनिरूपणप्रसङ्गादि[6]दमप्रकृतमपि किञ्चिदुक्तमिति ध्येयम् ।

। भावाक्रान्तग्रहवशाद्बाधामाह ।

[7]पैशाची खे शनौ बाधा [8]जामित्रे सा शुभे सुते । 1034
लग्नेऽस्ते वा कुजे [9]जूर्तिर्मुखरोगोष्णरुग्भवेत् ॥ 1035

। सर्पभयं सर्पान्मरणयोगश्च ।

आरूढेऽस्ते [10]तत्त्रिकोणे मान्दौ सर्पभयं वदेत् । 1036
कुजदृष्टयुते मान्दौ केन्द्रे सर्पान्मृतिं वदेत् ॥ 1037

व्या - अत्र पूर्वजन्मनि त्वया सर्पो मारितो दग्धश्च । वल्मीकं [11]छित्त्वा कूपं तटाकं वा कृतवानसीति प्राश्निकं प्रति वदेत् ।

। सर्पबाधानिमित्तमाह ।

मन्ददृष्टयुते मान्दौ निष्ठी[12]वोच्छिष्टमूत्रणात् । 1038

1. T लग्न°
2. T वृद्ध°
3. T2 पाठः, T °मरि° द्र.व्या.
4. T दारिद्र°
5. T1 पाठः T लग्नेऽर्कि
6. T1 पाठः, T °मप्र° इत्यस्फुटम् ।
7. T पैशाचि for पैशाची
8. T जामातरि for जामित्रे
9. T1 पाठः, T जार्ति
10. T °ततत्रिकोणे
11. T °छत्वा
12. T1 पाठः, T °चोच्छिष्ठ T2 °ओच्छिष्ठ°

A द्र.प्र.र १३२-१३४

B द्र.प्र.र १३५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्पस्थाने मलो[1]त्सर्गान्मान्दौ राहुयुतेऽत्र च ॥ 1039

व्या - अत्र च केन्द्र इत्यर्थः । इदं विशेषणं योगद्वयेऽपि द्रष्टव्यम् । [2]सर्पे निष्ठीवोच्छिष्टमूत्रणात् सर्पपीडेति [3]योजनीयम् ।

॥ तस्य सर्पस्य स्थानमाह ॥

चरे दूरस्थितः सर्पः स्थिरे स्वीयगृहे वसन् । 1040

युग्मलग्ने [4]तूभयस्थो देवाम्बुस्थानगोऽपि वा ॥ 1041

॥ व्याधिस्थानं निश्चेतुमाह ॥

ऊर्ध्वमध्याधरे काये लग्ने तूर्ध्वमुखादिके । 1042

व्या - ऊर्ध्वकायः कण्ठादूर्ध्वम् । [5]कट्यधोभाग [6]अधरकायः ।

॥ ग्रहाणामङ्गविभागमाह ॥

मन्दज्ञगुरु[7A]शुक्रारराहवो मस्तकादितः ॥ 1043

व्या - भ्रुवोरूर्ध्वं शनेः । [8]मुखं ज्ञस्य । चिबुकादधःपर्यन्तं गुरोः । जानुपर्यन्तं शुक्रस्य । गुल्फान्त[9]मारस्य । तदधः [10]आपादमहेरिति । प्रष्टुः स्पृष्टदृष्टस्थितचेष्टितराशि[11]ग्रहरश्मिभिः फलं कालं च विचार्य वदेदिति ।

। अनिष्टस्थानगतार्कादिफलम् ।

अनिष्ट[12]स्थानगोऽर्कादिः पितृमातृसहोदरैः । 1044

[13]बन्धुपुत्रवधूभृत्यैर्विरोधं कुरुते क्रमात् ॥ 1045

एषु नीचारिमूढेषु प्रोक्तं वैरं दृढं भवेत् । 1046

चन्द्रेऽष्टमे धनच्छेदो बलहानिः पिशाचभीः ॥ 1047

---

1. T °त्सर्गामा°
2. T1 सर्पनिष्ठीवोच्छिष्टि° T सर्पि निष्ठितो°
3. T योजनाम्
4. T त्रुभय°
5. T कठिरधोभागे
6. T2 °रधकायं
7. T °शुक्राथ° T2 पाठः
8. T1 मुखज्ञस्य T मुख ज्ञ for मुखं ज्ञस्य
9. T °मारभ्य
10. T पापादमहेतिति
11. T °गृह °
12. T °स्थानलगो°
13. T वसुपुत्रवधूभूत्यै

A अत्र '' शुक्रारराहवो'' इति पठितं चेत् जङ्घाभागोऽङ्गारकस्येति युक्तं भवति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षयरोगश्च दारिद्र्यं सर्वतो दुर्बलो भवेत् । 1048

व्या - फलविशेषकथनाय पुनरुक्तिः ।

। कुष्ठरोगचिन्ता ।

लग्नार्यष्टमगैः कुष्ठं कुजाहिरविभिर्भवेत् । 1049

ससाष्टमगतैः पापैरपि [1]देहीदृशो भवेत् ॥ 1050

व्या - गदः [2]विषभुक्तिभवः । कुक्षिरोगश्चा[3]सद्गृहेऽस्तगे ।

। विविधभावगतचन्द्रजन्यव्याधयः ।

[4]सपापे रिपुगे चन्द्रे [5]व्याधिः स्याच्छत्रुदोषजः । 1051

चन्द्रे सगुळिके षष्ठे भयं स्यान्नृपवह्निजम् ॥ 1052

लग्ने मूढेन्दुबुधौ भ्रान्तिक्षयकामिलाग्नि[6]हान्याद्याः । 1053

[7]रोगाः स्युरात्मनो वा युवतेस्सह वानयोस्तदा ब्रूयात् ॥ 1054

[8]बलनाशं क्षयरोगं पिशाचपीडां वदेन्निधनसंस्थे । 1055

चन्द्रे ह्युद्वारं व्ययस्थिते चातिसार[9]मूत्रामयाद्यम् ॥ 1056

व्या - यत्र यत्र पुनरुक्तिस्तत्र तत्र फलविशेषकथनायेति द्रष्टव्यम् । [A]एषु जीवे [10]भ्रातृगुर्वित्यत्र आन्त्रवृद्धिज्वरावपि द्रष्टव्यौ । एषु शुक्रेऽक्षिरुगित्यत्रातिसारदुर्नामपित्तव्याधयश्च द्रष्टव्याः ।

। तृतीयैकादशभिन्नस्थानगतपापग्रहफलम् ।

पापा[11]स्त्र्यायान्यगा देहे [12]रोगास्तित्वं स्वदोषजम् । 1057

व्या - सूचयन्तीति शेषः ।

वाच्यशुभं मुखरोगं कपोलकण्ठाक्षिनासिकायां वा । 1058

दन्तरसनादिरोगं [13]भुक्त्यरुचिं वा प्रलापमपि कुर्युः ॥ 1059

1. T1 पाठः T देहे दृशो
2. T1 एष
3. T1 °सद्गृहे T1 °दद्गृहे
4. T1 सपापेंपुगे for सपापे रिपुगे
5. T1 न्याधि
6. T °हानाद्याः
7. T योगातसुरा°
8. T बाला°
9. T ° मूत्राद्यमय
10. T भ्रातु
11. T °स्त्र्यावा,° T1 ° स्त्र्यो वा°
12. T °द्रोखा°, T1 द्रोवा °
13. T भुक्त्यरुचं T1 भुक्त्यारुचं

A अस्मिन् ग्रन्थे द्र. ९७८ तथा ९८१ (श्लोकार्धसंख्या)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। लग्नस्थपापग्रहजन्यव्याधिचिन्ता ।

लग्नस्थिताश्शिरसि रोगमतस्समस्ता
[1]गात्रात्मधातुषु रुजं दधते नराणाम् । 1060
[2]देहप्रकम्पनपरिभ्रमसन्धितोद-
[3]वान्तान्तरुष्णकफवातभयज्वरादीन् ॥ 1061

। व्याध्युपशमोपायचिन्ता ।

[A4]व्याधिर्गुणैश्शममुपैति शुभाव[5]लोकात्
पापेक्षिते न च शुभाशुभदैश्च कृच्छ्रात् । 1062
[6]दुःस्थग्रहोक्तमनुना [7]ग्रहपूजयान्न-
[8]दानौषधादिबलिभिश्शमयेच्च रोगान् ॥ 1063

। अष्टमस्थशन्यादिजन्यव्याधिचिन्ता ।

मन्देऽष्टमे कुष्ठभग[9]न्दरादी[10]नहौ च पापा बलिनस्त्रिकोणे । 1064
कुर्वन्त्यपस्मारमसाध्यरोगं मान्द्यन्विताश्चेच्छुभदैरदृष्टाः ॥ 1065

। अनिष्टस्थग्रहजन्यरोगाः ।

पापयुतोऽस्ते मान्दि[11]र्विस्मृतिदस्स्याद्व्ययेऽर्कशीतकरौ । 1066
अशुभावलोकिताश्चेद्भवन्ति मूलान्त्रगुल्माद्याः ॥ 1067

। नेत्ररोगचिन्ता ।

निधनेऽर्के शशि[12]दृष्टे व्ययेऽर्कजे भूमिजेऽरिभावस्थे । 1068
नयन[13]समुत्था रोगा भवन्ति जन्मान्तरार्जितैः पापैः ॥ 1069

---

1. T गात्रात्मधात्मधातुषु
2. T मान्दे वाप्रकम्पनपरिभ्राम सिन्धितोद°
   T1 मान्दे हे प्रकम्पन रि भ्राम°
3. T1 पाठः वान्त for T वात°
4. T व्याधिगुणै°
5. T °लोकान्
6. T1 पाठः T दुग्ध°
7. T गृह°
8. T2 पाठः, T °मौषधो°
9. T °न्धरा°
10. T2 °सहौ
11. T2 पाठः, T विस्मृत°
    T1 विस्मृतदस्मृतदस्या for विस्मृतिदस्स्या°
12. T1 पाठः T °दृष्टेऽष्टव्यये
13. T °समुद्रा

A द्र.प्र.अ.प. ९.५५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। भ्रान्तिस्वकुलनाशयोगौ ।

लग्ने जीवे मदे भौमे [1]चित्तभ्रान्तिर्नृणां भवेत् । 1070
स्वकुलभ्रंशनं वा स्या[2]न्मन्देऽङ्गे [3]कोणगे कुजे ॥ 1071
देवगुरौ लग्नस्थे मदे कुजे चित्तविभ्रमो नृणाम् । 1072
स्वकुलभ्रंशो वा स्याल्लग्ने मन्दे त्रिकोणगे वारे ॥ 1073

व्या - कोणं - त्रिकोणम् ।

। भ्रान्तियोगः ।

[4]चन्द्रार्कौ रिष्टगौ मन्दे लग्ने भौमे त्रिकोणगे । 1074
भ्रान्तिः स्यान्न शमं याति [5]सर्वैरपि चिकित्सितैः ॥ 1075
[A]द्विदशगौ रविचन्द्रौ लग्ने मन्दे त्रिकोणगे भौमे । 1076
भ्रान्तिः स्यान्नैव शमं प्रयाति सर्वैश्चिकित्सितैर्वापि ॥ 1077

। कुष्ठादियोगाः ।

लग्नेऽस्ते वा चन्द्रे पापयुते मीनभेऽथवा चापे । 1078
कुष्ठ[6]किटपाद्याः[7] स्युस्सूर्ये पापान्विते मृगे तद्वत् ॥ 1079

। कुष्ठयोगः ।

[8]वृषभे कीटे चन्द्रे पापयुते लग्नभादनिष्टस्थे । 1080
कुष्ठस्स्या[9]द्देहेऽस्मिन् यस्मिन् गात्रे स्पृशेद्दूतः ॥ 1081

---

1. T चित्तपित्तभ्रन्तिः for चिन्ताभ्रान्तिः
2. T °न्मदे°
3. T1 रो कोणजे for °ङ्गे कोणगे
4. T °र्करिष्टगो
5. T1 पाठः T सर्वैरै°
6. T °कक्षिवा°
7. T1 ''स्युस्स् इत्यस्मात्परं ''पापयुते'' इत्यस्मात्पूर्वं ग्रन्थपातः ।
8. T वृषभकीटे ता for वृषभे कीटे चन्द्रे
9. T1 देहेऽस्मि for देहेस्मिन् यस्मिन्

A ''अत्र द्वादशगौ'' इति युक्तं मन्ये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। सर्पावासस्थानगतवृक्षच्छेदजन्यव्याधिचिन्ता ।

[A]सर्पो गुळिकस्थर्क्षे ततस्त्रिकोणे तदस्तभे वा स्यात् । 1082
व्याधिप्रदो यदि केन्द्रे कुजे तत्स्थानगद्रुमच्छेदात् ॥ 1083

। सर्पावासभूखननादिजन्यसर्पबाधामाह ।

भूखननात्सर्पवधान्मृद्गृह[1]भेदाच्च कूटभेदाद्वा । 1084
शनि[2]गुळिकौ सह केन्द्रे स्थितौ वा चण्डालमहिषसम्पर्कात् ॥ 1085
मूत्रपुरीषोत्सर्गान्निष्ठीवोच्छिष्ट[3]हस्तिसम्बन्धात् । 1086
अहिगुळिकौ यदि केन्द्रे निष्ठीवान्मैथुनान्मलोच्छिष्टात् ॥ 1087
सर्पसमीपे तस्माद्भवन्ति सर्पोद्भवा [4]नृणां रोगाः । 1088
[B5]आरूढे स्थिरराशौ स्वगृहे सर्पश्चरे तु दूरस्थः ॥ 1089
उदये स्वदेशसन्धौ गृहसन्धौ द्विस्थले द्विभागे वा । 1090
देवगृहे कोशगृहे जलवह्निसमीपगोऽथवा सर्पः ॥ 1091

व्या - चरस्थिरादिवशात् [6]दूरसामीप्यादिसर्पस्थानं पूर्ववद्द्रष्टव्यम् ।

। पापग्रहजन्यमरणयोगः ।

पापेऽष्टमे मृतिस्सौम्याः केन्द्रस्था बलिनो न चेत् । 1092
सौम्यैरुपचयस्थैर्वा मृतिः केन्द्रगतैः खलैः ॥ 1093

। चन्द्रजन्यमरणयोगः ।

चन्द्रा[7]न्निधनारिगताः पापाः पापेक्षितो [8]विधुर्मृतिदः । 1094

1. T °देदा° for °भेदा°
2. T °कुळिकौ सह द्रे स्थित
3. T1 पाठः, T पत्रं खाण्डितम् T2 ''मस्ति वस्तु'' वा सन्देहात् पदद्वयं लिखितम् ।
4. T1 न्याणां
5. T आरुढे स्थिरराशौ स्वगृहे जलवह्निसमीपगोऽथवा सर्पः ।
6. T दूरस्वा°
7. T, T1 मातृकाद्वयेऽपि निधनानिरि °इत्यधिकः पाठः
8. T विधु मृति°

A द्र.प्र.अ.प १०.१३-१७
B अयं श्लोकः मातृकासु अत्र न दृश्यते । अग्रे विद्यते । अस्य व्याख्या तु अत्रैव । कारणं तु लिखितानां अष्टाविंशतेः पङ्क्तीनां पुनर्लेखनमेव ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौम्याः शशिकेन्द्रगता भवन्ति चेन्नाशु मृत्युदश्चन्द्रः ॥ 1095

व्या - शिशुमात्राद्यरिष्टयोगादयोऽप्यत्रैव स्मर्तव्याः । पाठसौकर्यार्थमुक्त्वा एते योगाः पद्यान्तमेतल्लिख्यन्ते। [1]पूर्णः कफं तोयभ [2]इत्यनन्तरमेव।

। अक्षिनाशयोगः ।

नेत्रं घ्नन्ति रवीन्दुभौमरविजा रन्ध्रारि[3]वित्तान्त्यगाः ।

। कामवृद्धियोगः ।

[4]शुक्रार्कौ च शुभेक्षितौ मदगतौ [5]कामाप्तिवृद्धिप्रदौ । 1096

। गुह्यरोगयोगः ।

[A]चन्द्रे [6]कर्क्यलिभांशभेऽशुभयुते स्याद्गुह्यरोगो नृणाम् ।

। श्वित्रियोगः ।

श्वित्री स्यादशुभेक्षिते यदि विधौ रोगो [7]ह्यसन्मध्यगे ॥ 1097

। कर्णदन्तनयनहानिचिन्ता ।

[8]दुश्चिक्यलाभसुतधर्मगता विदध्युः

श्रुत्योर्विना[9]शमशुभाः शुभदैरदृष्टाः । 1098

कुर्वन्ति दन्तविकृतिं मदगाश्च पापाः

लग्ने रवौ ग्रहणभे नयनोनितः स्यात् ॥ 1099

। श्वासक्षयप्लीहकविद्रुधिगुल्मकुष्ठयोगाः ।

श्वासक्षय[10]प्लीहकविद्रुधिगुल्मभाजो

मर्त्या शशिन्यशुभमध्यगतेऽस्तगेऽर्के । 1100

[11]कुष्ठी शशिन्यसितभौमयुतेऽपि जातः

1. T पूर्नं°
2. T2 पाठः T अस्फुटम् ।
3. T °चिन्त्यसान्त्यगाः
4. T शुक्रार्काः प शुभ°
5. T2 पाठः T कायाप्ति°
6. T कर्कलि भांशभेऽशुभयुते
7. T2 ह्यनन्म°
8. T दुश्चित्क°
9. T °नाशं शुभः
10. T °प्लीवा° T1 °प्लीहा°
11. T कुष्ठ

A द्र.बृ.जा. चन्द्रे कर्कटवृश्चिकांशकगते पापैर्युते गुह्यरुक् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मीनाजकर्क्यलिमृगेन्द्रमृगांशकस्थे ॥ 1101

। कार्श्यवातभ्रान्त्यादिरोगचिन्ता ।

अन्योऽन्यांशगतौ [1]यदार्कशशिनावन्योऽन्यभे वा स्थितौ
मर्त्याः शोषणकार्श्यरोगसहिताः स्युर्वा तदा रोगिणः । 1102
लग्ने देवगुरौ मदेऽर्कतनये स्याद्वातरोगो नृणां
मन्दे लग्नगते कुजोऽस्तनवमा[2]पत्येषु चेद्भ्रान्तिदः ॥ 1103

। कुष्ठभ्रान्तिपिशाचावेशचिन्ता ।

पापैः पञ्चमगैः वृषालिमृगकर्क्यन्त्यस्थितैः स्यान्नरः
कुष्ठी सार्कयुते व्यये शशिनि चेत्क्षीणे च चित्तभ्रमः । 1104
प्राग्लग्ने फणिसंयुते शशिनि चेज्जाताः पिशाचादिभि-
र्गृह्यन्ते मनुजास्त्रिकोणभवने [3]पापान्विते निश्चयात् ॥ 1105

। विकृतदन्तयोगाः ।

मेषवृषपापलग्ने पापैः दृष्टे भवेद्विकृतदन्तः । 1106
हयवृषपाप[4]क्षेत्रे खलैस्तु लग्नत्रिकोणगे भानौ ॥ 1107

। दुर्बलनेत्रचिन्ता ।

अशुभावलोकितेऽर्के जातो न [5]दृढेक्षणो भवेन्नित्यम् । 1108
पापैः दृष्टे मन्दे त्रिकोणभे निखिलरोगभाग्भवति ॥ 1109

। विकलाङ्गयोगः ।

[6]भौमे यदि विकलाङ्गस्त्रिकोणगे [7]पापखेटसन्दृष्टे । 1110
शुभदृष्टियोगरहिते नियमात्सौम्येक्षिते न नियमेन ॥ 1111

। दासयोगः ।

[8]दासा रवीन्दुगुरुलग्ननवांशनाथा

1. T यद्वा°
2. T °वत्ये°
3. T2 पाठः T °न्विता
4. T °क्षेत्र खलति
5. T1 पाठः T पत्रं भग्नम्
6. T2 भौमो
7. T1 पाठः, T पापखेटैः
8. T1 दाता,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीचारिभांशकगता यदि चेत्प्रसूतौ । 1112
एभिस्त्रिभिश्चतुर्भिरपि गर्भगतास्त्रिभिश्च
द्वाभ्यां क्रमा[1]द्युगपत् पुरुषाः स्त्रियश्च ॥ 1113

। रोगाणां पूर्वकर्मार्जितत्वविधानम् ।

एभिर्योगैः प्रश्नगैर्जन्मगैर्वा रोगा ज्ञेयास्तादृशैर्वक्ष्यमाणैः । 1114
पापैः रोगः पूर्वकर्मार्जितैस्तैर्विज्ञेयाः स्युः पापभेदाः पुराणैः ॥ 1115

। कुष्ठयोगः ।

लग्नार्थाष्टमसंस्थैः कुजाहिसूर्यैर्यदा भवेत्कुष्ठी । 1116
सप्ताष्टमगतैः पापै[2]र्देहे दृश्यो भवेद् व्याधिः ॥ 1117

। कुक्षिरोगचिन्ता ।

पापैः सप्तमसंस्थैर्विषभुक्तिभवश्च कुक्षिरोगः स्यात् । 1118

। पापयुतचन्द्रजन्यव्याधिचिन्ता ।

[A]चन्द्रे पापसमेते षष्ठे यदि शत्रुदोषजो व्याधिः । 1119
गुळिकयुते यदि चन्द्रे षष्ठे नृपवह्निजं [3]भयं भवति ॥ 1120
लग्ने मूढेन्दुबुधौ भ्रान्तिक्षयकामिला[4]ग्निबाधाद्याः । 1121
रोगाः स्युरात्मनो वा [5]युवतेस्सह वानयोस्तदा ब्रूयात् ॥ 1122
बलनाशं क्षयरोगं पिशाचपीडां वदेन्निधनसंस्थे । 1123
चन्द्रे ह्युद्गारं व्ययस्थिते चातिसारमूत्राद्यम् ॥ 1124
लग्नाष्टमत्रिकोणे क्षीणेन्दुः पापसंयुतो यत्र । 1125
नयनक्लेशं भ्रान्तिं क्रूरान् रोगान् करोति मृत्युं वा ॥ 1126

1. T द्युवगत्याः
2. T देहा
3. T भयं न भवति
4. T °ग्निभ्यान्या
5. T1 पाठः T युवति°

A द्र. १०५६. व्याख्या

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। अनिष्टस्थानगतबुधजन्यव्याधिचिन्ता ।

[1]तृतीय[2]षष्ठाष्टम[3]रिष्फगो बुध-
त्रिदोषकोपानपि पाण्डुकामलाः । 1127
करोत्यसाध्यं नयनामयं च
चित्तभ्रमं बन्धुजनाद्यभावान् ॥ 1128

। अनिष्टस्थानगतगुरुजन्यव्याधिचिन्ता ।

गुरुस्त्रिषष्ठान्त्यमृतिस्थितश्चे
द्भवन्त्यनर्थामयगुल्मलाश्च । 1129
जूर्तिप्रमेहान्त्ररुजे द्विजेन्द्र-
शापामरार्थाहरणात्मदोषः ॥ 1130

। अनिष्टस्थानगतशुक्रजन्यव्याधिचिन्ता ।

द्यूना[4]ष्टमगते शुक्रेऽतिसारदुर्नामसम्भवा रोगाः । 1131
अस्थिस्रा[5]वविषूच्यौ [6]शुक्रस्रावो नृणां तु वनितानाम् ॥ 1132
एषु स्थिता नयनार्तिं क्षयं च चित्तव्यथां प्रमेहं च । 1133
[7]अस्थिस्रावविशेषं वदकठसञ्ज्ञां पिशाचपीडां च ॥ 1134

। पापग्रहाद्रोगास्तित्वनिश्चयज्ञानम् ।

लाभतृतीयौ हित्वा परेषु [8]पापाः स्थिता भवन्ति यदा । 1135
[9]देहे रोगास्तित्वं प्रसूचय[A]न्त्यात्मदोषसम्भूतम् ॥ 1136

। राशिवशादवयवभागगतव्याधिचिन्ता ।

ऊर्ध्वमुखेषूर्ध्वाङ्गे तिर्यग्वक्त्रेषु मध्यदेहस्थः । 1137

---

1. T त्रिती°
2. T °षष्टा°
3. T2 पाठः T °रिष्ट°
4. T °ष्टमगे शु°
5. T °वपि°
6. T शुक्रा
7. T2 पाठः। T अस्ति°
8. T पापः स्थिता
9. T हि देहे रोगास्थि°

A T आत्मदोषसम्भूतम् इत्यस्मात्परं ''वाच्यशुभं'' इत्यारभ्य अष्टाविंशपङ्क्तौ ''सर्पोद्भवा नृणां रोगाः ''इत्यन्तं यावत् २८ पङ्क्तयः पुनर्लिखिताः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्वदधोमुखराशिष्वथ [1]ऊर्वोरधो व्याधिरादेश्यः ॥ 1138

। ग्रहवशादवयवविशेषगतव्याधिचिन्ता ।

मूर्ध्नि ललाटे मन्दो मुखे [2]बुध इज्यो गळादिमध्याङ्गे । 1139

ऊर्वोराजानु सितो जङ्घाद्वन्द्वे कुजो ह्यहि[3]श्चरणे ॥ 1140

अङ्गविभागः कैश्चित्प्रकल्प्यतेऽप्येवमन्यथाचार्यैः । 1141

। आरूढराश्यादिनावयवविशेषगतव्याधिचिन्ता ।

[4]प्रष्ट्रारूढं राशिं प्रकल्प्य तच्चेष्टितर्क्षमपि च पुनः । 1142

ताभ्यामनिष्टराशिस्थितैर्ग्रहैस्तत्र रोग आदेश्यः ॥ 1143

। मरणयोगाः ।

[5]निधने मरणकृद[6]शुभः सौम्याः केन्द्रस्थिता न चेद्बलिनः । 1144

उपचयगा मृतिदास्स्युस्सौम्याः केन्द्रस्थिता यदाप्यशुभाः ॥ 1145

[7]चन्द्रान्निधनारिगताः पापाः पापेक्षितो [8]विधुर्मृतिदः । 1146

सौम्याश्शशिकेन्द्रगता भवन्ति चेन्नाशुमृत्युश्चन्द्रः ॥ 1147

पापास्तगो मरणदो मृतिसूत्रयोगा

[A]न्मासात्तदात्मपरेऽस्तगतस्सपापः । 1148

क्षीणश्शशी निधनगोऽप्यशुभान्वितश्चे-

त्पापास्तदा नवमगा मृतिदा भवन्ति ॥ 1149

। शिशुमात्रोर्मरणयोगः ।

पापयुतोऽस्ते हिमगु[9]स्सुखेऽपि वा सौम्यदृष्टियुतिहीनः । 1150

शिशुमात्रोर्मृतिदस्स्यात् प्रसवप्रश्नेऽन्यथा शशिबुधौ ॥ 1151

---

1. T1 पाठः T ऊर्ध्वो
2. T बुधो ज्योग्गलादि° T1 बुधो ज्योर्गळादि°
3. T चरेण
4. T पृष्ठा°
5. T निधन°
6. T °शुभ
7. T चन्द्रानिधरारि°
8. T विधि°
9. T °स्सखेववा for सुखेऽपि वा

A. मासतटात्मपरेस्तस्सजापः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शशिपापौ ससगतौ निधने भौमे तयोर्मृतिर्भवति । 1152
शिशुमात्रोर्यदि न गुरुर्व्योम्नि सुखे वा सितेन्दुजौ वापि ॥ 1153
अस्मिन् योगे सुनार्याः पादच्छिदान्वितं [1]सत्त्वं यदि [2]पश्येत् ॥ 1154
गर्भिण्या मरणं स्यात्प्रसवगेहसंस्थायाः ॥ 1155

। मृतियोगानाह ।

पापयुतो वा [3]लग्ने चन्द्रः पापसंयुतो निधने । 1156
शुभ[4]दृष्टिहीनो वा मरणं निस्संशयं कुरुते ॥ 1157
नवमगतः क्षीणेन्दुर्लग्ने [5]भौमोऽष्टमे व्यये चार्किः । 1158
[6]केन्द्राद्बहि[7]र्गुरुश्चेद्योगे मरणप्रदश्शीघ्रम् ॥ 1159
पापयुतौ चन्द्रार्कौ लग्नगतौ कश्चिदष्टमे [8]पापः । 1160
शुभदृष्टिहीनो वा तदाशु मृत्युप्रदो भवति ॥ 1161
नवमनिधनान्त्यसंस्था रविकुजमन्दाः [9]शुक्रश्शशिलग्ने । 1162
केन्द्रादन्यत्र गुरुर्यदि मृत्युर्निर्दिशेदाशु ॥ 1163
व्ययनिधनार्यनुजस्थास्सौम्या [10]व्याध्यर्थनाशदुःखादीन् । 1164
उन्मादं वा कुर्युर्दशावसानेषु मरणं च ॥ 1165
रोगमृतिदेषु योगेष्वशुभ[11]दशा चेच्च रोगमरणकरी । 1166
शुभदशायां [12]रोगा गुणैश्शमं यान्ति जयन्ति मृत्युमपि ॥ 1167

इति जम्बुनाथविरचिते सव्याख्ये प्रश्नसारसमुद्रे
तृतीयस्तरङ्गः ॥

---

1. T1 सत्त्वमिति ग्रन्थपातः
2. T1 पश्येते
3. T लग्नचन्द्रे
4. T °दृष्टो
5. T भौमे°
6. T2 केन्द्राधहि°
7. T °र्गुरो चे°
8. T वापः
9. T2 पाठः। T तथा T1 क्र for शुक्र°
10. T1 व्यध्यर्थ for व्याध्यर्थ °
11. T °दिशा
12. T रोगगुणैः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ चतुर्थस्तरङ्गः ॥

॥ अथ [1]यात्रादिचिन्ता प्रस्तूयते ॥

। प्रवासप्रश्नज्ञानम् ।

चरराशौ चरत्र्यंशे [2]पक्षित्र्यंशे दिवोदिते । 1168

प्रवासचिन्ता जानीया[3]द्ग्रहे मध्याच्च्युतेऽथ वा ॥ 1169

व्या - अत्र चत्वारो योगाः । त्र्यंशः द्रेक्काणम् । चरनवांशे लग्नभूतेति यात्रा[4]चिन्तेति पञ्चमो योगः । ग्रहो लग्नेश[5]ग्रहस्तत्सुहृद्वेति केचित् । मध्याच्युतत्वं नवमाष्टमसप्तमगतत्वमिति ।

। पक्षिद्रेक्काणाः ।

वृषान्त्यो द्वन्द्वमध्यश्च कर्किसिंहादिमा[6]वपि । 1170

द्रेक्काणाः पक्षिणां प्रोक्ताः प्रायेणैषु हिताहिते ॥ 1171

। यात्राविघ्नसूचकं निमित्तम् ।

गतिं पृष्ट्वा [7]चोपविष्टश्शयानो वा न गच्छति । 1172

पदं पदा सङ्कुचन्वाश्लेषयन्विघ्नमाप्नुयात् ॥ 1173

। प्रवाससूचकं निमित्तम् ।

तिष्ठेद्गच्छेच्च वा पृष्ट्वा गमिष्यति न संशयः । 1174

॥ यातुश्शुभाशुभमुच्यते ॥

[A]यातुर्मध्या[8]त्प्रवासं कथयति नवमादध्वनः पूर्वमर्धं

रन्ध्रादन्त्यं निवृत्तिं मदनगृहवशा[9]द्वेश्मयानोन्मुखस्य । 1175

मार्गं षष्ठात्मजाभ्यां निजनिलयगतिं वेश्मराशेर्विलग्ना-

---

1. T1 यात्राचिन्ता
2. T1 पक्ष°
3. T °द्गृहे T1 °द्गृच्युते for °द्ग्रहे मध्याच्युते
4. T1 °चिति for °चिन्तेति
5. T1 °ग्रहसत्सु°
6. T °चपि
7. T2 पाठः T °तपविष्ट°
8. T1 प्रवापं
9. T1 °द्वेशयानं

A द्र.प्र.अ.प्र. १९-१.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दारोग्यायुश्शशाङ्कादपि निखिलमिदं [1]खेटयोगेक्षणाद्यैः ॥ 1176

व्या - अस्यार्थः - नवमराशौ शुभाश्चेत् प्रवासकाले शुभम्, अष्टमे चेत् गन्तव्यदेशप्राप्तिकाले, सप्तमे [2]चेत्प्रत्यन्तकाले स्वगृहजिगमिषोश्शुभं भवति। तत्र, स्थाने शुभाशशत्रुगताश्चेच्छत्रु सकाशादर्थप्राप्तिः । नीचस्थान्नीचजनेभ्यः सम्पत् । अत्र गुरुश्चेत् ब्राह्मण[3]सकाशात्, शुक्रश्चेत्स्त्रीसकाशात्, [4]पूर्णचन्द्रश्चेद्राजमहिषीसकाशादर्थाप्तिः । [5]बुधो वणिजः । एषु राशिष्वशुभाश्चेदशुभम्। तत्र रविः स्थितश्चेद्राजनिमित्त उपद्रवः, कुजश्चेत् चोर[6]निमित्तः, सर्पशनिभ्यां व्याधिनिमित्तः । अस्मिन्नधिकारे आरूढं न चिन्त्यम् । किन्तूदय राशेर्नवमाष्टमसप्तमस्थैरुदयस्थैश्च शुभाशुभचिन्ता। रवौ नवमस्थे राजपुरुषसहायवानायाति।

। प्रोषितस्य शीघ्रागमनचिन्ता ।

[A]राज्ञा वा तद्भटैर्वापि रथो [7]रन्ध्रे तु वारितः । 1177

व्या - पथि इति शेषः ।

प्रोषितः शीघ्रमायाति [8]लग्नेऽस्ते वा रवौ स्थिते ॥ 1178

व्या - अत्र किञ्चिद्भयं क्लेशं च वदेत्।

। प्रोषितपृच्छायां सप्तमाष्टमनवमगतपापग्रहफलम् ।

[9]क्षीणेन्दौ त्रिष्वपि गते भयं क्लेशादिकं वदेत् । 1179

मन्दराहू त्रिषु गतौ [10]रोगदौ प्रोषितस्य च ॥ 1180

---

1. T खेल° T1 शेल°
2. T1 प्रत्युत°
3. T1 °संकाशात्
4. T पूर्न°
5. T बुध
6. T1 °निमित्तः इत्यनन्तरं पथि प्रोषितशीघ्र इति विलिख्य, तदुपरि सूक्ष्मरेखा कृता वर्तते । तया च तत्पदद्वयस्य निष्कासनं तस्याभिप्रेतमिति भाति । किन्तु निष्कासितं तत्पदद्वयम् इत एवाग्रे पञ्चमपङ्क्तौ स्थापितं दृश्यते ।
7. T रन्ध्रके
8. T लग्नस्थे
9. T1 क्षीणेन्द्वौ
10. T रोगतौ T1 रोगता

A T राज्ञा वा तद्भटैर्वापि रथो रन्ध्रके वारितः पथि । अत्र रथो इति पदस्य निष्कासनात्, पथि इति पदस्य व्याख्यापदत्वेन ग्रहणाद्वा सङ्गतिर्भवतीति मन्ये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]वाणिज्याद्द्रव्यहानिस्स्याद्धर्मसंस्थेऽत्र भूमिजे । 1181
पथि दुर्जनसंरोधश्चोरपीडाष्टमे कुजे ॥ 1182
[2]लग्नेऽस्ते वापि सूर्यादौ रोगं भौमे तथा वदेत् ॥ 1183

व्या - एवं [A3]षष्ठपञ्चमचतुर्थगतैर्ग्रहैः [4]निवृत्तिमार्ग[5]गृह[6]प्राप्त्यादौ शुभाशुभं चिन्त्यम् ।

। प्रोषितागमनज्ञानम् ।

लग्नेशो वा स्वतुङ्गादिगतो वा सप्तमे यदि । 1184
प्रोषिता[7]गमनं वाच्यं केन्द्रसंस्थे च वाक्पतौ ॥ 1185

व्या - [8]गुरौ केन्द्रस्थिते योगद्वयम् । शेषं गुरुस्सप्तमे चेति निःसंशयमागमनमिति ।

। प्रोषितागमनयोगः ।

षष्ठेऽष्टमे वा चन्द्रे स्याच्छु[9]क्रेऽन्त्ये सप्तमेऽपि वा । 1186
लग्नेशेन युतेऽस्तेशे दृष्टे वाच्यागमो भवेत् ॥ 1187
व्यये [10]गुरौ वा चन्द्रे वा झटित्यागमनं परे । 1188

व्या - वदन्तीति शेषः ।

। प्रोषितस्य वार्ताश्रवणप्रत्यागमनयोगद्वयम् ।

दुर्बलेषूक्त[11]खेटेषु वार्तामात्रश्रुतिर्भवेत् ॥ 1189
यः कश्चित् सप्तमे वक्री प्रोषितस्य निवृत्तिदः । 1190
लग्नेशोऽन्यत्रापि - वक्री केन्द्रे जीवे च निश्चयात् ॥ 1191

1. T2 पाठः T वणिजद्रव्यः°
2. T लग्नस्थे वा सूर्यादिरोगं
3. T °ष्ठाष्टम for षष्ठपञ्चम°
4. T निवृत्ता
5. T ग्रह°
6. T प्राप्यादौ
7. T °गमनं व्यं वाच्यं
8. T गुरोः केन्द्रसंस्थे च वाक्पतौ । गुरोः केन्द्रस्थितिः इत्यधिकः पाठः
9. T2 शुक्रेन्ये
10. T गुरुणा
11. T खेटेम वाता, T1 खेटे महता

A अत्र षष्ठपञ्चम °इति योग्यं स्यादिति भाति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अन्यत्रापि ससमादन्यत्रापि लग्नेशे वक्रित्वे च निवृत्तिकृदित्यर्थः। अत्र योगद्वयेऽपि जीवे केन्द्रस्थिते निस्संशयमागमं वदेदिति।

। प्रोषितागमनदिनज्ञानम् ।

उद्यन्नक्षत्रमायाति यावद्भि[1]र्लग्नपो दिनैः। 1192

तावद्भिरागम[2]स्त्र्यंशैर्दिवसा द्वित्रिसंगुणाः॥ 1193

व्या - त्र्यंशैः - द्रेक्काणैः। अयम[3]र्थः लग्नस्य प्रथमद्रेक्काणोदये तावद्भिर्दिवसैः, द्वितीयत्र्यंशोदये द्विसंगुणैर्दिनैः, अन्त्यद्रेक्काणोदये त्रिसंगुणैर्दिवसैरित्याहुः। प्रोषितदिगधिपग्रहावस्थितनक्षत्रादुद्यन्नक्षत्रं यावत्, तावद्भिरिति मतान्तरम्। प्रोषितो ग्रहदिशि वा, राश्युक्तदिशि वा प्रयातः स्यात्। अत्र पृथुयशाः -

।सुदूरगतस्याप्यागमनादिचिन्ता।

[A]दूरगतस्यागमनं सुतधनसहज[4]स्थितैर्ग्रहैर्लग्नात्। 1194

सौम्यैर्नष्टप्राप्तिर्लब्ध्वागमनं गुरु सिताभ्याम्॥ 1195

। प्रोषितागमनज्ञानम् ।

[B]जामित्रे त्वथवा [5]षष्ठे ग्रहः केन्द्रे च वाक्पतिः। 1196

प्रोषितागमनं विद्यात् [6]त्रिकोणे ज्ञे सितेऽपि वा॥ 1197

व्या - अत्र योगे [C]चन्द्रकेन्द्रस्थिते सतीति केचित्। [7]केन्द्रे चन्द्रपापाश्शुभ[D]दृष्टाः [8]स्वोच्चादिगा [9]वा यदि तदाप्यागमनमस्ति।

---

1. T2 पाठः T लग्नवो
2. T °त्र्यंशे दिवसा
3. T °र्धः for अर्थः
4. T स्थिते ग्रहै°
5. T °ष्ठो
6. T त्रिकोणजसिते T1 त्रिकोणजनिते
7. T केन्द्र°
8. T सोच्चा°
9. T पा

A द्र.ष.प. ५.१

B द्र.प्र.अ.प. १९.२

C अत्र चन्द्रे केन्द्रस्थिते इति कृतेऽपि साधुरिति भाति।

D T ३८.२ पङ्क्तिगतात् स्वोच्चा दिगा पा यदि' इत्यारभ्य T 40-7 पङ्क्तौ ''लग्नेक्षणादियामे'' इति यावत् यत् लिखितं तदेव पुनः T40A7 पङ्क्तितः T42A6 पर्यन्तं लिखितम्। अतो मया उभयं परिशील्य शुद्धः पाठः उद्धृतः। तन्मया पाठभेदलेखनस्थले एकत्रान्यत्रपदाभ्यामग्रे सूचयिष्यते। T1 मातृकायामपि एवमेव। ताडपत्रात्मकस्य मूलमातृकाग्रन्थस्य पृष्ठपङ्क्तिसंख्या लिखिता।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्रोषितागमनादिचिन्ता ।

लग्नाज्ञे द्वे शुभैर्युक्ते दृष्टे वा प्रोषितागमः । 1198

सक्रूरे दशमे कार्यनाशस्तत्सिद्धिरन्यथा ॥ 1199

व्या - प्रोषितागमस्सप्रयोजन इत्यर्थः । अन्यथा सशुभे दशमे, तत्सिद्धिः कार्यसिद्धिरित्यर्थ । लग्नेश[1]स्तन्मित्रं वा ग्रहः कश्चित्ससमस्थश्चेत् [2]गृहं गन्तुमारब्धवान् । षष्ठस्थस्स चेत् पथि गतः । पञ्चमे स चेत् [3]गृहसमीपं गतः । [4]चतुर्थे चेत् गृहं प्राप्तः । लग्नेशस्य [5]शीघ्रमन्दाद्या या गति[6]स्तदनुरूपं प्रोषितस्यापि गतिं वदेत् प्रतिदिनमिति ।

। प्रोषितमरणज्ञानम् ।

[A7]स्त्र्यर्तुधर्मादिगाः क्रूराः क्रूरर्क्षे क्रूरवीक्षिताः । 1200

लग्ने पृष्ठोदये यदि स्यात्प्रोषितमरणं शुभादृष्टे ॥ 1201

शुभवीक्षणसद्भावे क्रूराणां व्याधिरेव निर्देश्यः । 1202

। प्रोषितमरणदेशचिन्ता ।

धर्मे क्रूरे यानकाले द्यूने प्राप्तव्यदेशगः । 1203

षष्ठे निवृत्तः पथिगो [8]मृतः स्वासन्नगः सुते ॥ 1204

व्या - स्वदेशासन्नगत इत्यर्थः ।

---

1. T2 पाठः, T °स्तमित्रं
2. T ''ग्रह''

[T मूल मातृकायां 1199 आरभ्य 1283 पर्यन्तं लिखितस्यैव पुनर्लेखनं दृश्यते । तत्र लब्धः पाठभेदः एकत्र अन्यत्र इति पदेन सूच्यतेः ।]

3. T एकत्र ग्रहसमीपं
4. T एकत्र चतुर्थश्चेत् ग्रहं
5. T शीघ्रं
6. T एकत्र °स्तदन्वरूपं
7. T एकत्र स्त्रीद्युन् धर्मादिगाः, अन्यत्र स्त्रीर्तु धर्मालिंगाः T1 स्त्रीद्यक् धर्मादिगाः
8. T अन्यत्र मृत ह्वसन्तगाः

A द्र.कृ १४.८ षष्ठत्रिकोणयोर्वा जामित्रे वारिवीक्षिताः क्रूराः । पृष्ठोदये विलग्ने प्रोषितमरणं शुभादृष्टे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्रोषितमरणचिन्ता ।

युद्धे पराजितः कश्चिद्यदि स्याद्येनकेनचित् । 1205
[1]सौम्यादृष्टो द्यूनभे वा [2]मृत्युभे वा यदा विशेत् ॥ 1206
ब्रूयान्मृतिं प्रोषितस्य [3]तत्काले पूर्वदेशतः । 1207

। प्रोषितबन्धनचिन्ता ।

षष्ठराशिमनुप्रासे [4]जामित्राद्वक्रचारतः ॥ 1208
[5]यथास्वं षष्ठगे वापि पापशत्रुनिरीक्षिते । 1209
पृष्ठोदये पापयुक्ते बन्धोऽस्तीत्यादिशेत्तदा ॥ 1210
दृष्टग्रहेऽशुभखगे पापत्वं चेत्सुहृद्गृहे । 1211
बन्धः [A]परिभूतश्च [6]स्याद्वदेदेवं प्रवासने ॥ 1212

। पद्भ्यां यानादिना वा प्रोषितागमनचिन्ता ।

द्विपाद्राशावुदयगे [7]ससहायश्चतुष्पदे । 1213
[8]चतुष्पदग [B]आयाति शुष्कखेटे तु शुष्कगे ॥ 1214
[9]पद्भ्यामायाति [10]जलभे [11]जलखेटे च [12]नावगः । 1215

---

1. T1 सोमादृष्टा
2. T अन्यत्र मृत्युभे या
3. T अन्यत्र ततः काले
4. T कामित्रा°
5. T1 पाठः T एकत्र यथात्वं, अन्यत्र यथान्वं
6. T अन्यत्र स्यात् देदेवं T1 स्यादेदेवं
7. T सहसाय° T1 सहय° for ससहाय°
8. T1 चतुष्पदेन
9. T1 पद्या°
10. T1 शलभे
11. T अन्यत्र जलघटे
12. T नापटगः

A अत्र ''परिहृतः'' इति उचितं भाति।
BT1 आयादिति। अत्र दिवर्णस्योपरि सूक्ष्मरेखाकृता। सा अक्षरनिष्कासनाभिप्रायेण कृतेति भाति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पक्षिग्रहे पक्षिराशावुदये [1]शकटादिगः ॥ 1216

व्या - इष्टभावादर्थ[2]स्थानेत्यादिकारकलक्षणमत्रापि द्रष्टव्यम्। निवृत्तिप्रश्ने ससमं, प्रवासे दशमं, गृहप्रवेशे चतुर्थमित्यादि।

। यातुः सुखागमनचिन्ता ।

[A]अष्टमस्थे [3]निशानाथे [4]कण्टकैः [5]पापवर्जितैः । 1217

[6]प्रवासी सुखमायाति [7]सौम्यैर्लाभसमन्वि[8]तैः ॥ 1218

। यातुः सेनायाश्च शीघ्रागमनचिन्ता ।

[B]द्वितीये वा तृतीये वा गुरुशुक्रौ यदा तदा । 1219

आश्वेवागच्छति चमूः प्रवासी वा न संशयः ॥ 1220

। प्रोषितागमनज्ञानम् ।

[C9]प्रासे ग्रहेऽस्तराशौ यदि [10]पृच्छेत्प्रोषितागमं कश्चित् । 1221

जीवे चतुष्टयस्थे प्रोषितविनिवृत्तिरादेश्या ॥ 1222

। कृतार्थप्रोषितामगनज्ञानम् ।

[D11]मेषूरणोदयौ द्वौ सौम्यग्रहवीक्षितौ यदि स्याताम् । 1223

---

1. T शटगादिगः T1 शविगदिगः
2. T अन्यत्र °स्थानेऽत्रापि° T1 एकत्र °स्थावेत्यादि° T1 अन्यत्र °स्थावेऽत्रापि
3. T1 निशासाथे
4. T1 पाठः T कटकः
5. T1 पापसंजतैः T पापसंजकैः
6. T1 प्रवाससुख°
7. T सु° for सौ
8. T °तः for तैः
9. T1 प्रासं
10. T1 पृच्छतो°
11. T मेषूरदयौ T2 मेषूरहृदयौ

A द्र.ष.प ५.३ पापवर्जितैः तथा प्र.अ.प १९.३

B द्र.प्र.अ.प १९.४

C द्र.प्र.अ.प १९.५

D द्र.प्र.अ.प १९.६-१३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवति तदाप्यागमनं प्रोषितनॄणां कृतार्थानाम् ॥ 1224

व्या - "[A]शुक्रेन्दुजौ त्रिकोण इत्याद्युक्तम्" "[B]गृहं प्रविष्टो हिबुके प्रवासीति" "चतुर्थास्तमयान्तरगे [1]ग्रहे पथि वर्तते" इति ।

हिबुकं ग्रहे प्रविष्टे गृहं प्रविष्टं प्रवासितं [विद्यात् । 1225

हिबुकास्तमयोरन्तरगे ग्रहे तु पथि वर्तते पुरुषः] । 1226

। प्रोषितस्य मरणज्ञानम् ।

[2]लग्नत्रिकोणयोर्वा जामित्रे वारिवीक्षिताः क्रूराः । 1227

पृष्ठोदये विलग्ने [3]प्रोषितमरणं [4]शुभादृष्टे ॥ 1228

। प्रोषितस्य वधबन्धादिचिन्ता ।

पृष्ठोदये [5]पापनिरीक्षिते वा पापास्तृतीये रिपुकेन्द्रगा वा । 1229

[6]सौम्यैरदृष्टा वधबन्धदास्स्युर्नष्टा [7]विनष्टा मुषितास्तु वा स्युः ॥ 1230

। प्रोषितस्य रोगमरणादिचिन्ता ।

मन्दः पापसमेतो लग्नान्नवमे शुभैरयुतदृष्टः । 1231

[8]रोगार्तः परदेशे [9]वाष्टमगो मृत्युकर एव ॥ 1232

। प्रोषितमरणचिन्ता ।

[10]ग्रहो ग्रहेणाभिहतो यद्यस्तमुपगच्छति । 1233

---

1. T गृहे
2. T लग्ने
3. T2 पाठः T प्रोषितः मरणं
4. T2 शुभाद्यदृष्टे
5. T एकत्र- निरीक्षिते पापस्तृतीये रिपुकेन्द्रगे T अन्यत्र - निरीक्षिते वस्तृतीये रिपुकेन्द्रगे T1 निरीक्षिते वपस्मृतीये रिपुकेन्द्रेरेव
6. T एकत्र- सौम्येन दृष्टा वधबन्धदाः T1 तथा T अन्यत्र- सौम्येन दृष्टा वा बन्धदाः
7. T1 विनष्टा इति ग्रन्थपातः
8. T रोगार्थः
9. T अन्यत्र चाष्टमगो for वाष्टमगो
10. T1 ग्रहो इति ग्रन्थपातः

A द्र.प्र.अ.प. शुक्रेन्दुजौ त्रिकोणे चन्द्रः केन्द्रे शुभेक्षिताः क्रूराः । मित्रक्षेत्रगता वा भवेयुरशुभेक्षणोपेताः।
B अपूर्णः श्लोकः अधस्तनकंसंचिह्नगतवाक्येन पूरणीयः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सौम्यैरदृष्टस्त[1]त्काले प्रोषितं मृतमादिशेत् ॥ 1234

। प्रोषितबन्धनचिन्ता ।

जामित्रेऽ[2]स्तं गते पापे तथा शत्रु[3]निरीक्षिते । 1235
पृष्ठोदयेऽपि [4]लग्नर्क्षे बन्धोऽस्तीत्यचिराद्वदेत् ॥ 1236

। प्रोषितबन्धनयोगः ।

सौरस्य द्रेक्काणे भुजङ्गपरिवेष्टितेऽथवा लग्ने । 1237
शशिसौराभ्यां दृष्टे बन्धनमिति निर्दिशेन्मतिमान् ॥ 1238

व्या - 'यद्धनसुतधर्मगैरिति' ।

। प्रोषितप्रत्यागमनदिनज्ञानम् ।

[A5]ग्रहो विलग्ना[6]द्यतमे [7]गृहे तु तेनाहता द्वादशराशयः स्युः । 1239
तावद्दिनान्यागमनस्य विद्यान्निवर्तनं वक्रगतैर्ग्रहैस्तु ॥ 1240

व्या - चरादिभिस्तत्र [8]विशेष ऊह्यः ।

[B]चरांशस्थे ग्रहे तस्मिन् कालमेवं विनिर्दिशेत् । 1241
त्रिगुणं स्थिरभांशस्थे द्विगुणं [9]द्व्यात्मभांशगे ॥ 1242

। मतान्तरेण प्रोषितागमनकालज्ञानम् ।

[C]यातुर्विलग्ना[10]ज्जामित्रभवनाधिपतिर्यदा । 1243
करोति वक्रमावृत्ति[11]कालन्तं ब्रुवतेऽपरे ॥ 1244

---

1. T तथा T1 अन्यत्र सत्काले
2. T अस्तगते
3. T1 °निक्षिते for °निरीक्षिते
4. T1 ग्रर्क्षे for लग्नर्क्षे
5. T अन्यत्र ग्रहे
6. T अन्यत्र °यतिमे
7. T अन्यत्र ग्रहे
8. T अन्यत्र विशेष्य ऊह्याः
9. T द्यात्म°
10. T1 ज्ञामित्र°
11. T कालमन्तं for °कालन्तं

A अयं श्लोकः ष.प ५.५ तथा प्र.अ.प १९.१६ एवं उभयत्रापि दृश्यते किन्तु निवर्तनं वक्रगतैर्ग्रहैस्तु'' इति ष.प. चतुर्थः पादः । चरादिभिस्तत्र विशेष ऊह्यः इति प्र.अ.प. चतुर्थः पादः । द्वयमप्यत्र लिखितम् ।
B अत्र त्रिगुणं द्विगुणम् इति पठनं प्र.अ.प १९.१७ समानम्
C द्र.प्र.अ.प १९.१८ तथा ष.प. २३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। शत्रोरागमनकालचिन्ता ।

[A1]उदयर्क्षाच्चन्द्रर्क्षं भवति च याव[2]द्दिनैश्च तावद्भिः । 1245

आगमनं स्याच्छत्रोः नागमनं मध्यगो ग्रहः कश्चित् ॥ 1246

। ग्रहभुक्तांशकवशात् यातुरागमनकालज्ञानम् ।

क्षणदिवसपक्षमासर्त्व[3]यनाब्दानां नवांशकैर्वाच्यम् । 1247

शशिभौम[4]शुक्रसुरगुरुबुध[5]रविसौरैः क्रमाद्भुक्तैः ॥ 1248

व्या - 'पितुर्जात' इत्यनेनापि प्रोषितागमनं सूच्यते । तद्यथा- अत्र दिवाकरशब्दः [6]फलदग्रहविषयो लग्नेशविषयो [7]वा । तस्मिंश्चरराशौ स्थिते विदेशे वर्तते । चरात्मके [8]द्रेक्काणे नवांशके वा तस्मिन् ग्रहे मध्यात् - दशमात्, [9]भ्रष्टे दशमात् उत्क्रमेण आसप्तस्थिते, विदेशगतः प्रोषित इति वाच्यम् ।

तथा च कृष्णीये -

। यात्राप्रश्नज्ञानम् ।

[B]चरराशौ च विलग्ने द्रेक्काणे वा चरात्मकेऽभ्युदिते । 1249

मध्यात् च्युते ग्रहे वा प्रवासचिन्तां विजानीयात् ॥ इति । 1250

व्या - मध्यात् भ्रष्ट इत्यनेनोहप्रकारः [10]सूचितः । कथमुच्यते? मध्यलग्नादारभ्य व्युत्क्रमेण [11]पाताळलग्नं, तच्चक्रार्धभागो विदेश इति । अपरार्धभागः स्वदेशः । ततो मध्याद्भ्रष्टो विदेशगत इत्युक्तम् । सप्तमस्थे परमविप्रकर्षाद्ग[12]न्तव्यदेशस्थ इत्यूह्यम् । ततः पाताळलग्नान्तरस्थे

1. T एकत्र उदयर्क्षा च T1 उदयार्क्षं भवति for उदयर्क्षाच्चन्द्रर्क्षं भवति
2. T °दिनानि
3. T °यनांशब्दा°
4. T1 °मिक्र° for °शुक्र°
5. T1 रविसौरैः क्रमाद्भुक्तैः इति ग्रन्थपातः
6. T1 फलवग्रह°
7. T1 वा इति ग्रन्थपातः
8. T °केन्द्रेक्काणे
9. T भृष्टे
10. T1 सूचितः -- °दारभ्य इत्यत्र मध्ये ग्रन्थपातः
11. T1 पाताललग्नान्तं च, T1 अन्यत्र - पाताललग्नान्तरं च क्रान्तर्धभागोऽपि देशः इति ।
12. T1 गतं विदेशस्थ

A द्र.प्र.अ.प १९.१९ B द्र.कृ. १४.१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विदेशात् स्वदेशं प्रति निवृत्तः। ग्रहस्तावद्वक्रगात्या पश्चिमाभिमुख इव [1]दृश्यते। तस्मान्मध्यात् [2]भ्रष्टे विदेशगत इत्युपपन्नम्। पुनस्सप्तमराशे[3]श्चतुर्थराश्यभिमुख इव दृश्यते। लम्बमान इत्यनेन चतुर्थराशिगते [4]गृहगत इत्युपपन्नम्। उदयस्थेऽपि वेति, उदयसप्तमराश्योर्मन्द [5]कुजयोरपि प्रवासी विदेश[6]स्थ एव। न तदानीमागच्छतीत्यादि। शशाङ्कसुतशुक्रयोः क्षपानाथे च उदयास्तमयोस्सत्सु वान्त इति विदेशस्थः। [7]स्थितदेशात् स्वदेशं प्रति निर्गत इत्यर्थः। क्षपानाथ [8]शशाङ्कसुतशुक्राणां सूर्याच्छीघ्रगतित्वादिति।

॥ इति यात्रा ॥

॥ अथाभ्य[9]वहृतापन्नगुणदोषोक्तिः ॥

। मृष्टान्नभोजनादि चिन्ता ।

[A]लग्ने शुभे सौम्यराशौ शुभे वाप्यन्नकारके । 1251

[10]मृष्टता भोजनस्योक्ता [11]विपरीते त्वमृष्टता ॥ 1252

। राशेर्ग्रहाच्च भोज्यवस्तुचिन्ता ।

युग्मे जलर्क्षे [12]सस्नेहं सार्द्रं [13]स्यादन्यदन्यथा । 1253

[B]सजलस्थि[14]तयोरर्कभौमयो[15]र्व्यञ्जनैर्युतम् ॥ 1254

भौमार्कयो[16]श्शुष्कगयोश्शुष्कमुष्णं च भोजनम् । 1255

सजलस्थितमन्दाह्यो[17]श्शीतं सव्यञ्जनं च तत् ॥ 1256

[C]सितेन्द्वोस्सद्रवं सार्द्रं [18]ज्ञेड्ययोः स्नेहसंयुतम् । 1257

1. T1 दृश्यते स्मिन्नद्याद्भ्रपिदेशगत
2. T त्रष्टे
3. T1 चतुराश्य°
4. T ग्रह°
5. T1 °तज° for °कुज°
6. T विदेशस्स
7. T1 तदेश° for स्थितदेश°
8. T1 शशान्त°
9. T1 वह्यता
10. T1 मृष्टाता T2 मृटता
11. T1 विपरीतत्वे दृष्टता T अन्यत्र- विपरीते त्वदृष्टता T1 अन्यत्र- विपरीते त्वमृष्टता
12. T अन्यत्र स्वस्नेहं
13. T1 स्यादन्यथा
14. T अन्यत्र °स्थितयोर्क°
15. T1 व्यञ्जनैर्युतं, भौमार्कयोः इति ग्रन्थपातः।
16. T °शुक्र°
17. T1 °स्थितं ग्रञ्जनं च तत्
18. T ज्येड्ययो

A द्र.कृ. १६.३ तथा द्र.प्र.र ४१३-४१४ B द्र.कृ. १६.४

C द्र.कृ. १६.५, सर्द्रवमनुष्णं इत्येतत् सद्रवं सार्द्रं इत्यस्य स्थाने मन्ये। तथा द्र.प्र.र ४१५-४१८,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तयोः शुष्कस्थयोः शुष्कं निस्नेहं [1]व्यञ्जनैर्युतम् ॥ 1258

। सूर्यादिग्रहान्मांसचिन्ता ।

[A]मृगमांसं भौमरव्योः [2]कुळीरं शशिनः स्मृतम् । 1259
गुरो[B]राज[3]द्विपाश्वोत्थं शनेर्वाराहमाहिषम् ॥ 1260
बुधस्य पक्षिमांसं स्यान्माहिषं च भृगोर्वदेत् । 1261
[4]पापग्रहोदये तस्य कारकत्वेऽपि वा वदेत् ॥ 1262

। यवागूयुक्ताद्यन्नभोजनचिन्ता ।

[C5]यवागूं शुभसम्बन्धादन्नमाहुर्मनीषिणः । 1263
[6]सप्तमस्थेन शशिना यवागूं जलमादिशेत् ॥ 1264
[D]जलराशिगतज्ञेन [7]दृष्टे सम्भारसम्भृतम् । 1265

। सेकद्रव्यचिन्ता ।

गुरुदृष्टे घृतयुतं नवनीतं भृगोः दृशा ॥ 1266
जलस्थपापदृष्टौ तु तैलयुक्तं तु [8]भोजनम् । 1267
[E9]आज्यं च [10]सेकद्रव्यं स्यान्मेषे भौमेऽथवोदिते ॥ 1268
माहिषं मन्दभे मन्दे शुक्रे गव्यं वृषेऽथवा । 1269
शेषाणामाश्रयप्रोक्तं चतुष्पात्सेक ऊह्यताम् ॥ 1270

---

1. T व्यञ्जनोदृतम् , अन्यत्र व्यञ्जनोजृतम् T1 व्यञ्जनोज्रितम् अन्यत्र व्यञ्जनोधृतम्
2. T अन्यत्र गुळीरं
3. T1 द्विपाश्वोर्ध्वं, द्र.व्याख्या ।
4. T1 इयं पङ्क्तिर्नास्ति
5. T1 यवागुं अन्यत्र यवागों
6. T अन्यत्र सप्तमस्थे शनिना T1 सप्तमस्थेन शनिना
7. T पृष्टे
8. T अन्यत्र भाजनम्
9. T व्याख्यायाम् आजं इति पदं दृश्यते
10. T अन्यत्र ''नेकद्रव्यं स्यान्मषभामेधवोदिते

A द्र.कृ. १६.६-७, तथा द्र.प्र.र ४१९-४२१
B अत्र अज-द्विप- अश्व इति छेदः
C द्र.कृ. १६.९
D द्र.प्र.र ४२३-४२७
E द्र.कृ. १६.१०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। ग्रहात् भोज्यवस्तुचिन्ता ।

[A]कुजेऽस्ते मांस[1]सेकं स्याच्छुक्रे क्षीरादिसेचनम् । 1271
पानकं हरितं सौम्ये परान्नं साम्लमर्कजे ॥ 1272
अथवान्नं पुराणं स्यात्पथि प्रेतादिदर्शनम् । 1273
[B2]काष्ठशाकादि सूर्ये स्यात् स्त्रीलाभं जातमादिशेत् ॥ 1274

। ग्रहदृष्टिविशेषान्मांसविशेषचिन्ता ।

[3]मांसादव्याघ्रजातीनां मांसं क्रूरेक्षणे वदेत् । 1275
[4]तृणधान्यादमेषादिमांसं जीवेक्षणे वदेत् ॥ 1276
जलस्थमत्स्यकौळीरमांसादीन्द्वीक्षणे वदेत् । 1277
[C]शुक्रदृष्टौ तृणामांसं शुभर्क्षज्ञेक्षणे [5]भवेत् ॥ 1278
[D6]इतरस्थबुधदृष्ट्या क्रूरव[7]त्फलमूह्यताम् । 1279

। भोजनसमयसहभोक्तृपात्रादिचिन्ता ।

[E8]सहभोक्तृवेलादिजात्याकृत्यादिकं वदेत् ॥ 1280
पूर्वोक्त[9]भाजनान्यत्र वक्तव्यानि ग्रहैस्सदा । 1281
पितृपक्षौ भौम[10]यमावित्युक्ताः सहभोजकाः ॥ 1282
लग्ने[11]क्षणादियामे तु भुक्ति[12]कालोक्तिरूह्यताम् । 1283

---

1. T अन्यत्र सेकस्स्यात्
2. T काष्ठकाशादि T1 काष्ठकारादि
3. T अन्यत्र मांसदं°
4. T अन्यत्र तृणधान्यद°
5. T अन्यत्र च्छवत्
6. T उदरस्थ°
7. T अन्यत्र °पलं
8. T सहभुक्ते
9. T °भोजन°
10. T1 °यामादित्युक्ता
11. T अन्यत्र लग्नेक्षकादि°
12. T °कालोक्तिरिति द्विवारं लिखितम्

A द्र.कृ. १६-११-१२
B द्र.प्र.र ४३१-४३२
C द्र.प्र.र ४३३
D द्र.प्र.र ४३४
E द्र.कृ १६.१४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। लग्नराशिवशात् भोज्यवस्तुचिन्ता ।

[A]मेषोदयेऽन्नं शाकाढ्यं वृषे [1]गव्ययुतं वदेत् । 1284
मांसाद्यं सिंहयु[2]क्चापैः [B3]स्निग्धं स्त्रीघटतौलिषु ॥ 1285
नक्राळिकर्किमीनेषु पलाढ्यं भोजनं वदेत् । 1286

। लग्नगतग्रहवशात् भोजनचिन्ता ।

लग्नेऽर्काद्ये युते दृष्टे क्रमाद्भोजनमुच्यते । 1287
कटुकक्षारतिक्ताढ्यं [C]कन्दमूलं समुद्गयुक् ॥ 1288
कदुष्णमन्नं सक्षौद्रमुपदंशास्तु भक्षिताः । 1289
[D]पायसं सूपमाषाज्यं [4]क्षौद्रापूपपयोयुतम् ॥ 1290
सतैलं कोद्रवाद्यन्नं राहोः केतोश्च [5]माषकम् । 1291

। ओजसमराशिवशात् तृष्णादिचिन्ता ।

ओजोदये महातृष्णा मन्दतृष्णा समोदये । 1292
[E]पापैः दृष्टे पुराणान्नं क्षुधापीडाल्पभोजनम् ॥ 1293

। ग्रहाद्भोज्यपदार्थचिन्ता ।

अर्कारौ [6]मांसभोक्तारावुशनश्चन्द्रभोगिनः । 1294
नवनीतदधिक्षीरघृतयुग्भोजनप्रदाः ॥ 1295

। सतैलादिभोजनचिन्ता ।

[F]जलराशिषु पापेषु ससौम्येष्वितरेषु च । 1296

---

1. T1 गव्ययुक्तं तं for गव्ययुतं
2. T °कृपापैः
3. T स्त्रिग्धं स्त्रीघ्नटि°
4. T क्षौद्रासूप°
5. T मूषकम्
6. T भोक्तारौ प्रशन°

A द्र. प्रश्नायनम् १२.२७-२८ तथा द्र.प्र.मा .... (अत्र ज्ञानप्रदीपिका) २७.३६-३७-३८
B स्निग्धमिति पाठः प्रश्नायनमतेन साधु भवति
C T तथा T1 मातृकाद्वयेऽपि कन्द समुद्गयुक् । मध्येऽत्र स्थानं रिक्तम् ।
D द्र. प्रश्नायनम् १२.२९ क्षौद्रा इति दीर्घान्तं पदं दृष्ट्वा सूपस्थाने अपूपपदं प्रश्नायनवचनात् स्वीकृतम् ।
E द्र.प्र.ज्ञा. प्र १६-१०
F द्र.प्र.ज्ञा. प्र १६-११

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सतैलं भोजनं ब्रूयात् मूलवर्गेण शाककम् ॥ 1297
अर्कारबुधमन्दाहियुक्ते राशौ जलात्मके । 1298
आरूढे वाथवा लग्ने सतैलं भोजनं वदेत् ॥ 1299

। आज्यनवनीतान्नभोजनचिन्ता ।

स्वोच्चमित्रगते चन्द्रे जीवशुक्रविलोकिते । 1300
युक्ते वा साज्यमन्नं स्याद्भृगुणा नवनीतयुक् ॥ 1301

। भोजनपात्रचिन्ता ।

[A][1]शुभ[B]ग्रहैः शुभं पात्रं पापैर्भग्नं च [2]भाजनम् । 1302
मन्देन [3]मार्तिकं विद्यात् कांस्यमर्काराराशिभिः ॥ 1303
चन्द्रज्ञभृगुजीवैश्च [4]शोभनं च स्वभाजनम् । 1304
लग्नाद्यैः [5]द्रष्टृतन्नाथैर्भुक्त्यमत्रादिकं वदेत् ॥ 1305

। लग्नद्वादशभावात् भोजनसम्बन्धिचिन्ता ।

[C]भुक्तिरमत्रं भक्ष्यं भोज्यं भोजयितृभावमुपदंशम् । 1306
सेचनमन्नं सहभुक् पूर्तिकथाशयनमपि लग्नात् ॥ 1307
[6]तृतीये भक्षणं वाच्यं षष्ठे [7]सस्यमिति स्थितिः । 1308

। ग्रहवशाद्भोजनपात्रचिन्ता ।

[8]सशुभे वित्तभवने भुक्तिपात्रं [9]सुभाजनम् । 1309
अङ्गारे कदळीपत्रं बुधे बहुदळैर्युतम् ॥ 1310
चन्द्रे तु तोय[10]पर्णानां बहुभिः साधितं दळम् । 1311

1. T शुभ्र°
2. T भोजनम्
3. T मार्षिकं T1 माक्षिकं
4. T स्वभावं
5. T द्रष्ट°
6. T त्रितीये
7. T स्तस्थ्य द्र.व्या.
8. T न शुभे पित्त°
9. T सुभोजनम्
10. T °वर्णानां

A अत्र शुभग्रहैश्शुभ्रपात्रम् इति मन्ये ।
B द्र.प्र.र ४४९-४५०
C द्र.प्र.अ.प २४.१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्दे तु भिन्नपात्रं स्यादर्के वर्तुलपात्रकम् ॥ 1312
कांस्यं वा पद्मपत्रं वा द्वयोरन्यद्विनिर्दिशेत् । 1313

। तृतीयस्थग्रहाद्भोजनपदार्थचिन्ता ।

[1]विक्रमस्थे दिवानाथे [2]मत्स्यं मारीचसाधितम् । 1314
निशानाथे तु मूलं स्यात् लवणाम्लानुपाचितम् ॥ 1315
[3]भर्जितं स्यान्महीसूनौ सोष्णं सस्यं विनिर्दिशेत् । 1316
बुधे तु बहुभिः पक्कं सस्यं [4]स्याद्धृदयङ्गमम् ॥ 1317
[5]गुरौ मधुरमादेश्यं भृगौ चाम्लं विनिर्दिशेत् । 1318
शनौ तु तिक्तसस्यं स्यात् षष्ठे वाप्येवमीरयेत् ॥ 1319

व्या - लग्ने शुभ इति - विपरीते क्रूरराश्युदये, क्रूरग्रहोदये वा क्रूरग्रहस्यान्नकारकत्वे वा भोजनस्य कश्मलता । युग्म इति - युग्मराशौ [6]जलराशौ वोदिते भोजनं सस्नेहं सार्द्रं च । ओजराशौ स्थलभे वोदिते निस्नेहं शुष्कं वा । जलराशिस्थयोरुदये तयोः कारकत्वे वा व्यञ्जनैर्युतम् । विजलस्थयोस्तयोरुदये, तयोः [7]कारकत्वे वा भोजनं शुष्कमुष्णं च । भौमार्कयोरिति व्याख्यातम् । सजलस्थितेति - सर्वत्र तयोरुदये, तयोः कारकत्वेवेति योज्यम् । [8]उदयोक्तौ सर्वत्र [9]वीक्षणमपि ग्राह्यमिति केचित् । मांसकारकग्रहवशात् मांसविशेषोक्तिः । मृगमांसमिति - [A]द्विपाश्वानां मासं वाराहमाहिषं च शनेरिति केचि[10]न्मूलं मन्यन्ते । [11]सप्तमे स्थितैरर्कादिभिर्मांसविशेषं वदन्ति । शाककारकवशात् मूलप्रकरणोक्तशाकभेदो वाच्यः ।

1. T विक्रमनुस्थे
2. T मस्यं
3. T भर्जि for भर्जितं
4. T सा° for स्या°
5. T1 गळौ मधुर माश्यं
6. T1 जलराशौ इति द्विवारं लिखितम्
7. T करकत्वे
8. T उदयोक्ता
9. T2 विलक्षा°
10. T मूलं ते
11. T1 सप्तमे स्तमे स्तितैः for सप्तमे स्थितैः

A दिपाश्व, द्विपार्श्व-पदविचारः १२६० गुरोराजद्विपाश्वो(त्थं) अस्य व्याख्या - द्विपार्श्वानां मांसम् । प्रश्नायनम् १२.२२ द्वैपार्श्वे अस्य व्याख्या- द्वौ पार्श्वौ? द्वैपार्श्वे? कृष्णीयम् १६.६ द्वैपाश्व'' । अस्य व्याख्या- गजस्य अश्वस्य च मांसम् । प्रश्नमार्गः २७.२७ द्वैपार्श्व अस्य व्याख्या jupiter of animals having two shoulders.

हिन्दी व्या. गुरु का द्वैपार्श्व ...... मांस कहना चाहिए । एवं सर्वत्र द्वैपाश्व द्वैपार्श्वयोः प्रयोगः सन्देहजनको दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रामेशास्तु स्वस्वात्मीयमेव मांसशाकादिकं मांसशाक्योः मूलानां च जलजत्वस्थलजत्वात् [1]ग्राम्यारण्यकत्वाद्युक्तिः; कारकग्रहलग्नयोर्जलत्वादिवशादिति। पापग्रहेति - शुभसम्बन्धात् शुभोदये शुभस्य कारकत्वे वा, तदुक्तधान्यजमन्नादि वदेदित्याहुः । सप्तमस्थेनेति स्पष्टम्। कारकवशात् सेकविशेषोक्तिः । सेकस्थानं सप्तमम् । आज्यं चेति [2]स्पष्टम् ।

उदयकेन्द्रेषु चतुष्पात्सम्बन्धाभावे चतुष्पात्सेको न वाच्य इति केचित्। कुजेऽस्त इति - अथ[3]वेत्यपि। [4]शनेरन्नं पुरातनमन्नं पथि प्रेतदर्शनश्रवणादेवेति च जातमिति च वदेत्। काष्ठेति स्पष्टम्। भुक्तिविषये मांसव्यञ्जने प्राप्ते, कस्य मांसमिति प्रश्ने [5]स्मृतिनीयते मांसादेति। तृणमत्तीति तृणादस्तस्य [6]मांसमित्यर्थः। शुभराशिगत[7]बुधवीक्षणे शुक्रवत्फल-मिति। क्रूरवदिति स्फुटम्। सप्तमे ग्रहशून्ये सप्तमराशिवशाद्वदेत्। राशिजातिमांसं वा तदधिपतिमांसं विमृश्य वदेदिति केचित्। सहभोक्त्रिति - उदयारूढद्रष्टृवशात् सर्वं वदेत्। पितृपक्षावित्यादि- श्लोकाः स्पष्टाः। भुक्ति[8]रमत्र भक्ष्यमित्यादिजातिर्भोजयितृभाव कथाश्रवणा[9]कृति[10A]स्थानाद्यैः स्वप्नजागरितं च वाच्यं स्वस्वोपदेशतः। द्वितीयेनामत्र वदेत्। चरे [11B]वृत्तपत्रम्, जलस्थजलराशिग्रहवशात् वृक्षादिप्रदेशो ज्ञेयः। स्थिरे [12]स्थाली-चषकादीन् वदेत्। तत्र ग्रहैः स्थानावकाशं पात्रविशेषं च वदेत्। तृतीयेन राशिना ग्रहेण वा तद्वीक्षकग्रहेण वा पूर्वोक्त फलमूलभक्ष्यं वदेत्। [13]चतुर्थतन्नाथादिभिः भोजयितृजातिं वदेत्। पञ्चमतन्नाथतद्वीक्ष कतत्स्थितैर्भोक्तुश्चिन्तितं भुक्तिकाले [14]मनु[C]ष्यद्विपद-पक्षि[15]सरीसृपादिचिन्तां वदेत्। षष्ठतन्नाथादिभिस्सस्यमुपदंशं वा षड्रसांश्च वदेत्। सप्तमा[16]दिना घृतगुडसूपादिसेचनं स्त्रीसङ्गतिं च वदेत्। अष्टमा[17]दिना अन्नविशेषं भोजनविघ्नं च वदेत्। नवमतन्नाथादिना [18]दृष्टग्रहरश्मि[19]सङ्ख्यया वा [20]सहभोक्तारं च वदेत्।

---

1. T ग्राद्यूकरण्यं
2. T1 स्वष्टम् ।
3. T °चेत्यपि
4. T शनैः
5. T मृतिर्नीते
6. T1 पाठः T मांसमासमित्यर्थः
7. T1 °ब्रुवीक्षणे
8. T °रमृतं
9. T2 पाठः T °मकृतिः T1 माकृतिः
10. T स्थानाद्यौ स्वप्नगौ च
11. T वृतपत्रं T1 दूतपत्रं
12. T स्थाल°
13. T चतुर्थन्त°
14. T मनुष्या°
15. T1 सरिस्यपादि°
16. T °दिनां
17. T °दिनां
18. T दुष्टगह°
19. T °संख्याया
20. T सहभोक्तं

A द्रष्टव्यं व्याख्यान्तिमं वाक्यम्।

B वृक्षपत्रम् इति मन्ये।

C अत्र चतुष्पदशब्दं सम्भावयामि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दशमादिना भुक्तिर्भुक्तिपूर्त्यादिकं वदेत्। कथमिति चेत्-ऊर्ध्वतिर्यगधोमुखेष्वग्र[1]मध्यस्वभुक्तिं क्रमेण वदेत्। अथवा सम्पूर्णचन्द्रे वा पूर्वराशिना वदेत्। एकादशेन 'मेषे [2]नृपतिसेने'त्यादिकथां वदेत्। द्वादशेन शयनस्य [3]शुभमशुभं च वदेत्। जलस्थराशिवशात् जलप्रदेशं, शुभाशुभवशात् स्पप्नजागरितं च वदेदिति भोजनविधिः। १२५१-१३१९॥

॥ अथ [4]सुरतप्रश्न उपदिश्यते ॥

। निरनुरागसानुरागसुरतचिन्ता ।

[5]नानुरागो [6]नरो नार्यां लग्ने क्रूरयुतेक्षिते। 1320

अनु[7]रागो महान् लग्ने शुभबन्धुयुतेक्षिते॥ 1321

चन्द्रस्य लग्नतुल्यत्वात् न्यायोऽयं चन्द्र ऊह्यताम्। 1322

। रागिणीसुरतचिन्ता ।

[8]शुभयुक्तेक्षितस्येन्दोः [9]दृग्योगेऽङ्गे तु रागिणी। 1323

। जारोपभुक्तायाः सुरतचिन्ता ।

[10]पापाढ्यचन्द्र[11]दृग्योगे खलभुक्ता भवेद्वधूः॥ 1324

। हठात्कृतसुरतचिन्ता ।

[A12]नरो नारीं बलाद्भुङ्क्ते सूर्याढ्येन्दुयुतेक्षिते। 1325

। मित्रादिभार्यासुरतचिन्ता ।

[B]आरूढा[13]च्छादकवशात् मित्रस्त्रीत्वादि[14]निर्णयः। 1326

मेषवृश्चिकयोर्मेषच्छादकत्वे स्वभार्यया॥ 1327

[C15]तरुणी ब्राह्मणी राज्ञी मन्त्रिस्त्री कर्षकाङ्गना। 1328

1. T1 °मध्यल्प° for °मध्यस्वल्प°
2. T °शेने°
3. T1 पाठः T शुभनुशुभं
4. T1 सुदतप्रश्न
5. T2 सानुरागो नरत्या for नानुरागो नरो नार्यां
6. T नर्या
7. T °रागे
8. पाप°
9. T धृग्योगे°
10. शुभा°
11. T1 दृग्यो लभुक्ता
12. T नरं नारी
13. T2 °श्चातक° T °श्चापक°
14. T °निर्नयः
15. T1 तरणि

A अत्र ''नरो नारीं'' इति वाक्यं सम्भावयामि, द्र.कृ १८.१ चन्द्रे पापसमेते पुरुषो भुङ्क्ते बलाद्रवौ नारीम्। तथा द्र.प्र.र ४६० B द्र.प्र.र ४६१ C द्र.कृ. १८-४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुजेन्द्वर्केड्यभृगुभिः शेषैः पाषण्डिनां वधूः ॥ 1329

। सकृदादिमैथुनचिन्ता ।

[A]ओजे स्वच्छादके वापि सकृद्याभो द्विरन्यथा । 1330

कुजाच्छवर्गे बहुशो रवीन्द्वोर्दिवसे निशि ॥ 1331

। भक्तिक्रियातन्त्रचिन्ता ।

[B]वदेद्भक्तिक्रिया[1]तन्त्रं कारकग्रहरश्मिभिः । 1332

। स्वप्नरतिचिन्ता ।

[C]धीशुभास्तोदये चन्द्रे सार्के स्वप्नेऽन्यया रतिः ॥ 1333

। कोपादनिद्रागुह्यस्पर्शयोगौ ।

[D]कोपादनिद्रा सारेऽस्मिन् सार्के गुह्यावलम्बनम् । 1334

। गर्भदसुरतयोगः ।

एषु चन्द्रे गुरुयुते सविलासं च गर्भदम् ॥ 1335

। परस्त्र्यादिमैथुनचिन्ता ।

[E][2]परस्त्रीमैथुनं सज्ञे साच्छे बहुवधूकथम् । 1336

[F]लग्न[3]स्थारेक्षिते शुक्रे सा सतीन्दौ सितेऽपि वा । 1337

। रतिकाले कलहयोगः ।

[G][4]पापैस्सुखास्तयातैर्वा भार्यया कलहं वदेत् ॥ 1338

। जागरणयोगः ।

लग्नास्तयोस्सभौ[5]मार्क्योर्जागरोऽग्नेश्च तस्करात् । 1339

1. T1 पाठ T °भक्तिक्रियातन्प्र
2. T1 वरस्त्री °
3. T1 सज्ञे नं सज्ञे for सज्ञे साछे
4. T °स्थारेर्केते
5. T °भौम्या° T1 °भौर्या°

A द्र.प्र.र ४६४
B द्र.प्र.र ४६६
C द्र.कृ १८.६
D द्र.प्र.र ४६९-४७०
E द्र.प्र.र ४७१
F द्र.प्र.र ४७२
G द्र.प्र.र ४७३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। कलहयोगपृथक्शय्यायोगौ ।

लग्नेऽस्ते [1]वेन्दुनारे वा स्थिते मन्दे स्त्रिया कलिः ॥ 1340
[2]यमारर्क्षेऽस्तगे शुक्रे मिथः कोपात् पृथक्छयः । 1341

। सुरते स्त्रीवस्त्रछेदयोगः ।

[A]लग्नास्ताम्बु[3]तृतीयेषु [4]शुक्रेऽब्जे स्त्रीपटच्छिदा ॥ 1342

। सुरते भूशयनयोगः ।

[B]चन्द्रेऽस्तस्थे कुजे [5]सोत्थे खे वा भूशयनं वदेत् । 1343
जारया भूशय[6]श्शुक्रे मदे भौमे त्रिकर्मणोः ॥ 1344

। साध्व्यादिभार्यायोगाः ।

[C]चन्द्रे [7]मदे वोपचये साध्वी [8]जीवयुतेक्षिते । 1345
केन्द्रे राहौ भवेल्लग्नात् भार्या दुष्टा न संशयः ॥ 1346

व्या - आरूढाद्वा ।

[D]पापैर्वा पुंग्रहैर्वेन्दौ दृष्टे युक्ते च दुर्जनी । 1347
बन्धुविद्वेषिणी चन्द्रे नीचारिस्थेऽरिवीक्षिते ॥ 1348
जीवार्काभ्यां युते दृष्टे चन्द्रे साध्वी च सुन्दरी । 1349
[E]शुक्रेण युक्तो दृष्टो वा भौमश्चेद् व्यभिचारिणी ॥ 1350

। कन्यानीचाङ्गनादिरतियोगाः ।

बृहस्पतिर्बुधाराभ्यां युक्तश्चेत्कन्यकारतिः । 1351
[F]शुक्रारवर्गे भौमशुक्रौ [9]चेद्विधवा वधूः ॥ 1352

---

1. T1 वेन्दुसारे
2. T यमारक्षगेऽस्तगे T1 यामा° for यमा°
3. T °तृतीय स
4. T शुक्रे ज्ञे
5. T सोर्त्थे T1 सोर्ति वे वा
6. T °शुक्रो मन्दे
7. T मन्दे
8. T1 जीवयुते for जीवयुतेक्षिते
9. T2 चेद्विधौ बधूः

A द्र.कृ १८.१० तथा द्र.प्र.र ४७७
B द्र.प्र.र ४७८ - ४७९
C द्र.प्र.र ४८०
D द्र.प्र.ज्ञा.प्र. २०.४
E द्र.प्र. ज्ञा.प्र. २०.७
F द्र.प्र.ज्ञा.प्र. २०.८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[A]चन्द्रस्स्त्रीवर्गयुक्तश्चेत् स्त्री स्वातन्त्र्यवती भवेत् । 1353
चन्द्रो मन्देन युक्तश्चेदतीव व्यभिचारिणी ॥ 1354
[B]नीचारिमित्रवर्गाढ्ये चन्द्रे नीचाङ्गनादिभाक् । 1355
[C]स्वर्क्षस्वोच्चादिगे चन्द्रे स्वभार्यादिपरिग्रहः ॥ 1356

। एकवारं मैथुनयोगः ।

ओजोदये वा तन्नाथे त्वोजस्थे त्वोजमैथुनम् । 1357

। स्वभार्याकलहयोगः ।

शुक्रे मन्दयुते दृष्टे स्वस्त्रीकलह उच्यते ॥ 1358

। विधवादिरतिज्ञानम् ।

राशिनक्षत्रसन्ध्यादौ दृष्टिश्चेत् विधवारतिः । 1359
[D]आरूढस्थितयोः काव्यकुजयोः [1]स्वगृहस्थयोः ॥ 1360
[2]स्वबन्धुविधवागामी प्रष्टा भवति नान्यथा । 1361
[E]अस्ते रविसितवक्रैः परजायां [3]स्वां गुरौ बुधे वेश्याम् ॥ 1362
चन्द्रे च [4]वदेत्सौरे तथान्त्यजातां वयश्शशिवत् । 1363

। भुक्तस्त्रीवयोज्ञानम् ।

[F5]कुमारिकां बालशशी बुधश्च वृद्धां शनिः सूर्यगुरू प्रसूताम् । 1364
[6]स्त्रीं कर्कशां भौमसितौ विधत्त एवं वयः स्यात् पुरुषेषु चैवम् ॥ 1365

॥ इति प्रष्टुर्विस्मापनार्थं सुरतप्रश्नोपदेशः ॥

व्या - [7]नानुराग इति त्रयः श्लोकार्थाः स्फुटाः । पापाढ्येति - पापाढ्यत्वं पापयुतदृष्टं नरमिति लग्न इति शेषः । आरूढेति - [8]स्वर्क्षतुङ्गसुहृ[9]न्क्षेत्राच्छादकत्वे [G]स्त्रियेदृशा ।

1. T स्वर्गगृह°
2. T सुबन्धु°
3. T परजयां स्वाङ्गारौबुधवेश्याम्
4. T वदेत्सा for वदेत्सौरे T1 वदेत्वा
5. T कुमारिकाम्
6. T स्त्री कर्कशां
7. T सानुराग
8. T स्वक्ष°
9. T °क्षेत्रभादिकत्वे

A द्र.प्र.र ४८६
B द्र.प्र.र ४८८
C द्र.प्र.र ४८९
D द्र.प्र. र After ४९१
E द्र.प्र.अ.प २४.३२
F द्र.प्र.मा २८.९
G स्त्रियेदृशा इति व्याख्यानस्य मूलं न दृश्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ईदृशा - ईदृश्या उत्कर्षयुत [1]सृहृत्स्त्रिया स्वया च स्त्रिया सङ्ग ऊह्यः । नीचत्वेति निकृष्टस्त्रियेत्याद्यूह्यम् । विस्तरस्त्वस्मदुक्तपद्धत्यादौ द्रष्टव्यः । तरुणीत्यादि[2]श्लोकास्त्रयः स्पष्टाः । सार्के गुह्यावलम्बन मित्यत्रालम्बनं - स्पर्शः । एष्वित्यादि । सासति पापे, [3]कलिः-कलहः । [4]पटच्छिदा-पटछिद्रमित्यर्थः । साध्वी-पतिव्रता । शेषं सुगममिति ।

॥ अथ स्वप्नदर्शनम् ॥

॥ मेषादिमीनान्तं प्रश्नलग्नगतं स्वप्नस्वरूपं सार्धत्रिभिः श्लोकैर्वदति ॥

[A]प्रासादहर्म्य[5]देवौको [B]ज्ञानदेहार्कदर्शनम् । 1366
विप्रतापसदैवानि क्षेत्रसस्यतृणालयम् ॥ 1367
महिष्यादिकिराताश्च [C6]मुण्डस्त्रीभ्यः पिबन्त्यपः । 1368
नृपस्वर्णवणिग्जातिमृगालिमृतगोहयान् ॥ 1369
[7]पुष्पपक्वफलादीनि नदीं नारीं नरान्वदेत् । 1370
कुम्भोदये च मुकुरं मीने स्वर्णं [8]जलं दिशेत् ॥ 1371
मेषादिषूदिते[9]ष्वित्थं क्रमादेतानुदाहरेत् । 1372

। लग्नोपरिकुजदृग्योगफलम् ।

कुजोदयदृशोर्मेषात्त्रिषूक्तं फलमादिशेत् ॥ 1373

। लग्नोपरिबुधगुरुदृग्योगफलम् ।

बुधोदये दृशोर्ब्रूयात् कुळीरादित्रिषू[10]दितम् । [D]शयः । 1374

1. T °सहृत्
2. T °श्लोकद्वयाः
3. T करि
4. T वटच्छद्रा T1 वटछिद्र
5. T °देवोको
6. T मुण्डाण्डा स्त्रीभ्योऽम्बुपानशुनेक
7. T1 पुष्पपर्व°
8. T जलादिशेत्
9. T °ष्विद्धं
10. T1 दितम् इति विलिख्य निरस्य तत्स्थाने शयः इति लिखितम्

A द्र.प्र.ज्ञा.प्र. १७.१ - १७.७ पर्यन्तम्
B द्र.प्र.ज्ञा.प्र. १७.१ ''वृषोदये दिनाधीशे ज्ञातगेहस्य दर्शनम्''
C द्र.प्र.ज्ञा.प्र. १७.४
D अत्रत्य शयः इति पदस्य सम्बन्धः पूर्वोक्ते मीने स्वर्णं जलादिशेत्'' इत्यत्र जलपदेन इति मन्यते । द्र.प्र.ज्ञा.प्र. १७.७ मीने स्वर्णं जलाशयम्'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गुरूदयदृशोर्वाच्यं [1]तुलादित्रिषु चोदितम् ।। 1375

। लग्नचतुर्थसप्तमेभ्यः स्वप्नचिन्ता ।

[2]मदे लग्ने च पाताळे त्रिभिश्चैव तु राशिभिः । 1376

कथयेत्स्वप्नदृष्टानि क्रमादुक्तान्यजादिके ।। 1377

। चतुर्थगतैर्ग्रहैः स्वप्नविवेकः ।

चतुर्थगे भृगौ रूप्यं राहौ मृत्युविषाद्भयम् । 1378

[A]कुजस्य मांसं शुक्लस्त्री शनौ पशुमृगादिकम् ।। 1379

चन्द्रे स्यात् प्लवनं [3]सिन्धौ जीवे स्वर्णादिदर्शनम् । 1380

आदित्यश्चेन्मृतान्पुंसः पतनं शुष्कशाखिनः ।। 1381

। लग्नस्थग्रहेभ्यः स्वप्नविवेकः ।

आरूढादिषु शुक्रश्चेत् श्वेतं सौधं बुधोऽमरान् । 1382

[B]परेत[4]दर्शनस्पर्शान् क्लिन्नकाष्ठादिदर्शनम् ।। 1383

[5]तीक्ष्णस्त्रीभोगसलिलशयनं रक्तदर्शनम् । 1384

वातशय्याफलस्वर्णमणिदर्शनमेव च ।। 1385

रूप्यं च वारितरणं [6]तिर्यग्जातिक्षुधागमाः । 1386

पाताळसंस्थितार्कादौ सप्त दृष्टान्यनुक्रमात् ।। 1387

। त्रैकालिकस्वप्नचिन्ता ।

उदयाद्भाविनं [7]स्वप्नं चतुर्थात् [8]दृष्टमीरयेत् । 1388

[9]अस्ताद्भूतं वदेत्कार्यं सर्वलाभं च कर्मणः ।। 1389

1. T तुल्या°
2. T मन्दे न्यस्ते च
3. T1 सिन्दौ
4. T दर्शनस्वर्णक्लिन्नर्कादि°
5. T2 पाठः T तिष्णा°
6. T1 तिक्यज्जाति°
7. T स्वप्नात्
8. T दृष्टि°
9. T तस्माद्भूतं

A द्र.प्र. र ५०१
B द्र.प्र.र ५०६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। राशिविशेषगतसूर्यारफलम् ।

अर्कारयोरळौ ब्रूयात् व्याकुलं मृतदर्शनम् । 1390
हस्ताभ्यां तूलमादाय गच्छन्तं कटके वदेत् ॥ 1391
वनशैलगतिं सिंहे कन्याभूषादिकं स्त्रियाम् । 1392

व्या - इति विशेषः । इति स्वप्नदर्शनम् ॥

॥ अथ विवाहप्रश्नः ॥

। दम्पत्योः शुभदयोगाः ।

नीचारिगैः खलै[1]र्मुक्ते लग्नेऽस्ते वाष्टमेऽपि वा । 1393
यदि चोद्वाहगे प्रश्ने दम्पत्योः शुभदं वदेत् ॥ 1394

। विवाहादष्टमे वत्सरे भर्तुर्मरणचिन्ता ।

लग्नाच्छष्ठाष्टमे चन्द्रः चन्द्रात् षष्ठाष्टमे कुजः । 1395
यदि वर्षाष्टके याति पुमान् यममपुत्रकः ॥ 1396

। अष्टमे वत्सरे दम्पत्योः मरणयोगः ।

पापयुक्तो यदा चन्द्रः षष्ठे वाप्यष्टमेऽपि वा । 1397
विवाहसमयान्मृत्युं दद्यादब्दाष्टमे तयोः ॥ 1398

। वैधव्यचिन्ता ।

रिपुनीचगृहे [2]पापो ह्यरिणा [3]वीक्षितोऽपि वा । 1399
यदि पापगृहे कन्या विधवोद्यत्यस[4]द्गृहे ॥ 1400

। कुलटाचिन्ता ।

पञ्चमर्क्षे यदा पापः शत्रुदृष्टस्सनीचगः । 1401
कुलटा तु भवेत्कन्या मृतपुत्राथवा भवेत् ॥ 1402

। विवाहात्सप्तमे मासि दम्पत्योः मरणयोगः ।

चन्द्रभौमौ यदा युक्तौ लग्नसप्तमयोस्तदा । 1403
प्रश्नकाले यमं यातस्सप्तमे मासि दम्पती ॥ 1404

1. T युक्ते
2. T1 पाठः T नापो
3. T वीक्षतो
4. T °द्गृहे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। दम्पतीजीवनमरणयोगः ।

[A]चन्द्रलग्नौ शुभांशस्थौ सजीवौ [1]पृच्छतो वदेत् । 1405
[2]पापांशकगतौ तौ चेत् [3]जीवितं न तयोर्द्वयोः ॥ 1406

। कापुरुषभर्तृयोगः ।

लग्ना[4]त्ससमेशे शून्ये दुर्बले दुर्ग्रहेक्षिते । 1407
सौम्यग्रहदृशा हीने [5]भर्ता कापुरुषो भवेत् ॥ 1408

। क्लीबभर्तृयोगः ।

[6B]ज्ञार्कियुक्ते चरेऽस्तर्क्षे क्लीबो [7]भर्ता प्रवासकृत् । 1409

। भर्तृपरित्यक्तवधूचिन्ता ।

अस्ते तु यमदृष्टेऽर्के [8]भर्त्रोत्सृष्टा भवेद्वधूः ॥ 1410

। विधवायोगः ।

[C]अर्कारमन्ददृष्टेऽस्ते युवतिर्विधवा भवेत् । 1411

। कन्याया अविवाहयोगः ।

कन्यैवास्तङ्गते मन्दे शुक्रे पापनिरीक्षिते ॥ 1412

। वैधव्यचिन्ता ।

ससमे मासि वर्षे वा विधवा[9]क्र्यारयोर्मदे । 1413

। पुनर्भूचिन्ता ।

तथार्क्यह्योः पुनर्भूः स्यात् शुभाशुभयुते मदे ॥ 1414

। भर्त्रा परित्यागचिन्ता ।

[D]बलहीनेऽस्तगे पापे सौम्यग्रहनिरीक्षिते । 1415

---

1. T पृच्छकौ
2. T1 पापांशकतौ
3. T जीवन्तं
4. T सप्तमेंशे
5. T1 पाठः, T अक्षरद्वयं भग्नम्
6. T जाति°
7. T भूतप्रवासकृत्
8. T भर्त्रा° T1 भर्त्या°
9. T कारयो वदेत्

A द्र.प्र. अ.प. १३.८
B द्र.प्र. अ.प. १३.१०
C द्र.प्र. अ.प. १३.११ -१२
D द्र.प्र. अ.प. १३.१३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भर्त्रा विसृज्यते [1]नारी [2]नीचारिस्थे तु वैरिणि ॥ 1416

। जारसङ्गचिन्ता ।

[A][3]अन्योऽन्यांशे सितारौ चेज्जारसक्ता वधूर्भवेत् । 1417

। वन्ध्याचिन्ता ।

मन्दा[4]र्क्षविलग्नस्थौ शशिशुक्रौ यदा तदा । 1418
वन्ध्या भवति सा नारी पञ्चमे पापदृग्युते ॥ 1419

। व्याधियोनिचिन्ता ।

अस्तराश्यंशगे भौमे भौमे वास्तांशगेऽथवा । 1420
मन्दांशेऽस्तांशगे नारी व्याधियोनिश्च दुर्भगा ॥ 1421

। पुत्रहन्त्र्यादिचिन्ता ।

[B]वन्ध्या वा मृतपुत्रा वा भवेत्पापेषु पञ्चमे । 1422
नीचारातिगृहस्थेषु [5]पुत्रहन्त्री [6]भवेत्स्वयम् ॥ 1423

। वध्वाः मातृपितृराहित्यचिन्ता ।

यदि नीचारिगो लग्नमारूढं वा न पश्यति । 1424
अर्कः स्त्रियाः पिता नास्ति मातेन्दुश्चेत्तथाविधः ॥ 1425

। वरस्य मातृपितृराहित्यचिन्ता ।

[C]प्रश्नारूढर्क्षयोरस्तं यदार्कः शत्रु[7]नीचगः । 1426
न पश्यति पिता पुंसो नास्ति [8]माता शशी यदि ॥ 1427

---

1. T नादि
2. T नीचारिसे तु दैशिके
3. T1 अन्येन्यांशे
4. T °र्क्षे विलग्न°, T1 °र्क्षेऽपि लग्न°
5. T पुत्रं हन्त्री
6. T1 भवत्स्वयम् for भवेत्स्वयम्
7. T °नीजगु
8. T पितार्केण तदास्तभाक्

A द्र.प्र. अ.प. १३.१४
B द्र.प्र. अ.प. १३.१६
C द्र.प्र. अ.प. १३.१८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। वरस्य पितृनाशादिचिन्ता ।

[A]पापा यदि निरीक्ष्यन्ते [1]रविं नीचारिगास्तदा । 1428
पिता मृतोऽथवा गच्छेत् पुत्रविग्रहतः स्वयम् ।। 1429

। निमित्तात् कन्यका जारिणीति चिन्ता ।

पशुपक्षिमृगादीनि मैथुनं कुर्वते यदि । 1430
सरीसृपोऽथवान्यो वा जारिर्णी कन्यकां वदेत् ।। 1431

। कन्यालाभयोगाः ।

[B]लग्नस्थौ चन्द्रशुक्रौ वा चन्द्रशुक्रनिरीक्षितम् । 1432
यदि लग्नं भवेत्प्रष्टुः [2]कन्यायाश्चाविरोधतः ।। 1433
बलिनौ यदि शुक्रेन्दू युग्मर्क्षे स्त्रीनवांशगौ । 1434
द्विपात्स्थौ लग्नमीक्षेते कन्यालाभ[3]स्तदा भवेत् ।। 1435

। पतिवल्लभायोगः ।

शुभयुक्तेक्षितेऽस्तांशे [4]कन्या स्यात्पतिवल्लभा । 1436
श्रीमती सद्गुणैर्युक्ता भवति स्त्री न संशयः ।। 1437

। सत्पुत्रप्राप्त्यादिचिन्ता ।

[C]स्वर्क्षतुङ्गत्रिकोण[5]स्थः सत्पुत्रा दीर्घजीविनी । 1438
यदि चन्द्रोदये शुक्रः [6]स्वोच्चराशिं स्थितोऽथवा ।। 1439

। विवाहयोगाः ।

जीवोदये स्वतुङ्गस्थ[7]स्सूर्याद्वाथ भपोदयात् । 1440
आरूढाद्वास्तगो [8]जीवो ज्ञो भृगुर्वाथवा भवेत् ।। 1441

---

1. T विनीचारि for रविं नीचारि
2. T कन्यायाश्च विरो°
3. T2 पाठः, T स्तथ भवेत्
4. T त्कन्या
5. T °स्था
6. T स्वोच्चरां
7. T पत्रं भग्नम् । T1 सूर्याददवोदयात्
8. T जीवात्ज्ञो गुरुर्वा

A द्र.प्र.अ.प. १३.२१
B द्र.प्र. अ.प. १३.२३ तत्र ''शुक्रनिरीक्षितौ यदि लाभो भवेत्प्रष्टुः इति ।
C द्र.प्र.अ.प १३.२६-३१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विवाहप्रश्नसमये विवाहोऽस्तीति कथ्यताम् । 1442

। स्त्रीलाभनाशयोगौ ।

जामित्रधनोपचयं गतः शशी [1]जीववीक्षितः कुरुते । 1443
स्त्रीलाभं पापयुतोऽवलोकितो [2]वापि तन्नाशम् ॥ 1444

। विवाहस्य शुभाशुभसूचकनिमित्तानि ।

दक्षिणबाहु[3]शिरोरःस्पर्शः शुभकृद्विवाहस्य । 1445
वामकर[4]पृष्ठजानुस्पर्श[5]सत्वेऽशुभ[6]स्तथा तस्य ॥ 1446
विलम्बनकरो जानुपादस्पर्शो [7]विवाहके । 1447

। आरूढात् वधूदिग्ज्ञानम् ।

प्रष्टुरारूढदिशिस्थां कन्यकां वदेत् प्रश्ने । 1448
लग्नेश[8]दिक्स्थितां वापि बलादेवं विचिन्तयेत् ॥ 1449

। योगविशेषात् दैवज्ञनिकटस्थ एव वर इति ज्ञानम् ।

[9]लग्नात्ससमभं स्वामी यदि पश्येत्तदा पुमान् । 1450
दैवज्ञनिकटस्थश्च [10]गुरुदृष्टे विशेषतः ॥ 1451

। निमित्तात् वधूस्वरूपज्ञानमाह ।

[11]यादृग्वर्णाकृतियुजः कन्याया दर्शनं तदा । 1452
कीर्तनं वा विवाहस्तु तादृश्या इति कीर्तयेत् ॥ 1453

व्या - गुरुरविसौम्ये इति - यदि चतुरश्रे सौम्या विवाहदा इति वान्यतमम् । एकादशे ग्रहद्वित्व इत्यादि चिन्त्यम् ।

---

1. T जीवविवक्षितः
2. T पापि
3. T1 पाठः, T शिरोशिरः°
4. T1 °पृष°
5. T °सत्व°
6. T °स्तदा तस्याः
7. T विवाहकृत्
8. T1 °र्दिस्थितां
9. T लग्नात्समभं T2 लग्नात्सभौमं
10. T गुरुदृष्टै
11. T यादृक्वर्णा°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। विवाहभङ्गयोगचिन्ता ।

कामाधिपे तिरोभूते [1]ह्यस्ते पापेऽपि वा न तु । 1454
[A2]विवाहस्तु न तत्काले सोऽस्तलग्नत्रिकोणगे । 1455
केन्द्रगे यत्नसाध्यः स्यात् [3]कविश्चास्तङ्गते तु न ॥ 1456

॥ इति विवाहप्रश्नः ॥

व्या - पुत्रसन्तानादिकमन्यत्र विस्तृतम् ।

इति जम्बुनाथविरचिते सव्याख्ये प्रश्नसारसमुद्रे
चतुर्थस्तरङ्गः ॥

* * *

1. T जस्त T2 जव
2. T विवाह न स्तत्काले T1 विवहस्तु काले
3. कविश्चास्तमतेस्सुम।

A अत्रं "स्तु" वर्णं T1 पाठात् स्वीकृत्य T पाठे निवेशिकृतम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ पञ्चमस्तरङ्गः ॥

[1]शुभमस्तु ।

॥ अथ प्रकीर्णफलानि निरूप्यन्ते ॥

। निमित्ताद्यवलोकनविधिः ।

A[2]बाह्याभ्यन्तरजैर्ब्रूयान्निमित्तैश्च शुभा[3]शुभैः । 1457

B लक्षणै[4]र्नरचेष्टाभिर्लग्नारूढादिभिर्ग्रहैः ॥ 1458

॥ अथ बाह्यनिमित्ता[5]न्यार्यासप्तत्याम् ॥

C हयवृषगजसिंहादेः पृच्छासमये यदा रुतं भवति । 1459

दर्शनमथवा तेषां शुभप्रदं विनिर्दिशेत् प्रश्ने । 1460

॥ तत्रैवाशुभनिमित्तानि ॥

D वस्त्राभिघातकलहप्रददुःखादिनिमित्तानि । 1461

जायन्ते प्रश्नादौ मरणवियोगार्थनाशदान्याहुः ॥ 1462

व्या - आभ्यन्तरनिमित्तम् । 'आत्मावस्थासदृशमखिलं पृच्छकस्यापि वाच्यम्' इत्यादि । E'देवे दक्षिणभागेऽथ पुरुष' इत्यादि च । लक्षणैरङ्गस्पर्शादिभिः ।

। इष्टसिद्धिलक्षणज्ञानम् ।

अङ्गुष्ठकर्णवदन[6]स्तनहस्तनासा

कट्यंसपादतलगण्ड[7]शिरांसि गुह्यम् । 1463

---

1. T1 पाठः ''शुभमस्तु, अथ प्रकीर्ण°
   T मातृकायां पत्रं खण्डितम्
2. T बाहाभ्य°
3. T शुभाशुभ
4. T °र्नचेष्टा°
5. T °न्याय्यासप्तत्याम्
6. T1 ''स्तन'' इति ग्रन्थपातः
7. T °सिरांसि

A द्र.प्र.र ३२८- ३२९

B अत्र °र्नरचेष्टा '' इति व्यख्यानोद्धृतपदात् मूलपाठशोधनं कृतम् ।

C द्र.आ.स ७

D अयं श्लोकः आर्यासप्तत्यां न दृश्यते ।

E द्र.प्र.अ.प १.२५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]नाभिं च संस्पृशति वक्ति शुभानि यद्वा

[2]प्रष्टा तदा कलयति ध्रुवमिष्ट[3]सिद्धिम् ॥ 1464

दक्षेष्वङ्घ्रिशिरोबाहुभ्रूस्तनश्रोत्रपालिषु । 1465

[4]स्पृष्टेषु शोभनं ब्रूयाद्वामेष्वेतेष्वशोभनम् ॥ इत्यादि ॥ 1466

व्या - नरचेष्टा तु पुत्रप्रश्ने, दीर्घदण्डतृणादिग्रहणे पुत्रजन्म, विवाहप्रश्ने समित्कुशपुष्पादिग्रहणे विवाहसिद्धिः । मरणप्रश्ने [5]दर्भौदुम्बरशाखादिग्रहणे मरणं भवतीत्यादि । ग्रहादिफलं तु वक्ष्यमाणमिति विस्तरभीत्या नेतः परं सम्मतिर्लिख्यते ।

। सर्वार्थसिद्धिचिन्ता ।

[A]केन्द्रत्रिकोणगैस्सौम्यैः पापैः [6]केन्द्राष्टमान्यगैः । 1467

[7]सर्वार्थसिद्धिं प्रवदेदसिद्धिं तद्विपर्यये ॥ 1468

व्या - [8]केन्द्राष्टमेत्यत्र त्रिकोणान्यगैरित्यपि द्रष्टव्यम् ।

॥ लाभालाभज्ञानमाह ॥

[9]द्वित्र्यायगाश्शुभा [10]लब्ध्यै विहत्यै तेष्वसद्ग्रहाः । 1469

मिथुनस्त्रीतुलाकुम्भनरराश्युदये शुभम् ॥ 1470

व्या - सिध्यतीति शेषः । [11]केन्द्रत्रिकोणाष्टमेषु पापावस्थाने कार्यं न [12]सिध्यत्येवेति [13]पूर्वश्लोकार्थः । न तु तदन्यगैः कार्यसिद्धिरित्यपि । अतो नान्येन विरोधः ।

॥ [14]पृष्टस्य कार्यस्य सिद्धेर्ज्ञानमाह ॥

लग्ने शुभे वा सद्वर्गे [15]स्थानं कार्यं च सिध्यति । 1471

---

1. T नाभिं व संस्पर्शति
2. T पृष्टा
3. T °सिद्धम्
4. T स्पृष्टेष्वशोभनं T1 प्रष्टेष्टशोभनं
5. T दर्भौमम्बर T2 दर्भाम्वर
6. T केन्द्रष्टमान्त्यगैः
7. T सवार्थ°
8. T1 °ष्टमेत्यत्रिकोणान्य°
9. T द्वित्र्यावगा°
10. T लब्धै विहत्ये, T1 लभै विहत्ये
11. T °ष्टमान्येषु
12. T सिध्यत्यवेति
13. T पूर्वशोकार्थः T1 पूर्वशार्कार्थः
14. T प्रष्टस्य
15. T स्नानं

A द्र.प्र.अ.प १८.४ तथा प्र.र ३३० - ३३१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कर्मण्यस्तेऽथवा सौम्ये [1]स्थानाप्तिर्वा [2]स्थिरोदये ॥ 1472

व्या - लग्ने शुभ[3]ग्रहे स्थिते, शुभवर्गोदये वा, दशमे सप्तमे वा शुभे स्थिते, स्थिरलग्नोदये सति वा, कार्यं स्थानं सीमादि च सिध्यति।

। इष्टानिष्टयोगौ ।

शुभा मानार्थदातारो धनपुत्रोदय[4]स्थिताः । 1473

पापा व्ययाष्टगा नेष्टा [5]लग्नेऽसन्खे शुभः [6]शशी ॥ 1474

व्या - लग्ने शशी असन् - अशुभः । खे - दशमे शुभः । शुभदृष्टः पूर्णो वा नीचारिव्यतिरिक्तराशिगतः चन्द्रो लग्नेऽपि शुभद इत्यर्थः । वक्ष्यति च 'लग्नस्थं [7]बुधमिन्दुं वा' इत्यादिना ।

। इष्टसिद्धियोगः ।

[A][8]केन्द्रगेंऽशेऽस्य मित्रं वा पापैर्वा त्रिषडायगैः । 1475

व्ययाष्टकेन्द्रे निष्पापे शुभमिष्टं च सिध्यति ॥ 1476

व्या - अंशे - लग्नेशे । निष्पापे - पापरहिते ।

। कार्यसिध्यसिद्धियोगाः ।

[B][9]इन्दुं द्विसप्तदशमायरि[10]पुत्रिसंस्थं

पश्येद्गुरुः शुभफलं [11]प्रमदाकृतं स्यात् । 1477

लग्नत्रिधर्मसुखनैधनगास्तु पापाः

कार्यार्थनाशभयदाः शुभदाः शुभाश्च ॥ 1478

लग्नस्थं बुधमिन्दुं वा शुक्रो यदि विलोकयेत् । 1479

---

1. T1 स्थानाप्तिर्वाप्तिर्वा for स्थानाप्तिर्वा
2. T स्थिरोदया
3. T °ग्रहस्थिते
4. T °सिताः
5. T लग्ने असन्खे
6. T शशिः
7. T बुधमिन्दुः,
8. T केन्द्रगेशेऽस्य मिते
9. T इन्दु°
10. T °पुत्र°
11. T1 प्रमधान्यकृतं for प्रमदाकृतं

A द्र.प्र.र ३३६-३३७ अत्र अंशे=लग्नेशे इति व्याख्यानुरोधेन केन्द्रगेंऽशे ''इति स्यादिति सम्भावयामि।

B द्र.प्र.अ. प १८.६, °नवमाय° °दशमाय° तथा धर्मसुत for धर्मसुख इति विशेषः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तमां स्त्रियमाप्नोति श्रियं च लभते सदा ॥ 1480

[1]उदयस्थं बुधं पश्येत् चन्द्रश्चेन्दुं बुधोऽथवा । 1481

जयभूरि[2]धनाप्तिः स्यान्नाशुभं पुनरत्र तु ॥ 1482

व्या - अत्र योगे अशुभं न भवतीत्यर्थः ।

। भार्यया कलहयोगः ।

[A]भौमदृष्टे सितेऽङ्गस्थे चन्द्रेऽच्छे वोग्रसंयुते । 1483

[3]पापाः सुखास्तगा वापि भार्यया कलहं वदेत् ॥ 1484

व्या - अङ्गस्थे - लग्नस्थे । अच्छे - शुक्रे । उग्रः - पापः । एषु योगेषु भार्यया स्त्रीमात्रेण वा कलहो वाच्यः ।

। भार्यागर्भविपत्कलहादिचिन्ता ।

[B]मन्ददृष्टे सितेऽङ्गस्थे भार्यागर्भविपद्भवेत् । 1485

केन्द्रस्थार्के मन्ददृष्टे चोरभीर्भार्यया कलिः ॥ 1486

। भीरुधनक्षययोगौ ।

[C]लग्नेऽर्के वार्किदृष्टे वा [4]भानौ भीरु[5]र्धनक्षयः । 1487

व्या - लग्नस्थेऽर्के वा यत्र कुत्रापि भानौ मन्ददृष्टे वेति योगद्वयम् ।

। स्थानभ्रंशजयादिचिन्ता ।

पापवर्गोदये स्थान[6]भ्रंशानर्थारिवृद्धयः । 1488

मित्रक्षेत्रं शुभे पश्यत्यर्थलाभजयादिभाक् ॥ 1489

व्या - अनर्थः - अर्थक्षयः, धनानवाप्तिश्च । मित्रविरोधबन्धदुरितव्याध्यादीनि भवन्ति । आदिपदेन नष्टलाभकार्यपरिसिद्धी च परिगृहीते ।

---

1. T1 पाठः ''उदयस्थं ....चेन्दुं इत्यन्तं T तत्र पत्रं खण्डितम्
2. T2 पाठः, T °धनाप्टं स्यात्°
3. T1 पापा सुखस्थे इति T पत्रं खण्डितम्
4. T भाजनौ for भानौ
5. T भीरुधन°
6. T °भ्रंशानार्था°

A द्र.प्र.र ३५७-३५८ B द्र.प्र.र ३५८-३५९ C द्र.प्र.र ३६०-३६१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। राज्यप्राप्तिचिन्ता ।

[A1]युग्मे जीवसितौ लग्ने खे कुजे स्थितिराज्यभाक् । 1490
जीवे लग्ने रवौ खस्थे जयराज्यधनादिभाक् ॥ 1491

व्या - अर्धाभ्यां योगद्वयं, अर्थजयभाक् चेत्यर्थः। आदिपदेन सीमाकार्यसिद्धिदीर्घायुरादिपरिग्रहः।

। जयार्थप्राप्तियोगौ ।

[B2]खेऽर्के लग्ने [C]गुरौ चन्द्रे सुत[3]वेश्मार्थगेऽर्थभाक् । 1492
[4]लग्नास्तयोः सतोः सोत्थखस्थैः [5]पापैर्जयार्थभाक् ॥ 1493

व्या - अर्धाभ्यां योगद्वयम् ।

। स्थानभ्रंशाद्यनिष्टयोगाः ।

उद्यन्तं शशिनं [6]पापो [7]दशमस्थो यदीक्षते । 1494
स्थानभ्रंशं धनच्छेदं मृत्युमातङ्कमादिशेत् ॥ 1495

। स्थानप्राप्त्यादीष्टयोगः ।

[D8]आप्योदये यद्ययुग्मे शुभ एकस्तथापरः । 1496
[9]तिष्ठेद्धीधर्मयोः प्रष्टा स्थानमानार्थसौख्यभाक् ॥ 1497

। क्षिप्रमरणचिन्ता ।

[E]पृष्ठोदये स्याद्यदि धर्मसंस्थः पापो भवेदात्मजसंस्थितो वा । 1498
नाशस्तव क्षिप्रमि[10]हास्ति नून[11]मितोऽपसर्पेति वदेत्तमाशु॥ 1499

1. T युग्मे सितौ संज्ञलग्न T1 युग्मे नितौ
2. T खेशे
3. T °वेश्मार्थास्तगे°
4. T लग्नास्थयोः सितोः सार्थाखस्थे
5. T1 पापैर्जभाक्
6. T पापाः
7. T दशमस्थाः
8. T2 आप्यादये यद्ययुक्मे T1 द्ययुग्मे for यद्ययुग्मे
9. T तिष्ठेद्धियमये योगः पृस्थानमार्थ°
10. T2 पाठः, T °हस्ति T1 °होस्ति for मिहास्ति
11. T मितोवसर्वेति

A द्र.प्र.र ३४३-३४४
B द्र.प्र.र ३४५-३४६
C T गुतरौ, अत्र तकारोपरि अक्षरनिष्कासनरेखाचिह्नात् गुरौ इत्येव स्वीकृतम् द्र.प्र.र ३६०-३६१
D द्र.प्र.र ३४७-३४८
E द्र.प्र.र ३६३-३६४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। स्थानमानादिप्राप्ति-अप्राप्तिचिन्ता ।

पापा लाभान्त्यगाः स्थानमानकार्यार्थनाशकाः । 1500

धनगः [1]स्थानमानार्थजयवृद्धिप्रदः शुभः ॥ 1501

विक्रमस्थः कीर्तिदाता चतुर्थे वाञ्छितार्थदः । 1502

व्या - धनगः - द्वितीयगः । [2]इत्थं सर्वेष्वपि भावेषु शुभग्रहस्तिष्ठन् स्वामी वा तत्तद्भाववृद्धिकरः । अशुभस्तिष्ठन् तत्तद्भावविपत्कर इति च ।

। भावविशेषगतासद्ग्रहफलचिन्ता ।

[A3]सोत्थगोऽसन्नर्थहानिं कुर्याद्बन्धनमर्थगः । 1503

लग्नान्त्ययोर्मृतिं वातिकलिं [4]वा के सुखक्षयम् ॥ 1504

व्या - सोत्थगः - तृतीयगः । असन् - अशुभग्रहः । अर्थगः - द्वितीयगः । के - चतुर्थे, स्थितः पापः सुखक्षयं कुर्यादिति ।

। द्विपदादिप्राणिनां हानिवृद्धिचिन्ता ।

[B]द्व्यङ्ग्याद्यादि लग्नगः पापो द्विपदादिविनाशनः । 1505

शुभग्रहस्तु लग्नस्थो द्विपदा[5]दिविवृद्धिदः ॥ 1506

व्या - द्विपाल्लग्ने पापस्तिष्ठन् द्विपदनाशं करोति । चतुष्पदराशौ लग्ने तिष्ठन् चतुष्पदनाशं करोतीत्यादि द्रष्टव्यम् ।

। भावविशेषगतपापग्रहफलचिन्ता ।

[C]पापेऽनुजगते बन्धुकलिं सुखगृहक्षयम् । 1507

अस्ते गमनसंरोधं कर्मस्थे कर्मणां क्षयम् ॥ 1508

1. T1 पाठः T तत्र पत्रं खण्डितम्
2. T इद्धं
3. द्र.व्याख्या । T सोर्थगो° T2 अर्थगोऽसन् तदर्ध for सोत्थगोऽसन्नर्थ°
4. द्र.व्याख्या T वार्के
5. T1 दिवृविवृद्धिदः

A द्र.प्र.र ३५१- ३५२

B द्र.प्र.र ३५३-३५४

C द्र.प्र.र ३५५- ३५६ तथा द्र.आ.स. १३-१४ सुखसंस्थैः सुखनाशं गृहभेदं बन्धुविरोधं वदेत् । उत्तरार्धं समानम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अत्र सर्वत्र [1]शुभाशुभदृष्टियोगवशात् सन्धिनाशौ वदेत् ।

। भाववृद्धिचिन्ता ।

[A]यस्य यस्य तु [2]भावस्य रिष्फसर्वार्थगाः शुभाः । 1509
यद्वा त्रिकोणकेन्द्रस्थास्तस्य तस्य शुभप्रदाः ॥ 1510

। मरणयोगः ।

चतुरश्रे [3]दुरुधरे क्रूरे शंसति मारणम् । 1511

व्या - मरणेत्ययं योगश्च सर्वभावतत्कारकसाधारणः । [B]'सर्पाग्नि[4]शस्त्रवन्तं', [C5]'सौरस्य द्रेक्काणे', 'क्रूरक्षेत्रेषु यमे', [D]'होरा द्वादशराशा', 'सौरस्त्रिकोणयुक्तः', [E]'भयमर्को लग्नगत' इत्यादीनि कृष्णीयादौ द्रष्टव्यानि ।

। उच्चग्रहजन्यफलचिन्ता ।

[F6]उच्चस्थो लग्नगः स्थानमानैश्वर्यविवृद्धि[7]दः । 1512
[8]लग्नस्थमुच्चगं पश्यन्नु[9]च्चस्थो राज्यभोगदः ॥ 1513

व्या - उच्चस्थं [10]पश्यन्नन्य उच्चस्थो राज्यसीमाधनादिभोगद इत्यर्थः ।

। केन्द्रस्थशुभाशुभग्रहफलम् ।

[G]आरोग्यमर्थलाभं वा [11]दौर्जित्यं प्रियसङ्गमम् । 1514
कुर्वन्ति सौम्याः केन्द्रस्थाः सर्वमेतत्परेऽन्यथा ॥ 1515

व्या - परे केन्द्रस्थाः पापाः ।

---

1. T1 शुभदृष्टि° for शुभाशुभदृष्टि°
2. T भावस्यादिष्टस्वास्तगताः
3. T °धुरुधुरे
4. T शस्त्रवसन्तं°, T2 सर्वाग्निशस्त्र° T1 शस्त्रवसतं
5. T1 पाठः T अस्फुटम्
6. T पत्रं खण्डितम्
7. T लग्नस्स°
8. T1 पाठः च्चस्थो, T तत्र पत्रं खण्डितम्
9. T1 पह्य°
10. T दौजित्यं

A द्र.प्र.र. ३६५-३६६
B द्र.कृ. १३.१२
C द्र.कृ. १३-९
D द्र.कृ. २३-९
E द्र.कृ. १७-२
F द्र.प्र.र. ३६९-३७०
G द्र.प्र.र. ३६७-३६८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। स्थानमानादिप्राप्ति-अप्राप्तिचिन्ता ।

पापा लाभान्त्यगाः स्थानमानकार्यार्थनाशकाः । 1500
धनगः [1]स्थानमानार्थजयवृद्धिप्रदः शुभः ॥ 1501
विक्रमस्थः कीर्तिदाता चतुर्थे वाञ्छितार्थदः । 1502

व्या - धनगः - द्वितीयगः । [2]इत्थं सर्वेष्वपि भावेषु शुभग्रहस्तिष्ठन् स्वामी वा तत्तद्भाववृद्धिकरः । अशुभस्तिष्ठन् तत्तद्भावविपत्कर इति च ।

। भावविशेषगतासद्ग्रहफलचिन्ता ।

[A3]सोत्थगोऽसन्नर्थहानिं कुर्याद्बन्धनमर्थगः । 1503
लग्नान्त्ययोर्मृतिं वातिकलिं [4]वा के सुखक्षयम् ॥ 1504

व्या - सोत्थगः - तृतीयगः । असन् - अशुभग्रहः । अर्थगः - द्वितीयगः । के - चतुर्थे, स्थितः पापः सुखक्षयं कुर्यादिति ।

। द्विपदादिप्राणिनां हानिवृद्धिचिन्ता ।

[B]द्व्यङ्क्यादि लग्नगः पापो द्विपदादिविनाशनः । 1505
शुभग्रहस्तु लग्नस्थो द्विपदा[5]दिविवृद्धिदः ॥ 1506

व्या - द्विपाल्लग्ने पापस्तिष्ठन् द्विपदनाशं करोति । चतुष्पदराशौ लग्ने तिष्ठन् चतुष्पदनाशं करोतीत्यादि द्रष्टव्यम् ।

। भावविशेषगतपापग्रहफलचिन्ता ।

[C]पापेऽनुजगते बन्धुकलिं सुखगृहक्षयम् । 1507
अस्ते गमनसंरोधं कर्मस्थे कर्मणां क्षयम् ॥ 1508

1. T1 पाठः T तत्र पत्रं खण्डितम्
2. T इद्धं
3. द्र.व्याख्या। T सोर्थगो° T2 अर्थगोऽसन् तदर्ध for सोत्थगोऽसन्नर्थ°
4. द्र.व्याख्या T वार्के
5. T1 दिवृविवृद्धिदः

A द्र.प्र.र ३५१- ३५२
B द्र.प्र.र ३५३-३५४
C द्र.प्र.र ३५५- ३५६ तथा द्र.आ.स. १३-१४ सुखसंस्थैः सुखनाशं गृहभेदं बन्धुविरोधं वदेत् । उत्तरार्धं समानम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अत्र सर्वत्र [1]शुभाशुभदृष्टियोगवशात् सन्धिनाशौ वदेत् ।

।भाववृद्धिचिन्ता ।

[A]यस्य यस्य तु [2]भावस्य रिष्फसर्वार्थगाः शुभाः । 1509

यद्वा त्रिकोणकेन्द्रस्थास्तस्य तस्य शुभप्रदाः ॥ 1510

। मरणयोगः ।

चतुरश्रे [3]दुरुधरे क्रूरे शंसति मारणम् । 1511

व्या - मरणेत्ययं योगश्च सर्वभावतत्कारकसाधारणः । [B]'सर्पाग्नि[4]शस्त्रवन्तं', [C5]'सौरस्य द्रेक्काणे', 'क्रूरक्षेत्रेषु यमे', [D]'होरा द्वादशराशा', 'सौरस्त्रिकोणयुक्तः', [E]'भयमर्कौ लग्नगत' इत्यादीनि कृष्णीयादौ द्रष्टव्यानि ।

। उच्चग्रहजन्यफलचिन्ता ।

[F6]उच्चस्थो लग्नगः स्थानमानैश्वर्यविवृद्धि[7]दः । 1512

[8]लग्नस्थमुच्चगं पश्यन्नु[9]च्चस्थो राज्यभोगदः ॥ 1513

व्या - उच्चस्थं [10]पश्यन्नन्य उच्चस्थो राज्यसीमाधनादिभोगद इत्यर्थः ।

। केन्द्रस्थशुभाशुभग्रहफलम् ।

[G]आरोग्यमर्थलाभं वा [11]दौर्जित्यं प्रियसङ्गमम् । 1514

कुर्वन्ति सौम्याः केन्द्रस्थाः सर्वमेतत्परेऽन्यथा ॥ 1515

व्या - परे केन्द्रस्थाः पापाः ।

---

1. T1 शुभदृष्टि° for शुभाशुभदृष्टि°
2. T भावस्यादिष्टस्वास्तगताः
3. T °धुरुधुरे
4. T शस्त्रवसन्तं°, T2 सर्वाग्निशस्त्र° T1 शस्त्रवसतं
5. T1 पाठः T अस्फुटम्
6. T पत्रं खण्डितम्
7. T लग्नस्स°
8. T1 पाठः च्चस्थो, T तत्र पत्रं खण्डितम्
9. T1 पह्य°
10. T दौजित्यं

A द्र.प्र.र. ३६५-३६६
B द्र.कृ. १३.१२
C द्र.कृ. १३-९
D द्र.कृ. २३-९
E द्र.कृ. १७-२
F द्र.प्र.र. ३६९-३७०
G द्र.प्र.र. ३६७-३६८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ [1]अथ शत्रुगमागमचिन्ता ॥

[A]सुतशत्रुगतैः पापैः शत्रु[2]र्मार्गान्निवर्तते । 1516
चतुर्थगैरपि प्रासः शत्रु[3]र्भग्नो निवर्तते ॥ 1517
मन्दार[4]चन्द्रैर्वेश्मस्थैर्नायाति द्विषतां बलम् । 1518
बुधजीवसितैर्वेश्मगतैरायाति [5]तद्बलम् ॥ 1519

॥ अर्थभेदाभावाल्लघुत्वाच्च षट्पञ्चाशिकाश्लोकानेव पठति ॥

। स्थानगमागमजीवितमरणरोगशान्तिपराभिभवज्ञानमाह ।

[B]वृषसिंहवृश्चिकघटै[6]र्विद्धि स्थानाद्गमा[7]गमौ न स्तः । 1520
न मृति[8]र्न चापि नष्टं न रोगशान्तिर्न चाभिभवः ॥ 1521

। अत्र पूर्वोक्ताद्विशेषमाह ।

[C]तद्विपरीतं तु चरैर्द्विशरीरैर्मिश्रितं फलं भवति । 1522
लग्नेन्द्वोर्वक्तव्यं शुभदृष्ट्या शोभनमतोऽन्यत् ॥ 1523

। शत्रुपराजयपलायनयोगौ ।

[D9]झषालिकुम्भकर्कटा रसातले यदा स्थिताः । 1524
तदा रिपोः पराजयः चतुष्पदैः [10]पलायनम् ॥ 1525
व्या - चतुष्पदराशिभिः चतुर्थभूतैः पलायनमिति ।

। शत्रोर्गमागमज्ञानमाह ।

[E]स्थिरे शशी [11]चरोदये [12]न चागमो रिपोर्यदा । 1526

1. T1 अद
2. T °मार्ग°
3. T °भग्नो
4. T °चन्द्रे
5. T तत्फलम्
6. T °र्वृद्धि
7. T °गमो
8. T °न चापि, T1 °न पापि
9. T वृषालि°, T1 षालि झषालि°
10. T द्र.व्याख्या T पलायनः
11. T चोरोदमे
12. T1 न चमो for न चागमो, T चमगो

A द्र.ष.प. २-३
B द्र.ष.प. २-१
C द्र.ष.प.२.१
D द्र.ष.प. २.४
E द्र.ष.प २. ६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदागमं रिपोर्वदेद्विपर्यये विपर्ययम् ॥ 1527

। शत्रोर्निवृत्तिज्ञानमाह ।

[A]स्थिरे तु लग्नमागते चरस्थिते तु चन्द्रमाः । 1528

निवर्तते रिपुस्तदा [1]सुदूरमागतोऽपि सन् ॥ 1529

। शत्रोर्गतिचिन्ता ।

[B]चरे शशी लग्नगतो द्विदेहः [2]पथोऽर्धमागत्य निवर्ततेऽरिः । 1530

विपर्यये चागमनं द्विधा स्यात् पराजयः स्यादशुभे[3]क्षिते तु ॥ 1531

। शत्रोरागमनानागमनचिन्ता ।

[C]द्वित्रिलग्नान्त्यषट्पञ्चगतैरायात्यसद्ग्रहैः । 1532

लग्नाच्चतुर्थगैः पापैर्नायाति द्विषतां बलम् ॥ 1533

। शत्रोर्विनिवर्तनचिन्ता ।

[4D]स्थिरे मिश्रेऽथवा लग्ने शीतभानुर्द्विसंश्रये । 1534

सुदूरमागतोऽप्यस्मिन्नरातिर्विनिवर्तते ॥ 1535

। शत्रुबलागमनानागमनचिन्ता ।

[E]लग्नाम्बुगौ यदेन्द्वर्कौ तदा नायाद्रिपोर्बलम् । 1536

बुधेड्यशुक्रा हिबुके तदागच्छति निश्चयः ॥ 1537

व्या - नायात् नागच्छेदित्यर्थः ।

---

1. T2 नुदूर°

2. T पदोऽर्ध°, T1 पर्दोमागत्य

3. T °क्षितेत्य, T1 °क्षितेत्यत्र

4. T स्थितेरमित्रेऽथवा लग्ने सीतभसिद्विसंश्रये

A द्र.ष.प २.७ B द्र.ष.प २-८

C द्र.प्र.मा २४-७२

D द्र.प्र.मा २४.७० स्थिरे तु लग्नमागते द्विरात्मके तु चन्द्रमाः ।
निवर्तति रिपुस्तदा सुदूरमागतोऽपि सन् ॥ अस्मात् श्लोकाच्छोधितम् ।

E द्र.प्र.मा २४-७३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। योगान्तरेण शत्रोरागमनानागमनचिन्ता ।

[A]नागच्छति परचक्रं यदार्क[1]चन्द्रौ [2]चतुर्थभवनस्थौ । 1538
गुरुबुधशुक्रा हिबुके यदा तदा शीघ्रमायाति ।। इति । 1539
[B3]स्थिरोदये जीवशनैश्चरेक्षिते [4]गमागमौ नेति [5]वदेत्तु पृच्छतः । 1540
[6]त्रिपञ्चषष्ठेष्वरिसङ्गमाय पापाश्चतुर्थे विनिवर्तनाय ।। 1541

। शत्रोर्मार्गस्थितेरागमनस्य च चिन्ता ।

[C]स्थिरलग्नगतौ मन्दजीवौ चेद्वैरिणः स्थिताः । 1542
उदयर्क्षगतो जीवश्चरराशौ तदागमः ।। 1543

। शत्रोर्विनिवर्तनचिन्ता ।

[D]मेषधनुस्सिंह[7]वृषा यद्युदयस्था भवन्ति हिबुके वा । 1544
शत्रुर्न तिष्ठति तदा [8]ग्रहसहिता वा वियुक्ता वा ।। 1545

। शत्रोर्मार्गस्थितेः तदागमनस्य च चिन्ता ।

[E]स्थिरराशौ यद्युदये शनिर्गुरुर्वा स्थित[9]स्तदा शत्रुः । 1546
उदये रविर्गुरुर्वा [10]चरराशौ स्यात्तदागमनम् ।। 1547

व्या - स्थितः शत्रुः स्वस्थानस्थितः ।

---

1. T °चन्द्रा
2. T2 चतुर्थ धनस्थौ T1 चतुर्थवनस्था
   T चतुर्थवनस्था
3. T स्थिरोदयो
4. T गमागमा
5. T °त्रिपदेन्तु for वदेत्तु
6. T1 त्रिपचचष्टे°
7. T °वृषा द यद्यु°
8. T गृहवहिता
9. T °स्सदा
10. T1 राशौ for चरराशौ

A द्र.ष.प २-११
B द्र.ष.प. २-१०
C द्र.प्र.अ.प. २०.३० अत्र तृतीयपादे उदये रविर्गुरुर्वा इति विशेषः ।
D द्र.ष.प २.१२
E द्र.ष.प. २.१३ तथा द्र.प्र.अ.प. २०.३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। शत्रुसेनायार्यातुश्च शीघ्रागमनचिन्ता ।

[A]द्वितीये वा तृतीये वा गुरुः शुक्रोऽथवा स्थितः । 1548
आश्वेवागच्छति चमूः प्रवासी वा न संशयः ॥ 1549

। देशान्तरात्प्रत्यागमनदिनज्ञानम् ।

[B]उदयर्क्षाद्यावतीन्दुस्ता[1]वद्भिर्वासरैर्नृपाः । 1550
[2]आगमैर्वासराद्यैर्वा लग्नेन्द्वन्त[3]र्ग्रहो न चेत् ॥ 1551

व्या - आदिपदेन मासादिपरिग्रहः । लग्नचन्द्रान्तरे ग्रहाभावे वाच्यमागमनमिति ।

॥ इति रिपुगमागमप्रकरणम् ॥

॥ अथ गमागमचिन्ता ॥

[C4]अर्कार्किज्ञकुजानामेकोऽपि चरोदये यदा भवति । 1552
प्रवदेत्तदाशुगमनं [5]वक्रगतैर्नेति वक्तव्यम् ॥ 1553

। गच्छतां शुभाशुभज्ञानमाह ।

[D]चरोदये [6]शुभः स्थितः शुभं करोति यायिनाम् । 1554
अशोभनैरशोभनं स्थिरोदयेऽपि वा शुभम् ॥ 1555

व्या - स्थिरेऽष्टमेऽपि वा शुभमिति पाठान्तरम् ।

। गमननिवृत्त्यादिज्ञानम् ।

चरलग्ने गुरुर्ज्ञो वा तपनोऽप्युभयो[7]द्गमे । 1556
गतिकृत्पुनरर्कोऽसौ निवृत्त्यै स्थिरगः पथि ॥ 1557

व्या - स्थिरगोऽर्कः पथि निवृत्यै भवति । चरलग्ने गुरुर्ज्ञो वेत्युभयशेषः ।

---

1. T °र्वा सरीसृपाः
2. T आगमैवासरैराद्यै वा
3. T °र्गृहो
4. T2 अर्कार्किकुजानां
5. T चक्र°
6. T शुभस्थे
7. T °द्गमः

A द्र.ष.प. ३-५
B द्र.ष.प. २.१७
C द्र.ष.प २.९
D द्र.ष.प. २.५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। यातुः प्रत्यागमनकालज्ञानम् ।

[A]ग्रहः [1]सर्वोत्तमबलो लग्नाद्यस्मिन् [2]गृहे स्थितः । 1558
मासैस्तत्तुल्यसङ्ख्याकैर्निवृत्तिं यातुरादिशेत् ॥ 1559
चरांशस्थे ग्रहे तस्मिन् कालमेवं विनिर्दिशेत् । 1560
द्विगुणं स्थिरभांशस्थे त्रिगुणं [3]द्व्यात्मभांशके ॥ 1561
[B]यातुर्विलग्ना[4]ज्जामित्रभव[5]नाधिपतिर्यदा । 1562
करोति वक्रमावृत्तिकालं तं ब्रुवते परे ॥ 1563

। चतुष्पदागमनज्ञानमाह ।

तिर्यग्राशिर्यदा [6]लग्नाद्द्वितीयः स्याच्छुभान्वितः । 1564
तृतीयो वा यदि ब्रूयात्तिरश्चामागमं तदा ॥ 1565

॥ इति गमागमप्रकरणम् ॥

॥ अथ प्रोषितागमनचिन्ता ॥

[C]दूरगतस्यागमनं सुतधनसहजस्थितैर्ग्रहैर्लग्नात् । 1566
सौम्यैर्नष्ट[7]प्राप्तिं लघ्वागमनं गुरुसिताभ्याम् ॥ 1567

व्या - 'द्वितीये वा तृतीये वेति' प्रयोगोऽप्यत्र स्मर्तव्यः । गुरुशुक्रौ सुतस्थौ चेत् [8]झटित्यागमनं वदेदिति च द्रष्टव्यम् ।

[D]जामित्रे त्वथवा षष्ठे [9]ग्रहः केन्द्रे च वाक्पतिः । 1568

1. T सर्वोक्तं°
2. T गृहे शेत्
3. T द्वात्म°
4. T1 °ज्ञामित्र°
5. T °नादिपति°
6. T लग्नाद्वितीय°
7. T °प्राप्तिर्लध्वा°
8. T झडि°
9. T ग्रहे

A द्र.ष.प. २.१४, २.१५ मूलमातृकायां गृहे इति पदात् परं शेत् इति लिखितम्, शेत् इति ष.प. पञ्चदशश्लोके पूर्वार्धान्ते दृष्टवा अत्र पङ्क्तिद्वयं लेखकप्रमादात् परित्यक्तमिति सम्भाव्य मया तत् पूरितम् ।
B द्र.ष.प. २-१६
C द्र.ष.प. ५.१
D द्र.ष.प. ५.२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रोषितागमनं विद्यात् त्रिकोणे ज्ञे सितेऽपि वा ॥ 1569

। यातुः सुखेन लाभेन चागमनस्य चिन्ता ।

[A]अष्टमस्थे निशानाथे कण्टकैः पापवर्जितैः । 1570

प्रवासी सुखमायाति सौम्यैर्लाभसमन्वितः ॥ 1571

। यातुर्बन्धनाद्यनिष्टज्ञानम् ।

[B1]दुश्चिक्यस्थैः केन्द्रषष्ठोरगैर्वा पापैः पापालोकिते [2]पृष्ठलग्ने । 1572

सौम्यादृष्टैर्बन्धनस्था[3]न्मृतान्वा नष्टान् भ्रष्टान् घातितान्वा वदेत्तान् ॥ 1573

। यातुर्मृत्युयोगः ।

[C]मन्दः पापसमेतो लग्नान्नवमे शुभैरयुतदृष्टः । 1574

रोगार्तः परेदेशे [4]चाष्टमगो मृत्युकर एव ॥ 1575

। यातुः प्रत्यागमनदिनज्ञानम् ।

[D]ग्रहो विलग्नाद्यतमे गृहे तु तेनाहता द्वादशराशयस्तु । 1576

तावद्दिनान्यागमनस्य विद्यान्निवर्तनं वक्रगतैर्ग्रहैस्तु ॥ 1577

॥ इति प्रोषितागमनप्रकरणम् ॥

॥ अथ यात्रा ॥

। शत्रुजयार्थप्राप्तियोगः ।

मन्देन्दु[5]भौमा लाभस्था लग्ने शुक्रेऽर्कसोमजौ। 1578

त्रिबन्धुस्थौ सुते जीवे शत्रून् जित्वा जयार्थभाक् ॥ 1579

व्या - स्वगृहं च सुखेन प्राप्नोतीति शेषः ।

---

1. T दुश्चित्क°
2. T पृष्टलग्ने
3. T °मृतान्वा
4. T चाष्टवः for चाष्टम° T2 चाष्टप°
5. T °भौमलाभ°

A द्र.ष.प ५.३ तत्र तृतीयपादे ''प्रवासी सुखमायाति'' इति विशेषः।
B द्र.ष.प. ५.४
C द्र.ष.प. ७-११
D द्र.ष.प. ५-५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। प्रष्टुः कार्यसिद्धियोगः ।

कर्मार्थारिगतैर्ज्ञेड्यचन्द्रैः सिद्धिरनुत्तमा । 1580

लग्नार्यष्टगतैर्जीवशुक्रार्कैरपि [1]साधुसंसिद्धिः ॥ 1581

व्या- प्रष्टुः कार्यसिद्धिरावश्यकीत्यर्थः ।

। यातुर्भ्रंशयोगः ।

लग्ने कुजेन्दू षष्ठे च शशाङ्कसुतशुक्रयोः । 1582

भ्रंशः स्याल्लग्नगे भौमे सेन्दौ मन्दावलोकिते ॥ 1583

॥ इति यात्रा ॥

॥ अथ जयपराजयौ निरूप्येते ॥

॥ नगरपतेर्जयस्थानमाह ॥

[A]दशमोदयसप्तमगाः सौम्याः नगराधिपस्य विजयकराः । 1584

आरार्की ज्ञगुरुसिताः [2]प्रभङ्गदौ [5]विजयदा नवमे ॥ 1585

व्या - प्रश्नलग्नान्नवमस्थौ [3]भौमार्की भङ्गदौ नवम[3]स्था ज्ञगुरुसिता विजयप्रदाः ।

॥ नगरयायिनो जयज्ञानमाह ॥

[B]पौरास्तृतीयभवना[6]द्धर्माद्वा [7]यायिनः शुभैः शुभदाः । 1586

व्ययदशमाये पापाः पुरस्य नेष्टाः शुभा यातुः ॥ 1587

। सद्योयुद्धयोगः ।

क्रूरे लग्ने बुधे सोत्थे चन्द्रे बन्धौ महीशयोः । 1588

सद्यो युद्धं भवत्येव पौरनाशश्च कीर्तितः ॥ 1589

व्या - चन्द्रे बन्धावित्यत्र मान्दौ बन्धाविति पाठान्तरम् ।

---

1. T साधुवासासिद्धिः
2. T द्र.व्याख्या, प्रभङ्गदा
3. T भमार्की, T1 भूमार्की
4. T1 °स्थाज्ञे गुरु°
5. T पिजयदाः
6. T °धर्माद्वा
7. T1 यायिनः शुभदाः

A द्र.ष.प. ३-१

B द्र.ष.प. ३.२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। यायिनः सिध्यसिद्धियोगौ ।

[A]नरराश्युदये खे द्वौ पापिनौ चेत्तदा क्षयः । 1590
यायिनस्तत्र चेत्सौम्याः सिद्धिं राज्ञां समादिशेत् ॥ 1591

व्या - खे - दशमे, यायिनः क्षय इति योज्यम् । तत्र नरराश्युदये खे च सौम्याश्चेदित्यन्वयः ।[B]झषाळि ---------------- मे अचिरेण ।

॥ अथ रोगशान्तिः ॥

। रोगोपशमनयोगाः ।

[C]शुभग्रहाः सौम्यनिरीक्षिताश्च विलग्नसप्ताष्टमपञ्चमस्थाः । 1592
त्रिषड्दशाये च [1]निशाकरः स्यात् शुभं [2]वदेद्रोगनिपीडितानाम् ॥1593
[D3]चन्द्रे तूपचये केन्द्रत्रिकोणधनगैश्शुभैः । 1594
लग्ने शुभेक्षिते चापि रोगार्तस्तु सुखी भवेत् ॥ 1595
[E]परिपूर्णतनौ चन्द्रे लग्नस्थे सौम्यवीक्षिते । 1596
केन्द्रगौ गुरुशुक्रौ [4]ना रोगार्तस्सुखितो भवेत् ॥ 1597

व्या - सौम्यपदेन [5]बुधो विवक्षित इति केचित् । गुरुरित्यपरे ।

। व्याध्याद्यनिष्टयोगाः ।

पापे लग्नाम्बुरन्ध्रस्थे व्याधिं वा दुःखमादिशेत् । 1598

---

1. T निशाकरस्य
2. T वदेप्राग°
3. T चन्द्रे तुपचये
4. T1 वा
5. T बुधोपिवक्षित

A द्र.प्र.मा २४-९९
B ''झषाळि'' इति पदं T मातृकायां पञ्चाशत्तमपृष्ठे अन्तिमं पदम् । ''मे अचिरेण'' इति पदं T2 द्विपञ्चाशत्तमपृष्ठस्य आरम्भे स्थितं पदम् । T1 मातृकायां ५१ संख्याकताडपत्रं नष्टम् । इदं T2 मातृकायां ५१ अङ्कितं ताडपत्रं नाशमुपगतम् इति प्रतिलिपिकारैः लिखितम् । T मातृकायामपि नष्टपत्रगतो लेखांशो नास्त्येव ।
C द्र.ष.प ४-५
D द्र.प्र.मा १३.२८ उपचयसंस्थश्चन्द्रः सौम्याः केन्द्रत्रिकोणधनमृतिगाः । लग्नं चाशुभदृष्टं सुखितस्तत्रातुरो वाच्यः ॥
E.. द्र.आ.स २८ अत्र द्वितीयपादान्ते ''निरीक्षितो गुरुणा'' इति विशेषः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - अत्र योगे व्याधिदुःखान्यतरद्वर्तमानमिति वदेत् ।

[1]धनान्त्याष्टास्तगे भौमे क्लेशरोगादिकं वदेत् । 1599

लग्नस्थे कलहं [2]ब्रूयाद्व्ययं च व्ययवेश्मगे । 1600

लग्नस्थं [3]बुधमिन्दुं वा क्रूरः पश्येद्रुजं वदेत् ॥ ७१ ॥ 1601

व्या - "[A]पृष्ठोदये विलग्ने' 'उरगै[4]र्वेष्टितकायाः' ।

। मृतिव्याधियोगौ ।

चतुरश्रगतश्चन्द्रः पापयुक्तो मृतिप्रदः । 1602

पापैश्च बलिभिः दृष्टो देहिनां कुरुते रुजम् ॥ 1603

व्या - चतुरश्रदुरुधुरे इतिवत् ।

। आयुर्नाशयोगः ।

[B]सौम्यादृष्टः सौरो यं यं राशिं हिनस्ति चारेण । 1604

क्षपयति चायुस्तस्य [5]क्रूरग्रहेक्षितः शीघ्रम् ॥ 1605

व्या - प्रश्ने जन्मनि चैतदुपदिश्यते । जन्मचन्द्रापेक्षया सौम्यादृष्टः सौरो यत्र यत्र भावे चरति [6]स तत्तद्भावनाशकः क्रूरदृष्टश्चेच्छीघ्रमेव तत्तद्भावनाशकर इति ।

। रोगनिवृत्तिमरणयोगौ ।

चतुरश्रधनान्त्यान्यगताः सौम्या गदक्षयम् । 1606

कुर्वन्ति पापा मरणं रोगिणामिति निश्चयः ॥ 1607

॥ इति रोगचिन्ताप्रकरणम् ॥

---

1. T धनान्त्य°
2. T ब्रूयान्ययं
3. T °मिन्द्रं
4. T2 °र्वोष्टितकोया:
5. T क्रूरग्रहवीक्षितः
6. T ग for स

A द्र.प्र.सा.स १२२८

B द्र.प्र.र २५०-२५१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। अथ कन्यालाभादिप्रकरणम् ।

। वधूप्राप्तियोगः ।

कन्याप्तिः कर्किगोजूकैः सितचन्द्रयुतेक्षितैः । 1608

कन्यांशचन्द्रयुग्मर्क्षशुक्रदृष्टोदये तथा ॥ 1609

व्या - कन्याप्तिः - कन्यालाभः । कन्यांशगतचन्द्रेण [1]युग्मर्क्षगतशुक्रेण च बलिना पूर्णनिरी-क्षितेऽपि लग्ने तथा कन्याप्तिः स्यादित्यर्थः ।

। पुनः स्त्रीप्राप्त्यप्राप्तियोगौः ।

[2]द्विपाल्लग्ने रविः स्त्र्या[3]प्त्यै त्र्यंशे चन्द्रसितेक्षिते । 1610

धनास्तेन्दौ शुभैः दृष्टे स्त्र्याप्तिः पापेक्षितेऽन्यथा ॥ 1611

व्या - द्विपाद्राशौ लग्ने ईषदंशे स्थितोऽर्कश्चन्द्रसितदृष्टश्चेत् [4]स्त्र्याप्त्यै - कन्यालाभाय भवति । पापदृष्टे पापयुते वान्यथा उद्वाहविघ्नः ।

। सुरूपविरूपवधूप्राप्तियोगौ ।

शुभर्क्षमस्तं पश्येयुः सौम्याः केन्द्रत्रिकोणगाः । 1612

शुभां जायां लभेतासौ पापधिष्ण्ये विरूपिणीम् ॥ 1613

व्या - अत्र ससत्युक्तेर्विशेषः ।

। सदसज्जायाप्राप्तियोगौ ।

[A]केन्द्रत्रिकोणगोऽर्कस्ससमभवनं शुभग्रहस्य यदि । 1614

सज्जायां लभतेऽसौ पापर्क्षे [5]विगतरूपां च ॥ 1615

---

1. T1 युग्मर्क्षत:°
2. T2 त्रिपाल्लग्ने
3. T2 स्त्र्यवाप्त्यै
4. T सत्याप्त्यै for स्त्र्याप्त्यै
5. T वगतरसां च

A द्र. आ.स. ३१ केन्द्रत्रिकोणगा वा ससमभवनं शुभग्रहस्य यदि ।
तज्जातीयां लभते पापर्क्षे विगतरूपां च ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। विवाहयोगाः ।

[1A]गुरुरविसौम्यैः दृष्ट[2]स्त्रिसुतमदायारिगश्शशी लग्नात् । 1616
[3]भवति च विवाहकर्ता त्रिकोणकेन्द्रेषु वा सौम्याः ॥ 1617
[4]स्त्रीराशौ [5]स्त्र्यंशके लग्ने कन्याप्त्यै सौम्यखेचराः । 1618

। वधूवरयोर्वरवधूप्राप्तियोगाः ।

चतुरस्रे त्रिकोणे वा केन्द्रे वा शुभखेचराः ॥ 1619

व्या - कन्याप्त्यै भवेयुरित्यनुषङ्गः ।

वरलाभोऽपि कन्यानामेवं स्यादिति सूरयः । 1620
[6]युग्मोजर्क्षे गते मन्दे लभ्यालभ्या वरस्त्रियः ॥ 1621

व्या - लग्नाद्युग्मर्क्षगते मन्दे वरस्य कन्या लभ्या, विषमर्क्षगते न लभ्या । ओजर्क्षगते मन्दे स्त्रियो वरो लभ्यः, युग्मर्क्षगते न लभ्य इति ।

॥ इति कन्यालाभादिप्रकरणम् ॥

। अथ सन्ततिप्रकरणम् ।

। अल्पसन्ततियोगः ।

[B]कन्यालिवृषभसिंहाः पञ्चमगा यस्य सूतिसमये तु । 1622
तस्याल्पसुतत्वं स्याच्चन्द्रे तत्र स्थिते वापि ॥ 1623

। अपत्यप्राप्तिनाशयोगौ ।

पुत्र[7]स्थाने वीर्यभाजि ज्ञशुक्रे
दोषानाथे स्वाधिपैर्युक्तदृष्टे । 1624

---

1. T2 पाठः T गुरवि°
2. T स्त्रीसुतमान्दाया°
3. T भवति विधिवाहकस्त्रिकोण केन्द्रेषु च सौम्यः ।
4. T1 स्त्रीराशौ .... सौम्य° इत्यन्तं ग्रन्थपातः ।
5. T स्त्र्यंशालग्ने
6. T युगाजर्क्षे
7. T °स्थान

A द्र.ष.प ७.२ गुरुरविसौम्यैर्दृष्टस्त्रिसुतमदायारिगः शशी लग्नात् ।
भवति च विवाहकर्ता त्रिकोणकेन्द्रेषु वा सौम्याः ॥
B द्र.प्र.अ.प. १७-२८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुत्राः प्रष्टुः सन्ति [1]दीर्घायुषो ये

तैः [2]सन्त्यक्तै र्वीक्ष्यतेऽपत्यनाशः ॥ 1625

। अपत्यसहितत्वज्ञानम् ।

शुक्रार्केन्दुकुजैः स्वांशस्थितैर्लग्ने सुतेऽपि वा । 1626

जीवे स्थिते तदा [A3]प्रष्टुस्सापत्यत्वं स्मृतं बुधैः ॥ 1627

व्या - शुक्राद्यैः स्वनवांशस्थैर्लग्नसुतान्यतमस्थे जीवे प्रष्टुरपत्यस्यास्तित्वं बुधैः स्मृतमिति ।

। गर्भिणीभार्याचिन्ता ।

लाभपञ्चमगैः सौम्यैः [4]प्रष्टुः स्याद्गर्भिणी वधूः । 1628

आरूढे लग्नगे वापि बुधयुक्ते तथा वधूः ॥ 1629

। अत्र सारसङ्ग्रहः ।

इन्दौ मान्दियुते शुभे यदि शुभै[5]र्धीधर्मगैर्वा सिते । 1630

लग्नारूढगते सुते च मदगे भार्या भवेद्गर्भिणी ॥ इति । 1631

। भ्रूणस्य गर्भकोशे स्थितिकालज्ञानम् ।

पुत्रस्थानाधीश्वरो [6]यावता वा काले नाशं प्राप्नुयात्खेचरेन्द्रः । 1632

[7]तावानस्मिन् कीर्तितो गर्भसंस्थः कालः स्त्रीणां प्रश्नशा[8]स्त्रार्थविद्भिः ॥ 1633

इति ।

व्या - पाठसौकर्याय [9]सारसङ्ग्रहो लिख्यते ।

। पुत्रविनाशचिन्ता ।

व्या -'सत्पुत्रेण पितॄणाम्'

पापैः पञ्चमसंस्थैः पुत्रविनाशं वदेत्तथा विबलैः । 1634

[10]पुत्रमृतिं च विदद्यात्पञ्चमगः क्षितिसुतस्तथाष्टमपः ॥ 1635

1. T दीर्घायुदोषा
2. T येतैस्तु सत्यक्ता वी°
3. T °पत्य°
4. T पृष्टः
5. T धीधर्मगै°, T2 धीर्घगै°
6. T यावता सं काले
7. T1 तावास्मिन्
8. T1 शास्त्रार्थविधीविद्भिः
9. T सारसङ्ग्रहे
10. T पुत्रमिति चं

A. अत्र व्याख्यानुसारेण शोधितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। पुत्रप्राप्तिसिद्धिभार्यायोगौ ।

सौरः कर्कटके सुते यदि गतः पुत्रा भवेयुर्नृणाम्
शुक्रार्कावनिजास्सुतान्विदधते तद्व[1]द्विभार्यापतिम् । 1636

। ग्रहवशादधिकाल्पसन्ततिचिन्ता ।

चन्द्रेड्यौ बहुकन्यकां जनय[2]तः पुत्राननल्पान्बुधः
स्वल्पापत्यकरः स्मृतः शशी [3]शशिगृहेऽप्येवं विशेषाः स्मृताः ॥ 1637

। अल्पपुत्रयोगः ।

पापाः पञ्चमगाः स्वभे यदि सुतान् कुर्वन्ति [4]पुत्राल्पताम्
सौम्याः स्वर्क्षगताः सुतेऽळिहरिगोकन्याश्च पुत्राल्पताम् । 1638

। अधिकस्त्रीसन्ततिज्ञानम् ।

गोकन्याहरिवृश्चिकेष्वपि शशी तद्वत्सुतेऽन्यत्र वा
कन्यायां हिमगौ सुते च हिबुके कन्याबहुत्वं वदेत् ॥ 1639

। सुतकरादियोगाः ।

ओजर्क्षेऽपि तदंशके हिमकरः [5]पुत्रैकदृष्टो यदा
पुत्रासिद्धिकरः सुते मदपतिः स्त्रीपुत्रहा दुर्बलः । 1640
भार्येशो बलवान् सुते सुतकरः पुत्रेश्वरश्चास्तभे
लग्ने चापि सुतप्रदश्च सुतभे सौम्यादृते केचन ॥ 1641

। पुत्रप्राप्तिकालपुत्रस्वरूपादियोगाः ।

द्रष्टा योगि[6]खगोऽधिपश्च सुतभे यः कारकः स्याद्ग्रहः
तेषामेव दशागमे बलभृतः स्या[7]त्पुत्रलाभस्तदा । 1642

1. T °पताम् T1 °द्विभार्यादित्वतां T2 °द्विभार्यादित्मताम्
2. T °न्तः पुत्रोनतो
3. T सुगृहे, T1 सुहे
4. T पुत्राक्षितम् for पुत्राल्पताम्
5. T पुत्रे°
6. T °खरो°
7. T1 °पुंलाभ°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यावन्तोऽत्र नवांशकाः सुतगृहे भुक्ताः सुतास्तादृशाः
भुक्तैर्वा सुतभेन जीवसुतभे वा स्युर्बलिष्ठैः फलैः ॥ 1643

। स्त्रीपुंसन्ततिसङ्ख्याज्ञानम् ।

यावन्तः पुरुषांशकाः सुतगृहे पुत्रेशभुक्ताश्च [1]वा
स्त्र्यंशाश्चापि सुतास्त्रियश्च कथिताः सौम्येक्षितांऽशाधिपाः । 1644
पुत्रेशः पुरुषग्रहः पुरुषभे पुंराशिभागे [2]स्थितः
पुंस्पुत्रान् जनयेद्बहून् फलवशात् तद्व्यत्यये कन्यकाः ॥ 1645

। ग्रहयोगान्निमित्ताच्च गर्भिणीभार्याज्ञानम् ।

चन्द्रे मान्दियुते शुभे यदि शुभैर्धीधर्मगैर्वा सिते
लग्नारूढगते सुते च मदगे भार्या भवेद्गर्भिणी । 1646
दृष्टा चेद्यदि गर्भिणी च शिशवः [A]स्पृष्टे तु हस्तोदरे
मेघे [3]गर्जति बालमाश्लिषति वा प्रश्ने च गर्भोद्भवे ॥ 1647

। गर्भस्रावज्ञानम् ।

एकः केन्द्रगतो रवीन्दुवनिजेष्वार्यो बहिष्कण्टकात्
पापो रन्ध्रगतोऽथवास्तमयगो गर्भस्रवः स्यात्तदा । 1648
जीवः केन्द्रगतोऽष्टमोदयगतौ भौमार्कजौ चेत्तदा
विश्लेषे शिशुभिः करस्थमखिलं देहान्मलं वा त्यजेत् ॥ 1649

। औरसपुत्रचिन्ता ।

गुरुवर्गे शुभदृष्टे [4]शुभयुक्ते [5]चौरसो भवेत्पुत्रः । 1650
लग्नाच्चन्द्रादथवा बलिनः सुतभे शुभर्क्षे च ॥ 1651

---

1. T °श्च पाः
2. T स्थिवा
3. T गभर्जति
4. T2 शुभयुक्ते इति ग्रन्थपातः
5. T चौरसा

A T अत्र वर्णत्रयलेखनपर्याप्तस्थानं परित्यक्तम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। बहुकन्याबहुपुत्रयोगौ ।

[A]सितशशिवर्गे धीस्थे ताभ्यामपि संयुते च दृष्टे वा । 1652
प्रायो बहुकन्याः स्युः समराशिगतेऽन्यथा पुत्रः ॥ 1653

। पौनर्भवपुत्रज्ञानम् ।

[B]शनिवर्गस्थे चन्द्रे शनियुक्ते पञ्चमे सदा राशौ । 1654
रविशुक्राभ्यां दृष्टे पुत्रः पौनर्भवो भवति ॥ 1655

। जातपुत्रमरणयोगः ।

[C]भौमः पञ्चमसंस्थो जातं जातं विनाशयति पुत्रम् । 1656
दृष्टो गुरुणा प्रथमं शुक्रेण च न [1]सर्वदृष्टश्च ॥ 1657

। पुत्रहानिशुभयोगौ ।

जीवसितस्य च राशेः पञ्चमभे पापसंयुते भवति । 1658
पुत्रविनाशं विद्यात्सौम्यक्षेत्रं तु सुशुभं स्यात् ॥ 1659

। पुत्रसन्तत्यभावयोगः ।

[D]पापैर्बहुभिर्युक्ते पापर्क्षे पञ्चमे सदा राशौ । 1660
जातोऽपुत्रः पुरुषः सौम्यग्रहदर्शनान्मुक्ते ॥ 1661

। दासीपुत्रज्ञानम् ।

[E]शुक्रनवांशे धीस्थे शुक्रेण निरीक्षिते बहून् पुत्रान् । 1662
दासीपुत्रान् प्रवदेच्चान्द्रादपि केचिदाचार्याः ॥ 1663

। वंशच्छेदकरपुत्रचिन्ता ।

[F]व्योम्नि शशी भृगुरस्ते पापास्सुखगा यदा तदा जातः । 1664
वंशच्छेत्ता जातस्सुतभे गुरुदृष्टियोगपरिहीने ॥ 1665

---

1. T सर्पदृष्ट°

A द्र.सा. ३४-३९
B द्र.सा ३४-३४
C द्र.सा. ३४.४१
D द्र.सा. ३४-३७
E द्र.सा. ३४-३८
F द्र.सा. ३४.४० तथा द्र.प्र.अ.प १७-४१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। पुत्रमुखदर्शनात्पूर्वं मरणस्य चिन्ता ।

[A]लग्ने शशी निविष्टे सूर्ये प्राप्ते गुरौ शनिक्षेत्रे । 1666
पापैः त्रिकोणसंस्थैः पुत्रमुखात्पूर्वमेव निधनं स्यात् ॥ 1667

। केवलपुत्रमुखदर्शनयोगः ।

[B]पञ्चमराशौ सौम्ये भौमयुते बन्धुभेऽथवा लग्ने । 1668
पापैर्नवमं प्राप्तैः पुत्रमुखं दृश्यते न तु प्राप्तः ॥ 1669

। वंशच्छेदकरयोगान्तरम् ।

लग्ने सुरेड्यशशिनौ सप्तमसंस्थे कुजे न सौम्ये च । 1670
पापैः पाताळस्थैर्वंशच्छेत्ता भवेज्जातः ॥ 1671

। कालान्तरोत्पन्नपुत्रचिन्ता ।

[C1]भौमविलग्ने जातस्याष्टमभवनस्थिते [2]दिनेशसुते । 1672
[3]सूर्ये चापि सुतर्क्षे पुत्रः कालान्तरे भवति ॥ 1673

। वंशच्छेदकरपुत्रयोगान्तरम् ।

[D]लग्नव्ययनिधनस्थैः पापैर्युते भवेत्सुते चन्द्रे । 1674
[E4]लग्नसुतरन्ध्ररिष्फेष्वशुभाः कुर्वन्ति वंश[5]विच्छित्तिम् ॥ 1675
[F]बुधभार्गवयोरस्ते सुतगे पापे गुरौ सुतस्थेऽपि । 1676
वंशच्छेत्ता जातश्चन्द्रान्निधनस्थिते दिनेशसुते ॥ 1677

---

1. T भौमे
2. T दिनेशे
3. T1 मातृकायां सूर्ये चापि इत्यारभ्य तस्मात्पञ्चमपङ्क्तौ गतदिनेशसुते इत्यन्तं द्विवारं लिखितम् ।
4. T लग्ने
5. T2 पाठः, T °विच्छिन्ति

A द्र.प्र.अ.पा. १७.५५ विनिष्टे for निविष्टे इति विशेषः ।
B द्र.प्र.अ.प. १७.५६
C द्र.प्र.मा १७.५७ भौमविलग्ने तथा दिनेशसुते इति उभयत्रापि समस्तपदं आर्याछन्दसो रक्षणाय कृतम् ।
D द्र.प्र.अ.प. १७.४२ पापैस्सुतो for पापैर्युते इति मन्ये ।
E अत्र लग्नसुत इति गीतिच्छन्दसो रक्षणाय कृतम् ।
F द्र.प्र.अ.प. १७-४८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। वंशक्षयकरपुत्रयोगः ।

[A]रन्ध्रेश्वरे सुतस्थे लग्ने पापे स्थिते विधौ सुतगे । 1678
सुतभेशे बलहीने जातो वंशक्षयं [1]नरो याति ॥ 1679

। पितुर्गुणाधिकपुत्रजननयोगः ।

शुभकिरणसमूहैः सन्ति चेत्तस्य पुत्राः
पितु[2]रधिकतया स्यात् ज्ञानसामर्थ्ययोगात् । 1680
अशुभकिरणसंस्थैः पञ्चमस्थैर्विहीनै-
र्भवति [3]हीनकुले वा स्वे कुले चाशु जन्म ॥ 1681

। परजायासु सन्ततियोगः । तस्य गृहद्रव्यप्राप्तिचिन्ता च ।

शुभोऽपि बलवान् खेटो जीववर्गमृते स्थितः । 1682
स्वोच्चक्षेत्रगतो वापि [4]परजायासु पुत्रदः ॥ 1683
अशुभशुभैः सम्मिश्रे [5]चन्द्रे गृहद्रव्यभा[6]ग्बलाधिक्यात् । 1684
[7]विपरीतं ब्रूयाच्चन्द्रगृहे [8]पापसौम्याभ्याम् ॥ 1685

। दत्तकपुत्रचिन्ता ।

[B]मान्दं सुतर्क्ष[9]मिन्दुर्निरीक्षते यदि शनैश्चरेण [10]युतम् । 1686
दत्त[C]कपुत्रोत्पत्तिः क्लीबस्य बुधस्य चैवं स्यात् ॥ 1687
[D]सप्तमभवने कौजे सौरयुते शीतगौ विलग्नस्थे । 1688

---

1. T न करो याति
2. T °रधिगतयो
3. T हीनपुरे व
4. T वरजाया°
5. T चन्द्रग्रहे
6. T1 °फलाधिक्यात्
7. T1 विफलितं
8. T पापसौधाभ्यानाम्
9. T °मिन्दुं
10. T युते

A द्र.प्र.अ.प. १७-५४ लग्नेश्वरे सुतस्थे इति विशेषः ।
B द्र.प.अ.प १७.३३ तथा द्र.सा. ३४-२९ अत्र चतुर्थे चरणे क्रीतश्च बुधस्य इति विशेषः ।
C अत्र आर्याच्छन्दसो रक्षणाय दत्तक इत्यत्र 'क' इति मया पूरितम् ।
D अत्र सप्तमभवने इति एकस्य श्लोकस्य पूर्वार्धं लोहितदृष्टे इत्यपरस्य श्लोकस्य उत्तरार्धं लेखकप्रमादजन्यमिति मत्वा तत्समानसारावलीश्लोकद्वयं लिखितम् । द्र.सा. ३४.३०-३१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोहितदृष्टे वाच्यो जातस्य युतो समः पुत्रः ॥ 1689

सप्तमभागे कौजे सौरयुते पञ्चमे सदा भवने । 1690

कृत्रिमपुत्रं विद्याच्छेषग्रहदर्शनान्मुक्ते ॥ 1691

वर्गे पञ्चमराशौ सौरे सूर्येण वात्र संयुक्ते । 1692

लोहितदृष्टे वाच्यो जातस्य सुतोऽधमः प्रायः ॥ 1693

। गूढोत्पन्नपुत्रचिन्ता ।

[A]चन्द्रे भौमांशगते [1]धीस्थे मन्दावलोकिते भवति । 1694

गूढोत्पन्नः पुत्रः शेषग्रहदर्शनान्मुक्ते ॥ 1695

। अपविद्धपुत्रज्ञानम् ।

[B]तस्मिन्नेव च भौमे [C2]शनिवर्गस्थे निरीक्षिते रविणा । 1696

पुरुषस्य भवति [3]पुत्रोऽपविद्ध इति कण्वमुनिवचनम् । 1697

। पितृकार्यकरणयोग्यपुत्रज्ञानम् ।

पितृजन्माष्टमराशौ [4]तदधीश्वरे जातः । 1698

तेन सुतेन समस्तं [5]पितृकार्यं कारयेत्प्राज्ञः ॥ 1699

। दत्तकादिसुतचिन्ता ।

[6]पितृगेहे स्थितः कश्चित् परिपूर्णबलो यदि । 1700

अदृष्टः सूनुनाथेन तदा दत्तादयः सुताः ॥ 1701

। पुत्रोत्पत्तिकालचिन्ता ।

गुरुलग्नेशदारेशसुतेशानां यदा दशा । 1702

---

1. T धीस्थे इति द्विवारं लिखितम् ।
2. T शनिर्वर्ग°
3. T पुत्रोऽवविद्ध
4. T तदादीश्वरे
5. T1 पितृकारं
6. T पितृगृहः for पितृगेहे

A द्र.सा. ३४.३२. तथा द्र.प्र.अ.प. १७-३९

B द्र.सा. ३४.३३

C अत्र शनिवर्गस्थे इत्येव छन्दसः अनुकूलं भवति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुत्रलाभं तदा [A]ब्रूया[1]दपहारे तथैव च ॥ 1703

। पुत्रयोगाः ।

[B]लग्न[2]पुत्रकलत्रेशयोगेशस्य दशा भवेत् । 1704
[3]सुतयुक्तेक्षकेशानां पुत्रसिद्धिस्तदा भवेत् ॥ 1705
लग्नात्मजेशौ संयुक्तावन्योन्यं वाभिवीक्षितौ । 1706
क्षेत्रे परस्परस्थौ वा पुत्रयोगा इमे स्मृताः ॥ 1707

। पुत्रसिध्यसिद्धिचिन्ता ।

[C]एवं निरूप्य बहुधा दि तैस्तै-?
र्योगैस्सुतासुतकरैर्विबलैर्बलिष्ठैः । 1708
पुत्रोद्भवं च तदभावविशेषणं च
ज्ञात्वा [4]वदेत्तदुभयं स्वगुरूपदेशात् ॥ 1709

। स्त्रीधनपुरुषधनप्रासियोगौ ।

स्त्रीराशौ मित्रभवने स्थितश्च पुरुषग्रहः । 1710
यदि विद्याद्धनं स्त्रीभ्यो ह्यन्यथा पुरुषाद्वदेत् ॥ 1711

। बहुपुत्रपौत्रयोगः ।

जीवोदये शुक्रबुधोदये वा सुकण्टके पुत्रशुभायगे वा । 1712
प्रश्ने यदि स्याद्बहुपुत्र[5]पौत्रान्प्रष्टा चिरात् संलभते मनुष्यः ॥ 1713
[6]गुरुरपि सौम्यैः दृष्टः ---------------- ? 1714

। विवाहकृद्योगः ।

गुरुरविसौम्यैर्दृष्टस्त्रिसुतमदायारिगः शशी लग्नात् ।

1. T दपरेन
2. T1 पुत्रकयोगे for पुत्रकलत्रेशयोगे
3. T सुतयुक्तेषु केना
4. T1 तदेतदुभय
5. T °पोत्रां ष्टुन्दिरा°
6. T1 गुरुरवि

A द्र.प्र.अ.प १७.६४ तत्र चतुर्थचरणे अपहारे इति अस्ति ।
B द्र.प्र.अ.प १७.६५
C अत्र वसन्ततिलकावृत्ते जगणः नष्टः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लग्नोपच[1]यगः शुक्रो बली शुभयुतेक्षितः । 1715
समावृत्तिसमीपे च दायदस्स विवाहकृत् ॥ 1716

। विवाहद्वययोगः ।

एकादशे [2]ग्रहद्वित्वे द्वौ विवाहौ वदेत् स्फुटम् । 1717
तयोश्शुभाशुभत्वेन [3]तच्छुभाशुभतोह्यताम् ॥ 1718

। भार्याभर्तृदोषेण सन्ततिनाशयोगौ ।

लग्ने पापा यदि चेद्भार्यादोषेण सन्ततिविनाशः । 1719
आरूढे यदि पापा भर्तुर्दोषेण [4]वा तयोरधिपौ ॥ 1720

। पुंलिङ्गावयवाः ।

केशनखद्विजकुक्षिस्तनभुजनाभ्यूरुमूर्धभगचरणाः । 1721
ज्ञेयाः पुंलिङ्गाख्याः क्षिप्रं पुत्रार्थलाभकराः ॥ 1722

। स्त्रीलिङ्गावयवाः ।

ग्रीवाग्रनासाङ्गुळिजङ्घाहनुकर्णयुगपाळयश्च । 1723
पार्ष्णिक्रोडा नार्यो सिद्धिदा दीर्घकालेन ॥ 1724

। नपुंसकलिङ्गावयवाः ।

मुखवक्षमेढ्र[5]जानूदरशिरोललाटदेशाश्च । 1725
एते नपुंसकाख्याश्चामर्शे निष्फलाः प्रोक्ताः ॥ 1726

। प्रश्नकालिकचन्द्रात् प्रसवकालीनचन्द्रज्ञानम् ।

तत्कालेन्दु[6]नवांशद्वादशभागे विनिर्दिशेच्चन्द्रम् । 1727
क्षणिकेन्दुसंस्थितांशक्षेत्रेन्दुं विनिर्दिशेत्प्रसवे ॥ 1728

। प्रश्नकालीनगुळिकराहुभ्यां प्रसवलग्नादिनिर्णयः ।

तत्कालगुळिकयुक्तं राशिं ब्रूयादहिस्थितांशं वा । 1729

1. T1 °यरश्शुक्रो
2. T ग्रहं
3. T तश्शुभाशुभदो°
4. T तातयौरधिपौ
5. T °जानूदरे शिदरशिरो° for °जानूदरशिरो°
6. T1 °नवांशभागे° for °नवांशद्वादशभागे°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लग्नगतत्रिंशांशप्रमाणमपरे वदन्ति सन्निशोः ॥ 1730

व्या - इत्येतदन्तं सारसङ्ग्रहः ।

॥ इति पुत्रोत्पत्तिप्रकरणम् ॥

॥ अथ कन्यापुंविभागः ॥

व्या - [A1]'ओजर्क्षे पुरुषांशकेषु' इत्यादिश्लोकाश्चिन्त्याः ।

। शनेः पुत्रकन्याजननचिन्ता ।

लग्नं हित्वा विषमे शनैश्चरः पुत्रजन्मदो भवति । 1731

[B]समर्क्षे मन्दे चेत्कन्याराश्यंशकयोर्विपर्यये बलवशात् ॥ 1732

॥ स्त्रीपुंविभागः ॥

स्यात्पुंवर्गे लग्नगे वीर्ययुक्ते सूतिः पुंसः [2]सद्ग्रहालोकिते च । 1733

युग्मे [3]नार्यः स्त्रीग्रहालोकभाजि [4]ज्ञोपेते तु स्त्री भवेद्गर्भयुक्ता ॥ 1734

सौम्योपेतस्सौम्यदृष्टोऽष्टमर्क्षे[5]छायानाथः पङ्कजानां यदि स्यात् ।1735

[6]तस्माद्देहादन्यदेहं तदानीं प्रासो वाच्यः प्रश्नकाले [7]प्रवक्त्रा ॥ 1736

॥ इति कन्यापुंविभागः ॥

॥ [8]अथ जलागमः ॥

। प्रवृष्टियोगाः ।

स्मरे रवीन्दोर[9]च्छार्की लग्नात्पुत्राष्टगौ तु [10]वा । 1737

1. T1 ओजक्षेत्र
2. T संग्रहा°
3. T नार्या
4. T2 ज्ञोसिते
5. T स्थायानाथः
6. T °स्मादेहा°
7. T प्रवक्ता
8. T2 अथ जलागम इत्यधिकः पाठः
9. T °च्छाकी
10. T सा

A द्र.बृ.जा ४.११

B इदं किं पद्यपादः किंवा व्याख्या इति सन्देहः । T समर्क्षे मन्दे कन्याजन्मेति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]धनाम्बुगौ तु तौ वा चेत्प्रवृष्टिः स्यान्न संशयः । 1738

व्या - प्रवृष्टि[2]रूपास्त्रयो योगाः ॥

। वृष्टियोगः ।

कर्किमीनमृगेष्विन्दौ लग्नस्थे [3]भृगुजेऽपि वा । 1739

जलर्क्ष[4]स्थैः शुभैर्वृष्टिः केन्द्रसोत्थार्थगैस्तु वा ॥ 1740

व्या - कटकमीनमकरेषु चन्द्रे लग्नस्थे सति वृष्टिः स्यात् । एतेषु शुक्रे वा लग्नस्थितेऽपि वृष्टिः । जलराशिगतैः शुभैः स्थितैः, पक्षे केन्द्रद्वितीयतृतीयस्थैर्भूयसी वृष्टिरिति । कटकादिषु केन्द्रस्थे शुक्रे वापि वृष्टिः ।

। पुनर्वृष्टियोगः ।

सोत्थार्थौ तोयनामानौ यद्वा तत्र जलग्रहौ । 1741

जलसञ्ज्ञद्रव्यदृष्ट्या वा [5]वृष्टिपातो भवेत् ध्रुवम् ॥ 1742

व्या - तृतीयद्वितीयराशी जलनामानौ । जलराशिश्चेत् वृष्टिरित्येको योगः । यद्वेत्यपरः । जलसञ्ज्ञद्रव्यदर्शने च वृष्टिरित्यर्थः । 'जलमम्बुह्रिबेरमि'त्यादि ।

॥ जलसञ्ज्ञितद्रव्याणि जलराशि[6]ग्रहाद्विभजते ॥

कर्क्यन्त्यौ मकरकुम्भौ गोऽळितौल्यः पदक्रमात् । 1743

चन्द्रा[7]च्छावम्मयौ ज्ञेड्यौ तोयगावितरेऽन्यथा ॥ 1744

व्या - पदक्रमात् पूर्ण[8]पादोनार्धपादजलात्मका इत्यर्थः । अम्मयौ - जलमयौ जलात्मक[9]ग्रहाविति यावत् । तोयगौ - जलराशिस्थौ । बुधगुरू जलग्रहौ । इतरे राशयो ग्रहाश्चान्यथा शुष्का इत्यर्थः ।

---

1. T धनाम्बुगौ तौ वा प्रवृष्टिस्यात् । प्रवृष्टिरूपास्त्रयोयोगाः
2. T °यूपा°
3. T तथा T1 भृगुरुजो
4. T °क्षास्य°
5. T2 वृष्ट्या वातो भवेत्°
6. T °गृहा°
7. T2 पाठः, T °छानौ मयौ, T1 °छावौ मयो, द्र. व्या.
8. T °पादेना°
9. T °ग्रहा°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। वर्षाकाले वर्षणयोगाः ।

[A1]स्मरे बुधार्कौ चन्द्राच्छौ वेश्मगौ वापि लग्नभात् । 1745
[2]द्वित्र्यष्टमस्थिता वापि वर्षासु जलदौ स्मृतौ ॥ 1746

व्या - स्फुटः ।

[B]प्रावृषी[3]न्दुः सितात्सप्त[4]राशिगः शुभवीक्षितः । 1747
[5]मन्दात् कोणास्तगतो यदि वा वृष्टिकृद्भवेत् ॥ 1748

व्या - [C]'वर्षप्रश्ने सलिलनिचयं राशिमाश्रित्य च' इत्यादि च ।

॥ इति जलागमः ॥

॥ [6]अथ क्षिप्तचिन्ता ॥

। भूगतनिधिशल्यज्ञानम् ।

लाभे केन्द्रेषु वा सौम्या धनव[7]द्गृहमादिशेत् । 1749
सौम्यासौम्ययुते भागे धनं [8]शल्यं च कीर्तयेत् ॥ 1750

व्या - 'द्वारं चास्य [9]पदं वदेत्' इति च ।

। निधिप्राप्त्यप्राप्तिचिन्ता ।

धिष्ण्ये [10]समग्रेऽप्युदिते विलग्ने विनिर्गते चन्द्रमसोऽपि यद्वा । 1751
[11]प्राप्तिर्निखातस्य भवेत्तदानीं कृते वियुक्ते [12]द्रविणस्य नैव ॥ 1752

---

1. T समरे
2. T1 द्वत्यष्टम°
3. T °न्दुस्थितात्
4. T सप्तराशि
5. T मन्दार्कि°
6. T2 अथ क्षिप्तचिन्ता इत्यधिकः पाठः
7. T °द्ग्रह°
8. T शिल्यं
9. T2 एवं for पदं
10. T1 पाठः T °सोग्रे इत्यस्फुटम् ।
11. T प्राप्तिनि°
12. T द्रविणस्य नेव, T1 द्रविकोणस्य नेव

A अनुष्टुभ्वृत्तरक्षणमभिमतार्थसिद्धिश्च ''स्मरे'' इति करणेनैव सिध्यति ।

B द्र.प्र.अ.प. २१-२९ शुभेक्षितः प्रावृषि शीतरश्मिर्भृगोः सुतात्सप्तमराशिवर्ती । यद्वार्कपुत्रान्नवपञ्चमस्थः स्मरस्थितो वापि जलागमाय ॥ सप्तराशिगः सप्तमराशिग इत्यर्थः । तथा कोणास्तभगतो इति मन्ये ।

C द्र.प्र.अ.प २१-२५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। भूगतनिध्यदर्शनयोगः ।

कर्मण्यम्बुनि लग्ने वा [1]दुश्चिक्ये [2]वा त्रिकोणयोः । 1753

यदि सन्ति शुभास्तत्र द्रव्यं स तु न पश्यति ॥ 1754

॥ इति क्षिप्तधनचिन्ता ॥

॥ [3]अथ नष्टलाभप्रकरणम् ॥

। नष्टवस्तुलाभज्ञानम् ।

[A]पूर्णः शशी लग्न[4]गतः शुभो वा शीर्षोदये सौम्यनिरीक्षितश्च । 1755

नष्टस्य लाभं कुरुते [5]तदाशु लाभोपयातो बलवान् शुभश्च ॥ 1756

। नष्टद्रव्यस्थानस्य चोरस्य च निर्णयः ।

[B]स्थिरलग्ने स्थिरांशे वा वर्गोत्तमगतेऽपि वा । 1757

स्थितं तत्रैव तद्द्रव्यं [6]स्वकीयेनैव [7]चोरितम् ॥ 1758

। द्रेष्काणात् द्रव्यस्थितदेशचिन्ता ।

[C]आदिमध्यावसानेषु द्रेष्काणेषु विलग्नतः । 1759

द्वारदेशे तथा मध्ये गृहान्ते च वदेद्धनम् ॥ 1760

व्या - स्पष्टाः ।

। पुनर्नष्टलाभचिन्ता ।

[A8]वित्ते सोत्थे सुखे पुत्रे षष्ठे [9]वा चेच्छुभग्रहः । 1761

नष्टलाभं वदेदाशु समीपे तद्धनस्थितिम् ॥ 1762

1. T दुश्चित्के
2. T2 का for वा
3. T2 मातृकायाः उद्धृतं वाक्यम्
4. T °गतो
5. T तदाशुभ° for तदाशु
6. T स्वकीयेर्नैव
7. T चोरितः, T1 चोदितः
8. T विद्धे
9. T2 पाठः, T वापि शुभग्रह T1 वा चे शुभग्रहः

A द्र.ष.प ६.३ B द्र.ष.प ६.१ C द्र.ष.प ६.२

D अत्र वित्ते इति पदं द्राविडोच्चारणानुसारेण विद्धे इति लिखितम्, तदुत्तरलेखकेन अर्थरहितमिति मत्वा विद्धे इति परिवर्तितं भवेत्। तथा द्र.प्र.अ.प २३.५ तोये वित्ते विक्रमे पञ्चमे वा पष्ठे वा स्यात् खेचरेन्द्रः शुभश्चेत्। नष्टद्रव्यस्याशु लब्धिं तदानीं ब्रूयादस्यासन्नदेशस्थितिं च ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - नष्टद्रव्यस्य समीपदेशस्थितिं वदेदित्यर्थः ।

। नष्टद्रव्यगतदिग्योजनज्ञानम् ।

A[1]दिग्वाच्या केन्द्रगतैरसम्भवे वा वदेद्विलग्नर्क्षात् । 1763
मध्याच्च्युतैर्ग्रहैर्वा [2]नवांशकैर्योजना [3]वाच्याः ॥ 1764

व्या - [4]षट्पञ्चाशिकातोऽप्यस्यार्थः द्रष्टव्यः ।

। नष्टद्रव्यस्वरूपतस्करादिज्ञानोपायमाह ।

B[5]अंशकाज्ज्ञायते द्रव्यं [6]द्रेक्काणैस्तस्कराः स्मृताः । 1765
राशिभ्यः कालदिग्देशा [7]वयो जातिश्च लग्नपात् ॥ 1766

व्या - तस्य [8]प्रसङ्गो वृत्तिप्लवे द्रष्टव्यः ।

। नष्टद्रव्यगतस्य क्रोशहस्ताङ्गुलादिरूपसूक्ष्मप्रदेशज्ञानमाह ।

C[9]अर्काद्यंशे विच्युते वांशभागैः शैलेष्वङ्के ष्वब्धिसङ्ख्याक्रमेण । 1767
स्युर्गव्यूतिः क्रोशहस्तौ वितस्तिर्वाच्यं ह्येवं कीर्तयेदङ्गुलादीन् ॥ 1768

। चोरस्वरूपज्ञानमाह ।

द्रेक्काणा वा यत्स्वरूपा विलग्ने
तस्याधीशः खेचरो वापि यादृक् । 1769
वर्णे वेषे चेष्टिते वा कृतौ वा
तुल्यः स्तेनस्तेन निर्देश्य [10]एवम् ॥ 1770
नाम्ना सत्वेनौजसा वेषशीलाकारैश्चोरं तादृशं कीर्तयन्ति । 1771

॥ इति नष्टलाभप्रकरणम् ॥

---

1. T2 पाठः। T गिग्वाच्या
2. T1 वांशकैः for नवांशकैः
3. T वाच्यः
4. T षट्पञ्चकोऽपि तावस्यार्थो
5. T अंशकान् ज्ञायते
6. T द्रेक्काणाः
7. T1 पाठः, T अस्फुटं T2 रया
8. T1 प्रपञ्चो
9. T अर्काद्यंशेषच्युते खाद्विपादशैलेष्वकग्लादिसंख्याक्रमेण । स्युर्गम्यातिक्रोशहस्तादितस्तावितस्तद्वापि यादृक् । एवं T मातृकाश्लोके बहुशुद्धिं ग्रन्थपातं च दृष्ट्वा प्र. अ. प. श्लोकाः लिखिताः
10. T1 देव

A द्र.ष.प ६.४

B द्र.ष.प ७.१३

C द्र.प्र. अ.प २३.९-१०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ मिश्रप्रकरणम् ॥

। केन्द्रस्थानाच्चिन्तनीयानाह ।

च्युतिर्वि[1]लग्नाद्धिबुकाच्च वृद्धिर्मध्यात्प्रवासोऽस्तमयान्निवृत्तिः । 1772

वाच्यं ग्रहैः प्रश्नविलग्नकालात् गृहं प्रविष्टो हिबुके प्रवासी ॥ इति । 1773

। गमनागमनाभावज्ञानम् ।

लग्नाद् व्ययार्थगैस्सौम्यैश्चन्द्राद्वा न गमागमौ । 1774

व्या - चन्द्राद्व्ययार्थगैर्बुधगुरुशुक्रै[2]र्गमनमागमनं च नास्तीति वदेदिति ।

। भाववृद्धिहान्योर्ज्ञानम् ।

[A3]स्वामिमित्रैर्युते दृष्टे भावे वृद्धिः [4]परैर्विपत् । 1775

व्या - [5]वृद्धिर्भावस्येति विशेषः । परैः स्वामिनः शत्रुभिः पापैर्वा युते दृष्टे वा भावे विपत् [6]तद्भावस्येति शेषः ।

सौम्येऽपि वर्गे यदि वा [7]स्ववर्गे ऊर्ध्वमुखो यदि राशिः । 1776

। इष्टसिद्धियोगः ।

तुलागोकेसरिघटाः [8]शुभैः दृष्टा नभोगताः । 1777

यद्वोदयगता [9]नृणां बलिनः शुभदायकाः ॥ 1778

व्या - नभोगताः - [10]दशमभूताः । उदयगताः - लग्नभूताः ।

। नष्टलाभरोगोपशमनयोगौ ।

कर्किवृश्चिककन्याजा व्योमप्राप्ताः शुभेक्षिताः । 1779

नष्टार्थलाभं कुर्वन्ति [11]जीवयेयुश्च रोगिणः ॥ 1780

---

1. T °लग्नार्हिबुका°
2. T1 °र्गमन च for गमनमागमनं च
3. T सामिर्युति
4. T द्र.व्याख्या T परेद्रिवत्
5. T वृश्चि T1 हश्चि T2 पृश्चि
6. T2 लब्धाव°
7. T वास्य°
8. T शुभेर्दृष्टा
9. T1 न्यानां for नृणां
10. T दशमं
11. T1 जीययुश्च

A T मातृकायां सामि इति विलिख्य वर्णद्वयलेखनस्थानं रिक्तं विधाय युति इति लिखितं दृश्यते । अतो द्वितीयपादगत परपदानुकूलतया उत्तरवर्णगतरेफरक्षणदृष्ट्या च 'मित्रै' इति पदं स्थापितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मिथुनान्त्या[1]श्विमकरा व्योमप्रासाः शुभेक्षिताः । 1781
पापैरयुक्तादृष्टाश्चेन्नष्टलाभकरा इमे ॥ 1782

। सुखोपभोगचिन्ता ।

शुभग्रह[2]युतास्तस्मिंस्त एवोक्ताश्च राशयः । 1783
नृणां [3]भवन्ति भोगाय चतुष्टयविधानतः ॥ 1784

। जन्मफलप्रश्नफलयोः प्राबल्यदौर्बल्यचिन्ता ।

जन्मसमयोक्तफलतो यात्राकाले [4]विनिर्दिशेत् [5]प्रश्नात् । 1785
यात्राकालोक्तं च प्रश्नफलं दुर्बलमुषन्ति सर्वेषाम् ॥ 1786
एषां तुल्यविरोधे मृग्यं सम्यग्बलाबलं स्वधिया । 1787
पौर्वापर्यं बलयो[6]र्व्याप्यत्वं वा [7]फलैर्वाच्यम् ॥ 1788
अव्यक्तं प्रश्नफलं यस्मिंस्तत्र फलं न जन्मफलम् । 1789
यदि वा यात्राफल[8]मादेश्यं [9]संकुलं च दैववि[10]त्कुर्यात् ॥ 1790

व्या - इत्यादि [11]न्यायश्चिन्त्यः ।

॥ इति मिश्रफलप्रकरणम् ॥

। सूर्यादीनां रसाः ।

[A]'कटुलवणतिक्त[12]मिश्रिता [13]मधुराम्लौ च कषाय इत्यपि' । 1791

व्या - एते क्रमात् सूर्यादिग्रह[14]रसाः ।

---

1. T °न्त्याष्मिमकरा
2. T1 °स्तवोक्ता° for °स्तस्मिंस्त एवोक्ता°
3. T भवति भोगानि
4. T1 पाठः, T ''विनिर्दि'' इत्यत्र पत्रं खण्डितम् ।
5. T प्रश्नात्
6. T °र्वाप्यत्वं
7. T2 पाठः T फले
8. T °मादेघं, T1 °दूदेद्यं
9. T स कुलं
10. T1 °वितुर्यात्
11. T2 पाठः । T न्यायंश्च चिन्त्यः
12. T °मिश्रित
13. T1 मधुरानौ
14. T1 °रहाः

A द्र.बृ. जा २.१४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। भोजने रसविशेषचिन्ता ।

बलिनः केन्द्रयातस्य रसं भुक्तौ विनिर्दिशेत् । 1792
यद्वा तात्कालिकं प्रश्नं पश्यतो [1]बलिनो रसम् ॥ 1793

व्या - वदेदित्यनुषङ्गः ।

। रसनीरसपदार्थचिन्ता ।

[A]सौम्यर्क्षगतस्य रसः पापर्क्षगतस्य नीरसो वाच्यः । 1794
विपरीतगतैरेतैरग्रप्रासं न [2]भक्षयति भोक्ता ॥ 1795

। लग्नगतसूर्यादिग्रहवशात् स्वप्नदृष्टवस्तुचिन्ता ।

रव्यादिषूदयस्थेषु क्रमात्स्वप्नफलं वदेत् । 1796
[B]लग्ने रवौ दीप्तवह्निरक्त[3]वस्त्रादिदर्शनम् ॥ 1797
चन्द्रे नारी श्वेतवस्त्रश्वेतपुष्पादिदर्शनम् । 1798
भौमे विद्रुमहेमादिरक्तस्रावार्द्रमांसकम् ॥ 1799
बुधे खे गमनं योगो बन्धुभिः सह [4]वाक्पतौ । 1800
जलसन्तरणं शुक्रे तुङ्गारोहं वदेच्छनौ ॥ 1801

व्या - [5]रव्यादिषु मिश्रीभूय लग्नस्थेषु स्वप्नदृष्टमपि मिश्रं वदेत् ।

। दुःस्वप्नचिन्ता ।

रिपुनीचास्तविजितैः ग्रहैर्दुःस्वप्नमादिशेत् । 1802

व्या - तत्र विशेषः, अस्तमितैः स्वप्ने भङ्गो दृष्टो वाच्य इति ।

। स्वप्ने दृष्टवस्तुज्ञानं स्वप्नकालज्ञानं च ।

रविलग्ने शशिदृष्टे रविराशिस्ससमे विलग्नाद्वा । 1803
स्वप्ने दृष्टो वाच्यः प्रष्टुर्लग्नान्तरात्कालः ॥ 1804

---

1. T बलिनं
2. T1 भक्षयदि
3. T1 पाठः । T वस्त्रादिदर्श'' इत्यत्र पत्रं खण्डितम् ।
4. T1 पतौ for वाक्पतौ
5. T ख्यादिष्व°

A अत्र (त) (र्क्ष) इति अक्षरद्वयविन्यासः गीतिच्छन्दसी रक्षणार्थं कृतः ।
B द्र.प्र.र ५११-५१३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। सन्तति-वधूलाभचिन्ता ।

विषमस्थितेऽर्कपुत्रे सुतस्य [1]जन्माङ्गनायास्तु । 1805
[2]लभ्या नरस्य नारी समस्थिते चान्यथा वामम् ॥ 1806

। वर्षाकाले वृष्टिज्ञानमाह ।

चन्द्रार्कयोः ससमगौ सितार्की सुखेऽष्टमे वापि तथा विलग्नात् । 1807
द्वितीयदुश्चिक्यगतौ तथा च वर्षासु वृष्टिं प्रवदेन्नराणाम् ॥ 1808

व्या - '[A]चन्द्रार्कयोस्ससमगौ सितार्की' इति च । [B3]'स्मरे रवीन्द्वो[4]रच्छार्की' इत्यनेन सदृशोऽस्यार्थः । स च कथ्यते । यथासम्भवं चन्द्रार्कयोस्ससमगौ शुक्रमन्दौ [5]वृष्टिकरौ लग्नाद्यथासम्भवं चतुर्थाष्टमगतौ स्थानद्वये भवतः तावेव [6]सितार्की वर्षं कुरुतः । तथा लग्नात्तु द्वितीयतृतीयस्थौ च कुरुतः । तथा लग्नात् सौम्या जलराशिस्था इति च ।

॥ कीदृशी स्त्री पुरुषो वा [7]चिन्तित इति ज्ञानमाह ॥

[C]'कुमारिकां बालशशी', [D]'आत्मसमो लग्नगतैस्तृतीयगैर्भ्रातरः सुतः सुतगैः', [E]'जाया वा भगिनी वा', [F]'अस्ते रविसित[8]वक्रैः [9]परजायाम्' । [G]'चरलग्ने चरभागे मध्यात्' । [10]इत्यादिक[11]मत्रापि चिन्त्यम् ।

॥ तिष्ठति देशान्तर[12]गतो वेत्येतत् ज्ञानायाह ।

[H]सौम्ययुतोऽ[13]र्कः सौम्यैः सन्दृष्टश्चाष्टमर्क्षसंस्थश्च । 1809
तस्माद्देशा[14]दन्यगतः स वाच्यः पिता तस्य ॥ इति ॥ 1810

व्या - इत्यादियोगान्तरमप्यत्र चिन्त्यम् ।

॥ इति जम्बुनाथविरचिते सव्याख्ये प्रश्नसारसमुद्रे पञ्चमस्तरङ्गः ॥

---

1. T1 जन्माङ्गका°
2. T1 लभ्यां
3. T समरे
4. T °रचार्की
5. T दृष्टिकारौ T1 दृष्टिकारौ लग्नाद्यथा इति ग्रन्थपातः ।
6. T2 वितार्कि
7. T1 चन्तित
8. T °वक्त्रे
9. T1 सरजायां
10. T इति तत्र के for इत्यादिकं
11. T1 पाठः। T °मद्यापि
12. T °गतावित्ये°
13. T °र्शः for °र्कः
14. T °दन्यं गतस्य for दन्यगतः स T1 गतस्य इति ग्रन्थपातः ।

A द्र.ष.प ७.३ जलागमप्रकरणे नष्टस्य पद्यस्य व्याख्यामात्र दृश्यते । अतो मूलश्लोकः षट्पञ्चाशिकाया उद्धृत्य लिखितः ।
B पूर्वं जलागमप्रकरणपठितपद्यभागः । C द्र.ष.प ७.६ D द्र.ष.प ७-७ .
E द्र.ष.प ७.७-८ F द्र.ष.प ७.१० G द्र.ष.प ७.९ H द्र.ष.प ७-१२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। अथ षष्ठस्तरङ्गः ।

॥ अथ दशाविभागः ॥

॥ दशादिषु [1]वक्तव्यफलोपयोगित्वे[2]नाह ॥

भावाधीशे च भावे सति बलरहिते च [3]ग्रहे कारकाख्ये
पापान्तस्थे च पापैररिभिरपि समेतेक्षिते नान्यखेटैः । 1811
पापैस्तद्बन्धुमृत्युव्ययभवनगतैस्तत्त्रिकोणस्थितैर्वा
वाच्या तद्भावहानिः द्रुतमिह भवति द्वित्रिसंवादभावात् ॥ 1812

व्या - [A]'लग्नजन्माष्टम[4]पती'त्यादि फलानि लग्नेशादिबलफलादिभूयस्त्वं [5]विचार्य फलं वदेत् ।

। दीर्घमध्याल्पायुश्चिन्ता ।

[B]केसर्यधियोगाद्यैरायुर्योगैश्च दीर्घमायुः स्यात् । 1813
[6]ग्रहयोगादिभिरेवं मध्यः स्वल्पायुरपि चिन्त्यम् ॥ 1814

। सम्पज्ज्ञानम् ।

[C]श्रीमत्ता तु विचिन्त्या स्वोच्चक्षेत्रत्रिकोणसंस्थानाम् । 1815
बाहुल्यादपि समुदायाष्टकवर्गे व्ययात्फलाधिक्ये ॥ 1816
लाभ[7]गृहस्य च [8]सुनफामुख्यै[9]र्योगैर्धनासियोगाच्च । 1817
[10]वसुमद्योगाद्यैरपि योगकराणां बलाधिक्यात् ॥ 1818

। सुखदुःखज्ञानम् ।

[11]अथ सुखदुःखे ज्ञेये गुरुरविभृगुजन्मनां बलाबलतः । 1819
सदसद्ग्रहसंयोगप्रेक्षणवशतश्च यामिनीभर्तुः ॥ 1820

---

1. T1 वक्त° for वक्तव्य°
2. T1 सह for °नाह
3. T गृहे
4. T °वती°
5. T2 पाठः T निचार्य
6. T मातृकायामियं पंक्तिः नास्ति । प्र.अ.प. उद्धृतम् ।
7. T ग्रह°
8. T2 पाठः। T सनभा°
9. T °र्योगा वीक्षणवशाश्च
10. T मातृकायाम् इयं पङ्क्तिर्नास्ति
11. T मातृकायां श्लोकद्वयस्थाने यामिनी भर्तुः । लग्नेशजन्मपत्योमैत्रारित्वात् फलादिकानत्वात् । स्वसुहृद्भागे शनो भृगुदृष्टिर्दिवानिशोस्सुखकृत्'' एवं दृश्यते ।

A द्र.प्र.अ.प १५.२ B द्र.प्र.अ.प १५.५-१२४ C द्र.प्र.अ.प १५.६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लग्नेशजन्मपत्योर्मैत्रारित्वाद्बलाधिकोनत्वात् । 1821
स्वसुहृद्भागे शशिनो गुरुभृगुदृष्टिर्दिवानिशोः शुभकृत् ॥ 1822

। देहस्वास्थ्यचिन्ता ।

[A]अथ खलु देहस्वास्थं चिन्त्यं [1]कार्श्यं विलग्न[2]जन्मपयोः । 1823
चन्द्रस्य बलाबलतश्शेषाणां सदसदासिलक्षणतः ॥ 1824

। अवस्थाविशेषेषु शुभाशुभचिन्ता ।

अथ पूर्वमध्यमान्त्या[3]वस्थासु शुभाशुभत्वमवगम्यम् । 1825
केन्द्रादिभेषु सदसद्योगवशादष्टकवर्गज[4]फलानाम् ॥ 1826

। श्रेष्ठमानवकारणीभूतदेवानुकूल्यचिन्ता ।

[5]समुदायजन्मनामपि भूमाल्पतया बलोत्कटत्वाच्च । 1827
देवानुकूल्यमूह्यं वर्गोत्तमजन्मवेसिसौम्यवशात् ॥ 1828
केन्द्रत्रिकोणराशिषु सौम्यवशाल्लग्नचन्द्रकेन्द्रेषु । 1829
कारकखेटवशादपि [6]वसुमद्योगादिभिश्च रुचकाद्यैः ॥ 1830

। भाग्यवच्छ्रेष्ठमानवयोगः ।

[B]भाग्याधिपो विलग्ने [7]दुश्चिक्ये वापि धर्मगो वापि । 1831
[8]बलवान् स्वोच्चगतो वा येषां ते मानवाः श्रेष्ठाः ॥ 1832

---

1. T1 पाठः । T कार्य
2. T °जन्मभयोः
3. T1 पाठः °मान्त्यावस्थासु T तत्र पत्रं खण्डितम्
4. T °बलानाम्
5. T ग्रन्थपातः । °वि for समुदाजन्मनामपि
6. T वसुमत्° for वसुमद्यो ....काद्यैः
7. T1 पाठः °न्दुश्श्रितेके T पत्रं खण्डितम्
8. T बहूर्वा

A द्र.प्र.अ.प १५.१०-१३

B T "भाग्याधिपो विलग्नेन्दुश्चेत् के वापि धर्मगो वापि । भाग्यग्रहैर्बलवच्छुभयोः गतो बलवशाच्च। भाग्याधिपो विलग्नेन्दुश्चेत् के वापि धर्मगो वापि बहूर्वा स्वोच्चगतो वा येषां ते मानवाः श्रेष्ठाः । अत्र शुभाशुभयोगात्" एवं श्लोकद्वयगतपदानां परिवर्तनेन असकृल्लिखितम् । इदं प्रश्नानुष्ठानपद्धतेः श्लोकेन शोधितम् । द्र.प्र.अ.प १५.१५.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योगैरपि भाग्य[1]गृहे बलवच्छुभयोगतो बलवशाच्च । 1833
भाग्येश्वरकर्माधिपसम्बन्धाल्लग्नपस्यापि ।। 1834

। पापपुण्यचिन्ता ।

[A]अत्र शुभाशुभयोगालोकवशाद्विद्धि पुण्यपापे च । 1835
गुरुबुधभृगुसुतवीर्यात् केन्द्र[2]शुभैश्चापि चिन्तयेद्विद्याम् ।। 1836

। ग्रन्थान्तरगतयोगप्रशंसा ।

श्रीमद्वराहहोरासारावल्यादिशास्त्रतो ज्ञेयाः । 1837
सकलशुभाशुभयोगास्ससमाङ्गादतिबला हि योगाः स्युः ।। 1838

। शन्यादिचारजन्यभावानिष्टचिन्ता ।

[B]तत्तद्भावा[3]धिपतेर्भाव[4]गृहाद्वा नवांशकाद्वापि । 1839
रिष्टे त्रिकोणभे वा [5]नेष्टोऽर्केन्द्वाररविजसञ्चारः ।। 1840

। शनिचारवशान्मरणचिन्ता ।

[C]उद्यद्दृगाणपतिराशिगते सुरेड्ये
[6]तस्य त्रिकोणमपि गच्छति वा विनाशम् । 1841
रन्ध्रत्रिभागपतिमन्दिरगेऽथ मन्दे
प्राप्ते त्रिकोणमथवास्य वदन्ति मृत्युम् ।। 1842

। मरणयोगः ।

शनौ सूर्याद्गुरौ मन्दाद्रिपुरन्ध्रत्रिकोणगे । 1843
रन्ध्रेशराशिगेऽर्केऽर्कराशिगे हिमगौ [7]मृतिः ।। 1844

---

1. T °ग्रहैः
2. T शुभे चापि चिन्त्यते विद्या
3. T °भिपते°
4. T °ग्रहा°
5. T नेष्टः केदे रविज° ।
6. T तस्य वदन्ति मृत्युम् ।
शनौ सूर्याद्गुरौ त्रिकोणमपि गन्छति वा विनाशम्
7. T2 पाठः। T मृते

A द्र.प्र.अ.प १५.१६-१७
B द्र.प्र.अ.प १५.१८ अत्र द्वाथ कारकाद्वापि। रिपुरन्ध्रकोणभे वा इति द्वितीये तृतीये पादे च विशेषः ।
C द्र.प्र.अ.प. ८.६
D द्र.प्र.अ.प ८.१०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[D]विलग्नजन्माष्टमराशिनाथयोः खरत्रिभागेश्वरयोस्तयोरपि । 1845
त[1]थेन्दुमान्द्योरपि दुर्बलां[2]शभत्रिकोणगे सूर्यसुते मृतिर्भवेत् ॥ 1846
पादघटीमितकालजहोरानाथत्रिकोणगे जीवे । 1847
लग्नांशकत्रिकोणं याते वा [3]मृत्युमादिशेत्तज्ज्ञैः ॥ 1848
[A]आत्मार्का[4]शकभत्रिकोणसहिते सूर्ये चरस्थ[5]स्स चे-
द्यर्कः स्थिरभेष्टमेशनवभागेशर्क्षकोणस्थिते । 1849
लग्नेशस्थनवांशराशिसहिते तस्य त्रिकोणेऽपि वा
भानौ मृत्युमुशन्ति यद्युभयगः सोऽयं भवेज्जन्मनि ॥ 1850
[B]निधनेश्वरगतराशौ भानाविन्दौ तु भानुगतराशौ । 1851
[6]निधनाधिपसंयुक्ते नक्षत्रे निर्दिशेन्मरणम् ॥ 1852
जन्मनि लग्नोपगताच्चन्द्रोपगतान्नवांश[7]कादथवा । 1853
चतुरुत्तरषष्ठ्यं[8]शके लग्नगे मरणमादेश्यम् ॥ 1854
निर्याणग्रहसंस्थिति[9]रेवं ज्ञेया तथान्यशास्त्रोक्ता । 1855
[10]सुपरीक्षितैव वाच्यं तत्संवादं विचिन्तयेद्दशया ॥ 1856
[C11]सारावली[12]मुड्डदशां च वराहहोरा-
मालोक्य जातकफलं प्रवदेन्नराणाम् । 1857
प्रश्नोदयग्रहवशादथवा स्वजन्म-
योगा[13]दिना वदतु नास्त्यनयोर्विशेषः ॥ 1858

---

1. T °थैति° ।
2. T °शो° for श
3. T मृत्युरादेश्यः
4. T °शर°
5. T °सवे° for °स्सचे°
6. T1 पाठः T तत्र पत्रं खण्डितम्
7. T1 °काथवा
8. T °शगे
9. T °दैवज्ञे या for खें ज्ञेया
10. T सुचरितै त्रैव पश्यान्न T2 कुरितै चैव
11. T1 नारावरि° ।
12. T °मुड्डपद° for °मुड्डद°
13. T °दिनामवदतु ह्यनयो°

A द्र.प्र.अ.प ८.१५
B द्र.प्र.अ.प ८.१८-२०
C द्र.प्र.अ.प १५.१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। विंशोत्तरीदशाज्ञानम् ।

[A]अर्केन्द्वारभुजङ्गजीवशनिवित्केत्वाख्यशुक्राः क्रमा
दग्न्यादेर्नवकत्रयर्क्षपतयः प्रोक्तास्तथाब्दाः पुनः । 1859
६ १० ७ १८ १६ १९ १७ ७ २०
तन्नित्यं स जयस्तपो धटसटा सूनुर्नराज्ञाः क्रमात्
६०
स्वाब्दघ्ना जनितार[1]कैष्यघटिका [2]नीताहृता स्वा दशा ॥ 1860

। दशापहारानयनक्रमः फलचिन्ता च ।

[B]योज्याः शेषदशाः क्रमादपहृतिः कार्यापहर्तुर्दशा
१२०
निघ्ना मूलद[3]शाऽथ नारकहृता [4]तस्यापहारो मतः । 1861
आदौ मूलदशापतेरप[5]हृतिश्शेषास्तु मूलक्रमा-
द्वाच्यं स्यादुडुजातकोदितफलं ज्ञात्वा ग्रहाणां बलम् ॥ 1862

। अशुभादिग्रहदशाफलचिन्ता ।

[C]क्रूर[6]हृतौ क्रूराब्दे त्रिपञ्चससर्क्ष[7]नाथपरिपाके । 1863
जन्माष्टमेशभुक्तौ रिपु[8]चोरैर्दुःखशोकदा भदशा ॥ 1864

। भावफलनाशवृद्धिचिन्ता ।

तत्तद्भावपराभवेश्वरखरद्रेक्काणपा दुर्बला
भावार्यष्टमकामगा निजदशायां भावनाशप्रदाः । 1865
पापा भाव[9]गृहात्त्रिशत्रु[10]भवगाः केन्द्रत्रिकोणे शुभाः
वीर्याढ्याः खलु भाव[11]नाथसुहृदो भावस्य सिद्धिप्रदाः ॥ 1866

1. T °केष्ट°
2. T नीतार्हतास्वां
3. T °शाध नारकघेहृता
4. T तस्याव°
5. T2 °मृति°
6. T °हृदौ
7. T °नाध°
8. T °चौरासौख्यरोगदाहदशा
9. T °ग्र° T1 ग्रहात्त्रिभावं
10. T °भावगाः
11. T °नाध°

A द्र.प्र.अ.प ८.२१, T मातृकायाम् अस्य श्लोकस्य प्रथमचतुर्थपादावेव दृश्येते
B द्र.प्र.अ.प ८.२२
C द्र.प्र.अ.प ८.२६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

। मृतिददशाचिन्ता ।

मन्द[1]मान्द्यगुखरेशरन्ध्रपास्तन्नवांशपतयोऽपि ये ग्रहाः ।
तेषु दुर्बलदशा मृतिप्रदा कष्टभे चरति सूर्यनन्दने ॥ 1867

व्या - मन्दमान्द्यगुरन्ध्रेशखरेशस्थनवांशपा इत्यादिः समानार्थः । 1868

। अनिष्टदशाचिन्ता ।

जन्मकालीनसौरस्य लग्नाष्टमपतेरपि
राशे[2]रंशकराशेर्वा त्रिकोणस्थो यदा शनिः । 1869
[A]तदारिरन्ध्रजामि[3]त्रवैरिक्षेत्रगतो ग्रहः । 1870
दशां [4]ददाति चेत्कष्टं क्रमेणाङ्गविनाशनम् ॥ 1871
[B]आयुर्नाशं दृष्टिनाशमपकुर्यादिति स्थितिः । 1872

। भावनाशकदशाचिन्ता । 1873

[C]राश्योर्जन्मविलग्नयोर्मृतिपतिर्मृत्युस्थतद्वीक्षकौ
मन्दः क्रूरदृगाणपो गुळिकपस्तैर्युक्त[5]राश्यंशपाः ।
राहु[6]श्चैषु सुदुर्बलस्स जनने [7]भावेऽनभीष्टे स्थितः 1874
पापालोकितसंयुतो निजदशायां भावनाशा[8]वहः ॥
इत्यादिकेन विधिना सुपरीक्षितेन 1875
[9]निर्णीयते गुरुमुखावगतेन नाशः ।
ज्ञाते तु जन्मसमये खलु जन्मकाला- 1876
त्प्रश्नोदयादितरथा सकलं विचिन्त्यम् ॥ 1877

1. T °मात्य°
2. T °रां T1 राशेराशेरां°
3. T1 °त्रवै ....दशां इति ग्रन्थपातः
4. T दशाति
5. T राश्यं रवेः
6. T °चैष्टु°
7. T भावानभीष्टस्थितः
8. T1 पाठः T पत्रं खण्डितम्
9. T1 निर्णी°

A द्र.प्र.अ.प ८.३० तृतीयपादे चेत्स्पष्टम् इति विशेषः।
B द्र.प्र.अ.प ८.३० श्लोकात्परं दृश्यते ।
C द्र.प्र.अ.प ८.३१ अस्य श्लोकस्य अन्तिमपादे 'युतोऽस्य हि दशा वान्तर्दशा मृत्युदा' इति विशेषः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्या - इत्येतदन्तमनुष्ठानपद्धतिस्थम् । अतः परं सारसङ्ग्रहात्सङ्गृह्यते विशेषः ।

। विंशोत्तरीदशानयनक्रमः ।

६ १० ७ १८ १६ १९ १७ ७ २०

तन्नित्यं सूनु[1]दिव्यातपधटसटासूनरेत्यब्दसङ्ख्या

जन्मर्क्षे सेष्यनाड्यः स्वसमनिहता वत्सरा[2]द्धाजितासा। 1878

१२०

स्वस्वायुः स्वमुखग्रहाब्दनिचयैर्हत्वा खसूर्यैर्विभ-

ज्यासा वत्सरमासवारघटिकाः [3]स्वस्वायुरन्तर्दशाः ॥ 1879

ताभ्यां चैव दशा तदन्तरदशा [4]भूयश्च ताभ्यस्तदा

तत्सञ्ज्ञाः क्रमशो दशान्तरतदन्तःप्राणसूक्ष्मा इति । 1880

लग्ने बलिन्युदयलग्नगतोडुपस्स्या-

[5]दिन्दौ निसर्गोडुपदशाधिपः क्रमेण । 1881

कृत्वा दशामखिलखेटगतां सुशेषात्

[A]संयोज्य कल्प्यमान्तदायुः ॥ 1882

। आधानादिदशाः ।

[B]जन्मर्क्षात्परतस्तु पञ्चम[6]भवादुत्पन्नसञ्ज्ञा दशा

